सिद्धान्तकौमुदी-तत्त्वप्रकाश

सोत्तरा-प्रश्नावली

(प्रथम खण्ड)

प्रणेता

पं० रामगोविन्द शुक्ल

2 RS

21

Hari Aum Ji
Ki Kirpa
S. narayan

मोतीलाल बनारसीदास

दिल्ली :: वाराणसी :: पटना

सिद्धान्तकौमुदी-तत्त्वप्रकाशः

सोत्तरा-प्रश्नावली

(प्रथमं खण्डम्)

(३० वर्षाणां प्रश्नपत्रसहितः)

सम्पादकः

पण्डितश्रीरामगोविन्दशुक्ल

न्याय-व्याकरण-साहित्याचार्यः

भारतीय संस्कृत भवन,

मोतीलाल बनारसीदास

दिल्ली :: वाराणसी :: पटना

© मोतीलाल बनारसीदास
भारतीय संस्कृति ग्रन्थमाला के प्रमुख प्रकाशक एवं पुस्तक-विक्रेता
मुख्य कार्यालय : बंगलो रोड, जवाहर नगर, दिल्ली-७
शाखाएँ : १. चौक, वाराणसी-१ (उ० प्र०)
२. अशोक राजपथ, पटना-४ (बिहार)

तृतीय संस्करण : १९७३
पुनर्मुद्रण : १९७६, १९८०
मूल्य : रु० 8

भारत सरकार द्वारा उपलब्ध किये गये
रियायती मूल्य के कागज पर मुद्रित ।

श्री नरेन्द्र प्रकाश जैन, मोतीलाल बनारसीदास, बंगलो रोड, जवाहर नगर, दिल्ली-७ द्वारा प्रकाशित तथा श्री शान्तिलाल जैन, श्री जैनेन्द्र प्रेस, ए-४५ फेस १, इंडस्ट्रियल एरिया, नारायणा, नई दिल्ली-२८ द्वारा मुद्रित ।

दो शब्द

सिद्धान्तकौमुदी पर अनेक टीकायें छप चुकी हैं। उनपर सरल से सरल बालमनोरमा और तत्त्वबोधिनी, प्रौढमनोरमा, शब्देन्दुशेखर जैसी विशिष्ट टीकायें भी अपनी प्रगाढ़ पाण्डित्य लिये गरज रही हैं। फिर भी छोटी छोटी बातें कहीं सूत्रार्थ कहीं प्रयोगों की साधुत्व-प्रक्रिया में विद्वानों का मतभेद आज भी बना ही हैं। उनकी रक्षा होना, छात्रों तक प्रचार होना आवश्यक ही है। अतः हमने उनके प्रसार की कामना से **'सिद्धान्तकौमुदी तत्त्वप्रकाश'** का निर्माण किया। यद्यपि इस संस्करण में केवल उतने ही अंश हैं जो प्रायः परीक्षाओं में पूछे जाते हैं। फिर भी मेरा विचार है कि अगले संस्करण में यदि सेवा का अवसर मिला तो उन समस्त ग्रन्थियों का विश्लेषण अवश्य करने का प्रयत्न करूँगा।

इस खण्ड की पुस्तक लिखने में मेरे प्रिय शिष्य तथा दक्षिणामूर्ति महाविद्यालय वाराणसी के प्रधानाचार्य **पण्डितश्रीरामसम्मुखद्विवेदी** नव्यव्याकरण-साहित्यवेदान्ताचार्य ने संशोधन में सहायता दी एवं **श्रीशालिग्राममिश्र** नव्यव्याकरणसाहित्याचार्य ने गणेश का कार्य किया है अतः उन्हें शुभ आशीर्वाद देते हुए श्रीभगवान् विश्वेश्वर के चरणकमलों की अर्चना में प्रकाश को प्रयुक्त करता हुआ विज्ञविद्वानों के करकमलों में इसे अर्पित करता हूँ।

यदि छात्रबन्धुओं को इससे कुछ भी प्रकाश मिला तो मैं अपने परिश्रम को सफल मानूँगा।

रामगोविन्द शुक्ल

विजयादशमी
२०१७

प्रकरण-सूची

			पृष्ठ
१. संज्ञाप्रकरणम्	....	....	१
२. परिभाषाप्रकरणम्	....	....	८
३. अच्सन्धिप्रकरणम्	....	....	११
४. हल्सन्धिप्रकरणम्	....	....	२३
५. विसर्गसन्धिप्रकरणम्	....	....	२९
६. स्वादिसन्धिप्रकरणम्	....	....	३२
७. अजन्तपुंलिङ्गप्रकरणम्	....	....	३७
८. अजन्तस्त्रीलिङ्गप्रकरणम्	...	....	६१
९. अजन्तनपुंसकलिङ्गप्रकरणम्	....	....	७०
१०. हलन्तपुंलिङ्गप्रकरणम्	....	....	७६
११. हलन्तस्त्रीलिङ्गप्रकरणम्	....	....	१०६
१२. हलन्तनपुंसकलिङ्गप्रकरणम्	....	....	१०९
१३. अव्ययप्रकरणम्	....	...	११७
१४. स्त्रीप्रत्ययप्रकरणम्	....	....	११९
१५. प्रश्नपत्राणां संग्रहः	....	....	१४१
१६. परिशिष्टम्	....	....	१५२

सिद्धान्तकौमुदी-तत्त्वप्रकाशः

(प्रथमखण्डम्)

येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥

अथ संज्ञाप्रकरणम् ।

अइउण् ।१। ऋलृक् ।२। एओङ् ।३। ऐऔच् ।४। हयवरट् ।५। लण् ।६। ञमङणनम् ।७। झभञ् ।८। घढधष् ।९। जबगडदश् ।१०। खफछठथचटतव् ।११। कपय् ।१२। शषसर् ।१३। हल् ।१४।

इति माहेश्वराणि सूत्राणि ।

माहेश्वराणि—(ई० ३०) महेश्वरादागतानि माहेश्वराणि = महेश्वरवरप्रसादलब्धानि । तथाहि—नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् । उद्धर्तुकामाः सनकादिसिद्धा नैतद्विमर्शे शिवसूत्रजालम् ॥

अथवा—महेश्वरेण प्रोक्ता उपज्ञाता माहेश्वराः चतुर्दशानुबन्धाः ते सन्ति येषु तानि माहेश्वराणि महेश्वरकृतानुबन्धयुतानि इत्यर्थः ।

अत्र सूत्राणि महेश्वरादागतानि अनुबन्धाः आचार्यपाणिनिकृताः इत्येकः पक्षः । सूत्राणि अनादिसिद्धानि अनुबन्धाः महेश्वरकृताः इत्यपरः पक्षः ।

अइउण—इत्यत्र छन्दोवत्सूत्राणि भवन्तीति सिद्धान्तात् न यणादीनि । आनुपूर्वीसम्पादनमात्रप्रयोजनकत्वाच्च न वर्णात्कार इत्यनेन कारप्रत्ययः ।

हयवरट्-हल्—अट्प्रत्याहारे हकारग्रहणाय प्रथमो हकारः, तेन अर्हेणेत्यत्र 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन णत्वम् सिद्ध्यति । शल्प्रत्यहारे हकारग्रहणाय च द्वितीयो हकारः । तेन अलिक्षदित्यत्र लिह धातोः शलन्तत्वात् 'शल इगुपधादनिटः क्सः' इत्यनेन क्सश्च सिद्धयति ।

लण्सूत्रेऽकारश्च—(ई० ४७, ४९, ५१) ननु तुल्यास्य-सूत्रे-'ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्' इति वार्तिकेन ऋकारलृकारयोः सावर्ण्यात् 'उरण् रपरः' इति सूत्रेण ऋकारस्य लृकारस्य वा गुणे रपरे 'तवल्कारः' इदं रूपं न सिद्धयेदिति चेत् शृणु ? 'तुल्यास्य' इति सूत्रे 'लपरत्वं वक्ष्यामि' इति भाष्ये उक्तं तस्य 'लपरत्वं व्याख्यास्यामीत्यर्थः' कैयटेन कृतः । व्याख्या च रपरसूत्रे रेफेण 'र' प्रत्याहारस्य ग्रह-

णम् । रप्रत्याहारश्च लण् सूत्रस्थस्य लकारोत्तराकारस्येत्संज्ञया साधनीयः । अत एव 'उरण् रपरः' इत्यत्र आन्तरतम्यात् ऋकारे रपरत्वं लृकारे लपरत्वं सिद्धयति ।

न च 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इत्यत्र 'रषाभ्या नो णः समानपदे' इत्यत्र च रेफेण प्रत्यहारस्य ग्रहणात् 'प्रफुल्तम्' इत्यत्र निष्ठानत्वम् 'कमलानि' इत्यत्र च अड्व्यवायेऽपि णत्वं स्यात् अतः रप्रत्याहारो न पाणिनिसम्मतः । किञ्च अतो ल्रान्तस्येति सूत्रे केवलं रेफ एव कृतः स्यात् रप्रत्याहारेणैव लकारग्रहणप्रयोजनसिद्धेः इति बहुदोषतया रप्रत्यहारो न स्वीकरणीयः, किन्तु रपरसूत्रे लपरश्चेति वक्तव्यमिति भाष्याशय इति वाच्यम् । 'सहचरितासहचरितयोर्मध्ये सहचरितस्यैव ग्रहणम्' इति परिभाषया उक्तेषु त्रिषु सूत्रेषु क्रमशः दकारषकाराकारैः सहचरितस्य रेफस्य न प्रत्याहारत्वं रपरसूत्रे तु अण्सहचरितस्य रेफस्य प्रत्याहारत्वस्वीकारेणादोषादिति दिक् ।

हकारादिष्वकार उच्चारणार्थः—(ई० ४९) ननु हयवरट् इत्यादिसूत्रे हकारोत्तरवर्तिनोऽकारस्य किं प्रयोजनमिति चेत् शृणु—'नचान्तरेणाचं व्यञ्जनस्योच्चारणमपि भवति' इति 'उच्चैरुदात्तः' सूत्रस्थभाष्यप्रामाण्येन हल्प्रत्याहारघटकव्यञ्जनेषु अकारः केवलमुच्चारणमात्रप्रयोजनकः तेन इत्संज्ञालोपाभ्यां विनैव तेषां निवृत्तेः !

हलन्त्यम्—(ई० ४४) ननु अष्टाध्याय्यां 'हलन्त्यमि'त्येकमेव सूत्रं वर्तते कथं सिद्धान्तकौमुद्यां सूत्रद्वयमिति चेत् शृणु ? वाक्यार्थबोधे पदार्थज्ञानस्य कारणत्वात् हलन्त्यमित्यस्य बोधे हल्पदार्थज्ञानस्य 'आदिरन्त्येन सहेता' इत्यस्य बोधे इत्पदार्थज्ञानस्यावश्यकतया स्वज्ञप्त्यधीनज्ञप्तिकत्वरूपान्योन्याश्रयस्य प्रसङ्गः । 'अन्योन्याश्रयाणि च कार्याणि शास्त्रे न प्रथन्ते' इति भाष्यम् । अतः अन्योन्याश्रयदोषवारणाय सूत्रावृत्तिः कर्तव्या । प्रथमस्य हलन्त्यमिति सूत्रस्य'हलि'ति सूत्रेऽन्त्यमित् स्यादित्यर्थः । द्वितीयस्य उपदेशेऽन्त्यमित् स्यादित्यर्थः । तेन नान्योन्याश्रयः ।

नच हलिति सूत्रेऽन्त्यमित् स्यादित्यर्थकेनैव निर्वाहे द्वितीयस्य कावश्यकतेति-वाच्यम् ? तथासति 'न विभक्तौ तुस्माः' इत्यस्य वैय्यर्थ्यापत्तेः । कृते च तस्मिन्, जसः सकारस्येत्संज्ञाप्राप्तौ तन्निषेधाय सूत्रस्य न वैयर्थ्यम् इति दिक् ।

आदिरन्त्येन सहेता—(ई० ३३) सूत्रार्थः-अन्त्येन इता सह उच्चार्यमाणः आदिः मध्यगाना स्वस्य च संज्ञा स्यात् इति । अत्र 'स्वं रूपं' इत्यतः, स्वं रूपं पदमनु-

वर्तते । वस्तुतः-अन्त्येत् सदृशेन सह उच्चार्यमाण आदिसदृशः स्वघटकानुयोगिकसादृश्यप्रतियोगित्वेन विवक्षितवर्णनिष्ठचरमावयवतानिरूपकः, एवं स्वघटकानुयोगिकसादृश्यप्रतियोगित्वेन विवांक्षतवर्णनिष्ठादितानिरूपकश्च यः समुदायः स तद्घटकस्य बोधको भवति इत्यर्थः । यथा-अण् प्रत्याहारः । अन्त्येन इता अइउण् घटकणकारेण सदृशः 'उरण् रपरः' इति सूत्रस्थो णकारः, एवं आदिः अइउण् सूत्रस्थोऽकारः तत्सदृशः उरण् सूत्रस्थः अण् पदघटकोऽकारः तेन सह उच्चार्यमाणः 'अण्' इति तद्घटको णकारः तदनुयोगिकसादृश्यप्रतियोगी वर्णः अइउण् घटको णकारः तन्निष्ठचरमावयवतानिरूपकः, तथा अण्घटकोऽकारोपि तदनुयोगिकसादृश्यप्रतियोगी वर्णः अइउण्घटकोऽकारः तन्निष्ठादितानिरूपकः समुदायः अइउण् इति तद्घटकोऽकारादिवर्णस्तस्य बोधकं 'अण्' पदमिति निष्कृष्टः सूत्रार्थः ।

(9) **'लण्' सूत्रस्थावर्णेनेत्यादि—(ई० ५५)** ननु इदं न्यूनं रटलानां संज्ञा इति वक्तव्यत्वाद् इति चेन्न ? प्रत्याहारेष्वितां ग्रहणं न भवति 'मुखनासिकावचनोऽनुनासिकः' इति सूत्रे अनुनासिक इति निर्देशात् । अन्यथा-अत्र ककारस्याच्त्वात् सकारोत्तरवर्तिन इकारस्य यण् स्यात् ।

(10) **ऊकालोज्ह्रस्वदीर्घप्लुतः—(ई० ४५)** सूत्रार्थः—उश्च ऊश्च ऊ३श्च वः । वां काल इव कालो यस्य सोऽच् क्रमाद् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् । अनेन उच्चारणकालशिष्टस्याचः ह्रस्व-दीर्घ-प्लुतसंज्ञाः विधीयन्ते ।

न च अज्ग्रहणाभावेऽपि एकमात्रिकद्विमात्रिकत्रिमात्रिकोकाराणां ह्रस्वादिसंज्ञासिद्धौ अज्ग्रहणं व्यर्थमिति वाच्यम्, प्रतक्ष्य, प्ररक्ष्येत्यादौ 'व्यञ्जनं चार्धमात्रकम्' इत्युक्त्या द्वयोः क्ष्व्यञ्जनयोः एकमात्रिकत्वेन ह्रस्वसंज्ञायाम् 'ह्रस्वस्य पिति कृति तुक्' इत्यनेन, तुगागमापत्तेः । अज्ग्रहणे कृते तु एकमात्रिकस्य अच एव ह्रस्वसंज्ञा इति न दोषलेशोपीति दिक् ।

(11) **ह्रस्वग्रहणमतन्त्रम्—**'तस्यादित उदात्तमर्धह्रस्वम्' इति सूत्रस्य स्वरितस्यादितोर्धमुदात्तं बोध्यमित्यर्थः । ननु ह्रस्वग्रहणस्य किं प्रयोजनमिति चेन्न; ह्रस्वग्रहणमतन्त्रम् । स्वशास्त्रसङ्केतितरूपेण नार्थबोधजनकम् किन्तु अर्द्धमात्रार्थबोधजनकमित्यर्थ इति दीक्षिताः ।

(12) **नागेशास्तु—**स्वरितस्यादितः ह्रस्वस्यार्धमुदात्तं बोध्यमिति सूत्रार्थः । तेन ह्रस्वे

अर्धस्य, दीर्घेऽपि अर्धमात्रायाः उदात्तत्वमिति वदन्ति ।

किन्तु—'एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः।' इत्यादिप्रमाणबलेन दीर्घेऽपि अर्धस्यैव उदात्तत्वबोधनेन दीक्षितोक्तपक्ष एव श्रेयान् इति दिक् ।

(13) **लृवर्णस्य द्वादश तस्य दीर्घाभावात्**—(ई० ४३) यद्यपि 'याज्ञवल्क्यशिक्षायां दीर्घऌकारस्य पाठो दृश्यते तदनुसारेण 'ऌति ऌवा' इति वार्तिकेन विहितस्य द्विमात्रिकऌकारस्य ग्रहणं शक्यते वक्तुम् तथापि अनतिप्रयोजनकस्य ऌकारस्य ह्रस्वप्लुतभेदावेव व्याकरणशास्त्रे गणितौ इति ऌकारस्य दीर्घभेदानङ्गीकारात् ।

(14) **तुल्यास्यप्रयत्नं सवर्णम् । (ई० ५७)** सूत्रार्थः—तुल्यौ आस्यप्रयत्नौ यस्य तत् तुल्यास्यप्रयत्नम् सवर्णं भवति । अर्थात् आस्ये येषां तुल्यो देशः तुल्यः प्रयत्नश्च ते मिथः सवर्णसंज्ञकाः भवन्ति इत्यर्थः ।

न च तुल्यं च तुल्यश्च तुल्ये इति नपुंसकं भवितव्यमिति वाच्यम्, तुल्यावित्यत्र तन्त्राङ्गीकारेणादोषात् ।

(15) **प्रक्रियादशायां तु विवृतमेव ।** ननु दण्ड आढकमिति स्थिते संवृतस्य आकारस्य विवृतेनाकारेण सह प्रयत्नभेदात् सावर्ण्यं न स्यादिति चेन्न ? अष्टाध्याय्याः अन्तिमेन 'अ अ' इति सूत्रेण विवृतस्याकारस्य संवृतविधानेऽपि पूर्वत्रासिद्धमिति शास्त्रेण संवृतस्यासिद्धत्वात् विवृतत्वेन सवर्णसंज्ञायाम् 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घे सति दोषाभावात् । अत आह मूले—प्रक्रियादशायां तु विवृतत्वमस्त्येवेति !

अचां प्रयत्नाः के । ननु वर्णसमाम्नाये भागत्रयं विद्यते । एकः अचां, अपरः हशां, तृतीयः खराम् । तत्र हशां-हशः संवारा नादा घोषाश्चेत्यनेन बाह्यप्रयत्नाः व्याख्याताः । खरां च खरो विवारः श्वासा अघोषाश्च इत्यनेन बाह्यप्रयत्नाः व्याख्याताः । किन्तु अचां प्रयत्नाः के इति तु नोक्तं कुत्रापि इति चेन्न । अन्ये तु घोषाः स्युः—इत्यादौ अन्यग्रहणेन अचामपि ग्रहणात् तेषां संवारः, नादः घोषः, अल्पप्राणप्रयत्नाः ज्ञेयाः । एवं उदात्तोऽनुदात्तः स्वरितश्चेति । आभ्यन्तरप्रयत्नेषु तु अचां विवृतम् किन्तु ह्रस्वाकारस्य प्रक्रियाकालातिरिक्तकाले संवृतम् इति विवेकः ।

(16) **नाज्झलौ**—(ई० ५४) अकारसहितोऽच् आच् स च हल्चेत्येतौ मिथः सवर्णसंज्ञौ न स्त इत्यर्थः । तेन दधि हरति, दधि षष्ठम्, दधि सान्द्रम् इत्यादौ 'इको यणचि' इत्यनेन यण्, दधि शीतलमित्यत्र सवर्णदीर्घश्च न भवति । अन्यथा

अकारादीनामिव हकारादीनामपि अणुदित्शास्त्रबलादच्त्वे यण् दीर्घश्च स्याताम् । एवं हे यिया३सो, हे पिपा३सो, इत्यत्रापि इण्ग्रहणेन आकारस्यापि ग्रहणात् षत्वापत्तिः । अतः प्लुताकारस्यापि अत्र प्रश्लेषो वक्तव्यः । तेन आ३च आच आ, आकारसहितो अच् इति आच्, आच्च हल्च आज्झलौ न आज्झलौ इति नाज्झलौ इति समासस्वीकारेणादोषात् । दीर्घाकारप्रश्लेषे 'कालसमयवेलासु तुमुन्' इति सूत्रे षत्वाभावः मानम् । हे यिया३सो इति भाष्यप्रयोगश्च प्लुतप्रश्लेषे मानम् ।

(17) **अणुदित्सवर्णस्येति**—(अ० ४१) अत्र अण् उदित् सवर्णस्य च अप्रत्ययः इतिच्छेदः । चकारः भिन्नक्रमः । इति अणतः विशेषणम् नोदित् योग्यत्वात् । तेन अविधीयमानोऽण् उदिच्च सवर्णसंज्ञको भवति । प्रतीयते विधीयते इति प्रत्ययः । न प्रत्ययः अप्रत्ययः इत्यस्य अविधीयमानोऽर्थः । उदितश्च कु चु टु तु इत्यादयः यथा—चुटू, लशक्वतद्धिते इत्यादौ चु इत्यनेन चवर्गस्य कु इत्यनेन कवर्गस्य ग्रहणम् । अनेन सूत्रेण अणमुद्दिश्य सवर्णग्राहकता विधीयते ।

(18) **अत्राण् परेण णकारेण**—ननु अण् ग्रहणे संदेहः अयमण् प्रत्याहारः पूर्वणकारेण भवतु परणकारेण वा । यदि सर्वत्र परणकारेणैव प्रत्याहारः तर्हि 'ढ्लोपे पूर्वस्य दीर्घोऽणः' इत्यनेन तृढः वृढः इत्यत्रापि ढलोपे कृते पूर्वस्य ऋकारस्याणत्वात् दीर्घः स्यात् । अतः अत्र पूर्वणकारेणैव अण् ग्रहणं वक्तव्यमिति चेन्न । सर्वत्र पूर्वकारेणैवाण्ग्रहणे 'उरॄत्' इति सूत्रे तपरकरणमनर्थकं स्यात् । यतो हि पूर्वणकारेणैवाण् ग्रहणे ऋकारस्याण् प्रत्याहारे ग्रहणाभावेन दीर्घॠकारादेरप्राप्तौ तन्निषेधाय तपरकरणं व्यर्थं स्यादतोऽत्र सूत्रे एव अण् प्रत्याहारः लण्सूत्रस्थणकारान्तो ज्ञेयः ।

(19)

आभ्यन्तरप्रयत्नज्ञानाय तालिका

कवर्ग-चवर्ग-टवर्ग तवर्ग-पवर्गाणां—	स्पष्टं प्रयतनम्
यवरलानां	ईषत्स्पृष्टं प्रयतनम
अ इ उ ऋ ऌ ए ओ ऐ औ श प स ह वर्णानां	विवृतं प्रयतनम्
(अ) ह्रस्वाकारस्य	संवृतं प्रयतनम् ।

बाह्यप्रयत्नज्ञानाय तालिका

वर्णसमाम्नाये भागत्रयं वर्तते । अशां हशां खरां इति । तत्र अचां के बाह्यप्रयत्ना इति पूर्वमुक्तम् । हशः संवारा नादा घोषाश्च । खरो विवारा, श्वासा अघोषाश्च ।

तथा वर्गाणां प्रथम-द्वितीयौ वर्णौ शषसाश्चेति खरः अन्ये अज्भिन्ना हशः ।

यण् सहिताः वर्गाणां प्रथम-तृतीयपञ्चमाः स्वराश्च अल्पप्राणाः । शषसह-शषसहाः वर्गाणां द्वितीयचतुर्थौ च महाप्राणाः ।

(20) **एदैतोरोदौतोश्च न मिथः सावर्ण्यम्**—(अ० ५१) ननु तुल्यास्येति सूत्रेण स्थान प्रयत्नयोः तुल्यत्वे यदि सवर्णसंज्ञा विधीयते तर्हि एकारैकारयोः ओकारौकारयोश्च कुतः परस्परं सवर्णसंज्ञा न भवतीति चेन्न, सवर्णसंज्ञायां सत्यां एकेनैव सूत्रेण कार्य-निर्वाहे ऐऔच् इदं सूत्रं व्यर्थं स्यादतः सामर्थ्यात् न उभयोः परस्परम् सावर्ण्यम् इति कल्प्यते ।

न च 'वृद्धिरादैच्' इत्यत्र ऐचः 'अदेङ्गुण' इत्यत्र च एङः ग्रहणाय सूत्रयोः सार्थक्ये सिद्धे पुनः सवर्णसंज्ञा कुतो नेति वाच्यम् । सर्वत्र एङ्पाठादपि कार्यसिद्धेः सत्वेन उक्तसमाधानस्य सार्थक्यात् ।

(21) **विश्वपाभिरित्यत्र ढत्वं कुतो न ।** (ई० ५७) ननु 'तुल्यास्यप्रयत्नं सवर्णम्' इत्यनेन दीर्घाकारहकारयोः स्थानप्रयत्नयोरैक्यात् सवर्णसंज्ञायां विश्वपाभिरित्यत्र आकारस्य हकाररूपत्वात् 'होढ' इत्यनेन ढत्वं कुतो न ? न च नाज्झलाविति निषेधः शङ्क्यः, 'पूर्वं वर्णानामुपदेशस्तदुत्तरकालेत्संज्ञा, इत्संज्ञोतरकाला प्रत्याहारसिद्धिः, तदुत्तर-काला सवर्णसंज्ञा, तदुत्तरं नाज्झलाविति निषेधः, तदुत्तरं अणुदित्यनेन सवर्ण-ग्राहकता एतेन समुदितेन अन्यत्र सवर्णानां ग्रहणं भवति नापि स्वस्मिन्नापि स्वाङ्गे' इति भाष्योक्तदिशा वर्णसमाम्नायपठितानामेव सावर्ण्यविधिनिषेधयोः सतोः दीर्घा-दीनां तदा अणुदिदिति ग्रहणकशास्त्रस्यासत्वेनाग्रहणादिति चेन्न ? नाज्झलाविति सूत्रे दीर्घाकारस्यापि प्रश्लेषेणादोषात् । प्रश्लेषे मानञ्च 'कालसमयवेलासु तुमुन्निति' सूत्रे षत्वाभाव एव ।

(22) **तपरस्तत्कालस्य** (ई० ५४) अत्र सूत्रे पदद्वयम् तपरः इत्येकं पदं तत्काल-स्येत्यपरं पदम् । तत्र तपर इत्यस्य तः परो यस्मादिति बहुव्रीहिः, तात् परः इति पञ्चमीसमासः । तेन तः परो यस्मात् तात्परश्चोच्चार्यमाणो वर्णः तत्कालस्य (सम-कालस्य) संज्ञा स्याद् अयमर्थः । यथा अदेङ्गुण इति सूत्रे अत् एङ् इत्यत्र मध्ये पठितः तकारः ह्रस्वाकारस्य दीर्घस्य एकारस्य ओकारस्य च ग्रहणं नियमयति तेन न प्लुतादीनां ग्रहणम् ।

(23) **स्वं रूपं शब्दस्याशब्दसंज्ञा** (ई० ५३) शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रे या

संज्ञा तां विना इति सूत्रार्थः। अयं भावः—अग्नेर्ढक् इत्यनेन विधीयमानो ढक् अग्निरूपादर्थादसम्भवेन कथमनेन 'अग्नेर्ढक्' भविष्यतीति शङ्कायामिदं सूत्रं यत् शब्दस्य स्वं रूपमेव संज्ञि तेन अग्निशब्दादेव ढक् भवति न तु वह्निशब्दात् नवा अग्निरूपादर्थाद् अतो न हानिः। न चैवं गुणबृद्धयादिशब्दा अपि गुणशब्देन विहिताः स्युरिति वाच्यम् शब्दशास्त्रे या संज्ञा तां विहायैवास्य नियमस्य प्रवृत्तेः।

(२४) **येन विधिस्तदन्तस्य** (ई० ५४) विशेषणं तदन्तस्य सज्ञा स्यादिति वृत्तिः। अयं भावः येन विशेषणेन विधिर्विधीयते स तदन्तस्य समुदायस्य ग्राहको भवति। अत्र सूत्रे येन इति करणें तृतीया करणस्य व्यापारवनियमात्। इवर्णावन्तादच्प्रत्ययो भवतीत्यर्थके एरच् इति सूत्रे विशेषणस्य इकारस्य पाणिनिकृतविधानक्रियायां करणस्य इतरव्यावर्तनमेव व्यापारः। ततश्च येन इति तृतीयान्तेन विशेषणमेवात्रोच्यते तेनोक्तार्थलाभः। अतः एरच् सूत्रे इकारान्तस्य इकाररूपस्य वा शब्दस्य ग्रहणम् तेन इकारान्ते चयः, जयः इत्यत्र, इकाररूपे अयः इत्यत्र च अच् प्रत्ययः सिद्धयति।

(२५) **समासप्रत्ययविधौ प्रतिषेधः**। समासविधी प्रत्ययविधौ च तदन्तविधेः प्रतिषेधो वाच्यः। तेन कृष्णषरमश्रितः इति समासविधौ तदन्तविधेरभावेन न द्वितीया श्रितेति समासः। न वा सूत्रनडस्य गोत्रापत्यं सौत्रनडिः इत्यत्र प्रत्ययविधौ नडादिभ्यः फक् इत्यनेन फक् प्रत्ययश्च भवति।

(२६) **विरामोऽवसानम्** (ई० ५३) विरतिर्विरामः अथवा विरम्यते अनेनेति विरामः। अयं भावः यस्मिन् वर्णे उच्चारिते सति अव्यवहितोत्तरकाले वर्णान्तराणामुच्चारणाभावः अन्त्यवर्णः अवसानसंज्ञको भवतीत्यर्थः।

(२७) **परः सन्निकर्षः संहिता** (ई० ४५) परशब्दः अतिशयेऽर्थे वर्तते, सन्निकर्षः सन्निधानम् सामीप्यम्। तच्च अर्धमात्राधिककालव्यधानाभावः। ततश्च वर्णानां परः अतिशयितः य सन्निकर्षः अर्धमात्राकालव्यवधानं स संहितासंज्ञको भवति इत्यर्थः।

(२८) **सुप्तिङन्तं पदम्**—(ई० ४६) सुप् तिङ् इति च प्रत्याहारग्रहणम्। सुप् च तिङ् च सुप्तिङौ तौ अन्ते यस्य तत् सुप्तिङन्तम् पदम् भवति। द्वन्द्वान्ते श्रूयमाणस्यान्तपदस्य प्रत्येकं सम्बन्धात्। तथा—ब्राह्मणाः पठन्ति।

न च—अत्र तदन्तविधिनैव सिद्धे अन्तग्रहणं किमर्थमिति वाच्यम्; 'संज्ञाविधै

प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इति परिभाषायाः ज्ञापनाय अन्तग्रहणस्यावश्यकत्वात्। तेन ईदूदेद्द्विवचनं प्रगृह्यमित्यनेन न द्विवचनान्तस्य प्रगृह्यसंज्ञा । अन्यथा कुमार्योरगारम् कुमार्यगारम् इत्यत्र प्रगृह्यसंज्ञा स्यात् यण् च निषिद्धं स्यात् ।

(25) **दीर्घं च**—(ई० ५४) दीर्घं च गुरुसंज्ञकं भवति ।

इति संज्ञाप्रकणमिति

यद्यपि—संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते ॥

इति सूत्रभेदकथनात् संज्ञासूत्राणां प्रकरणं समाप्तमित्यर्थोऽवगम्यते । तथापि नात्र सर्वेषां संज्ञासूत्राणां समावेशः किन्तु सन्धिकार्योपयुक्तानामेव । तेन सन्धिकार्योपयुक्तानां संज्ञासूत्राणां प्रकरणं समाप्तम् अयमर्थः सम्पद्यते ।

इति संज्ञाप्रकरणम् ।

●

अथ परिभाषाप्रकरणम् ।

इको गुणवृद्धी—(ई० ४६) इकः इति षष्ठ्यन्तः शब्दः स्वरूपपरः । वृद्धिरादैच् इत्यतो वृद्धिरिति अदेङ् गुण इत्यतो गुण इति चानुवर्तते । इति शब्दः उपतिष्ठते इति च अध्याह्रियते । यत्र विधीयते तत्र इत्यप्यध्याहार्यम् ततश्च गुणो वृद्धिरित्युच्चार्य यत्र गुणवृद्धी विधीयेते तत्र इकः इति षष्ठ्यन्तं पदमुपतिष्ठत इत्यर्थो भवति । यत्र साक्षात् स्थानी न निर्दिष्टः सार्वधातुकार्धधातुकयोरित्यादावेवेयं परिभाषोपतिष्ठते न तु अचोञ्णितीत्यादौ ।

अचश्च—(ई० ५६) 'अच' इति षष्ठ्यन्तशब्दः स्वरूपपरः । ऊकालोऽच्—इत्यत्र अच्ह्रस्वदीर्घप्लुतः इत्यनुवर्तते इति यत्र विधीयते इत्याध्याहार्यम् । ततश्च ह्रस्वदीर्घप्लुतशब्दैः यत्राज् विधीयते तत्र अचः इति षष्ठ्यन्तं पदमुपतिष्ठते । ह्रस्वो नपुंसके प्रातिपदिकस्येत्युदाहरणम् ।

स्थानेऽन्तरतमः—(ई० ५३) स्थानं च प्रसङ्गः । अन्तरशब्दो सदृशपर्यायः अतिशयितोऽन्तरः अन्तरतमः । ततश्च प्रसङ्गे सति सदृशतम आदेशः स्यादित्यर्थः सम्पद्यते । एकस्य स्थानिनः अनेकादेशप्रसङ्गे सति यः स्थानार्थगुणप्रमाणतः स्थानिना सदृशतमः स एव आदेशो भवतीत्यर्थः । अत्र स्थानशब्देन ताल्वादिस्थानं विवक्षितम् ।

गुणशब्देन प्रयत्नः । प्रमाणशब्देन एकद्विमात्रादिपरिमाणम् । तत्र स्थानतो यथा-दध्यत्र अर्थतो यथा-तृज्वत्क्रोष्टुः । गुणतो—यथा-वाग्घरिः, प्रमाणतो यथा-अदसोऽसेर्दादुदोम इति ।

यत्रानेकविधमान्तर्यम् इत्यादि—[ई० ४६, ५१] ननु अस्याः परिभाषायाः किं प्रयोजनम् इति चेत् शृणु; चेता इत्यत्र पुगन्तलघूपधस्येति सूत्रेण गुणे प्राप्ते स्थानेऽन्तरतम-सूत्रप्रवृत्या स्थानतः आन्तर्यस्वीकारे एकारे गुणे यतः इकारस्य एकारस्य च तालुस्थानजत्वम् । प्रमाणमत आन्तर्ये च अकारोपि गुणः स्यात् यतः अकारस्य इकारस्य च ह्रस्वप्रमाणत्वम् । अतः चेता इत्यत्र कदाचित् अकारे गुणे कदाचिच्च एकारे गुणे चता, चेता इति च रूपद्वयं स्याद् । अत इयं परिभाषा स्थानतः आन्तर्यस्य बलवत्त्वबोधनायावश्यिकेति ।

अस्यां मानं च—षष्ठी स्थाने योगा इत्यतः स्थाने ग्रहणानुवृत्त्यैव सिद्धे पुनः 'स्थानेऽन्तरतम' इति सूत्रे स्थाने ग्रहणं व्यर्थं सद् अस्यां परिभाषायां मानम् । यथा स्थाने अन्तरतम इति सूत्रद्वयम् तत्र पूर्वसूत्रात् स्थाने पदानुवृत्तौ प्रसङ्गे सति सदृशतम आदेशः स्यादित्येकस्यार्थः, द्वितीये स्थाने इत्यस्य स्थानेनेत्यर्थः, पूर्वसूत्रं सम्पूर्णमनुवर्तते । तथासति स्थानिनः प्रसङ्गे सति सम्भवे स्थानेन अन्तरतम एव भवतीत्यर्थो लभ्यते तेनेयं सिद्धयतीति भावः ।

आन्तर्यभेदाः के कानि च तेषामुदाहरणानि [ई० ४६] आन्तर्यम् स्थानार्थगुणप्रमाणभेदात् चतुर्विधम् । तत्र स्थानतः 'दध्यत्र' इति । अत्र तालुस्थानीयस्य इकारस्य स्थाने तालुस्थानीयो यकारः । अर्थतो यथा-पद्दन्नोमास इति । अत्र पादशब्दस्य पदादेशः । गुणतो यथा वाग्घरिः, अत्र संवारस्य नादस्य घोषस्य महाप्राणस्य हस्य तादृश एव घकारः । प्रमाणतो यथा-अमुम्, अमू, अमून् इति । अत्र अदसोऽसेर्दादुदोमः इत्यनेन ह्रस्वस्य स्थाने ह्रस्वः दीर्घस्य स्थाने दीर्घः उकारः ।

तस्मादित्युत्तरस्य (ई० ५४) तस्मादिति पंचम्यन्तस्यानुकरणम् । तस्मिन्निति निर्दिष्टे पूर्वस्य इत्यस्मान्निर्दिष्ट इत्यनुवर्तते । तेन पंचमीनिर्देशेन विधीयमानं कार्य वर्णान्तरेणाव्यवहितस्य उत्तरस्य ज्ञेयम् । उदः स्थास्तम्भोः पूर्वस्य इत्याद्युदाहरणम् ।

अष्टाभ्य औश् इत्यादौ अदेः परस्य इत्येतदपि परत्वादनेन बाध्यते (ई० ३०) ननु तस्मादित्युत्तरस्यादेरिति सूत्रकरणेनैव सकलेष्टसिद्धौ आदेः परस्येति पृथक

सूत्रकरणं किमर्थमिति चेत्; शृणु, तस्मादित्युत्तरस्येति सूत्रस्थाने एकयोगकरणे अष्टन् शब्दात् जसि आत्वे अष्टा अस् इत्यवस्थायां जसः औशादेशे प्राप्ते अनेन परत्वात् अनेकालशित् सर्वस्येति सूत्रं प्रबाध्य आदेः अकारस्यौशादेशे रुत्वे विसर्गे 'अष्टौः' इत्यनिष्टं रूपं प्रसज्येत । पृथक् योगकरणे तु आदेः परस्येति परिभाषां प्रबाध्य सर्वादेशः सिद्धयति ।

न च आदेः परस्य इति सूत्रस्थाने एकयोगकरणे न दोष इति वाच्यम् । तस्मादित्युत्तरस्येतिवत् आदेः परस्येत्यस्थापि आगमविषये प्रवृत्त्या आज्जसेरसुगिति सूत्रेणाकारस्य आसुगागमे परसकारस्य संयोगान्तलोपे रुत्वे विसर्गे च कृते देवासः ब्राह्मणासः इत्यादिवैदिकप्रयोगासिद्धेः । अतः यथान्यासमेव साधु इति दिक् ।

स्वरितेनाधिकारः—(ई० ५५) स्वरितत्वप्रयुक्तं शब्दशास्त्रमधिकृतं वेदितव्यम् इति सूत्रार्थः । अधिकारः कियद्दूरम् इत्यत्र तु व्याख्यानमेव शरणम् ।

परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः । परिनित्यान्तरङ्गापवादानां मध्ये पूर्वपूर्वशास्त्रापेक्षया उत्तरमुत्तरं शास्त्रं प्रबलमित्यर्थः । **परात् नित्यं यथा**—तुदति इति । अत्र परमपि लघूपधगुणं प्रबाध्य नित्यत्वात् तुदादिभ्यः शः इत्येनन शः । **परादन्तरङ्गम् यथा** – उभये देवमनुष्याः । अत्र प्रथमचरमेत्यादिना प्राप्तां वैकल्पिकीं सर्वनामसंज्ञां प्रवाध्य विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वात् सर्वादीनि इत्यादिना सर्वनामसंज्ञा भवति । **परादपवादो यथा दध्ना** । अत्र अस्थिदधि-इत्यनङ् परमपि अनेकाल्शिति सर्वादेशं प्रबाध्य अपवादेन ङिच्चेत्यनेनान्तादेशः । **नित्यादन्तरङ्गो यथा**—ग्रामणिनी कुले । अत्र नित्यमपि इकोचि नुमं प्रबाध्य ह्रस्वो नपुंसके-इत्यन्तरङ्गत्वाद्ह्रस्वः । पूर्वं नुमि कृते तु अनजन्तत्वाद् ह्रस्वो न स्यात् । **अन्तरङ्गादपवादो यथा**—दैत्यारिः अत्र परमपि सवर्णदीर्घं प्रबाध्य अन्तरङ्गत्वात् आद्गुणे प्राप्ते अपवादत्वात् सवर्णदीर्घः ।

अकृतव्यूहाः पाणिनीयाः (ई० ५१) न कृतः अकृतः व्यूहः प्रत्ययः विवेचनं यैस्ते अकृतव्यूहाः पाणिनीयाः वैयाकरणाः । निमित्तं विनाशोन्मुखं दृष्ट्वा तत् प्रयुक्तं कार्यं न कुर्वन्ति इत्यर्थः । यथा निषेदुषीम् । अत्र क्वसोरिटमन्तरङ्गत्वात् प्राप्तमपि भाविना सम्प्रसारणेन बलादित्वं नक्ष्यतीति पर्यालोच्य न कुर्वन्ति इति भावः ।

इति परिभाषाप्रकरणम् ।

—:०:—

अथाच्सन्धिप्रकरणम् ।

स्थानिवदादेशोऽनल्विधौ । अत्र सूत्रे भागद्वयम् । स्थानिवदादेशः अयम् एको योगः 'अनल्विधौ' इत्यपरो योगः । तत्र आदेशः स्थानिवद् भवति इति पूर्वयोगस्यार्थः । अनल्विधावित्ययमंशः स्थानिवद्भावनिषेधकः । तस्य च अल्त्वव्याप्यधर्मावच्छिन्नोद्देश्यताके विधौ न स्थानिवदित्यर्थः । तथा च सुध्य् उपास्य इत्यवस्थायामस्य प्रवृत्तौ यण्रूपः आदेशः स्थानिवद् भवतीति स्थानिवत्त्वेन द्वित्वनिषेधे प्राप्ते अनल्विधावित्यनेन इक्त्वस्य अल्त्वव्याप्यधर्मावच्छिन्नत्वात् तदुद्देश्यके द्वित्वविधौ स्थानिवद्भावनिषेधः सिद्ध्यति ।

अचः परस्मिन् पूर्वविधौ । (५७) अत्र स्थानिवदादेशः इति सूत्रमनुवर्तते । अल्विध्यर्थमिदं सूत्रम् । अच इत्यस्य आदेशः इत्यत्रान्वयः । परस्मिन्निति सति सप्तमी । तेन परनिमित्तक इति लभ्यते । तदपि आदेशविशेषणम् । विधिग्रहणं पूर्वस्य विधिः पूर्वविधिः पूर्वस्माद्विधिः, पूर्वविधिः इति अर्थद्वयलाभाय । ततश्च परनिमित्तो योऽजादेशः स स्थानिवद् भवति स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ (कार्ये) कर्तव्ये इत्यर्थः । पूर्वस्य विधिः इति समासपक्षे अयमर्थः । उदाहरण च सुद्ध्युपास्य इति । अत्र सुध्य् उपास्य इत्यवस्थायाम् अज्निमित्तकस्य यण्रूपस्याजादेशस्य स्थानिवत्त्वम् यतः स्थानिभूतो यो अच् ईकारः ततः पूर्वत्वेन दृष्टस्य धकारस्य विधौ द्वित्वे कर्तव्ये स्थानिवत्त्वेन यकारस्याच्त्वात् द्वित्वविघातः प्राप्नोति । पूर्वस्माद्विधिः इति पञ्चमी समासपक्षे तु तन्वन्ति इत्युदाहरणम् । अत्र यणादेशस्य स्थानिवद्भावान्नेट् यतः अत्र 'तन्' इत्यङ्गं निमित्तम् । तच्च स्थानिभूतादुकारात् पूर्वम् ।

अदर्शनं लोपः—(ई० ५३) दर्शनस्याभावः अदर्शनम् । प्रसक्तस्य विद्यमानस्य अदर्शनम् अश्रवणम् तत् लोपसंज्ञं भवति ।

स्थानत आन्तर्यादीकारस्य यकारः । ननु व्यक्तिपक्षे 'उच्चरितः शब्दः प्रत्यायको भवति नानुच्चरितः' इति न्यायेन वर्णसमाम्नाये ह्रस्वानामेव पाठात् कथं इक्पदेन दीर्घादीनां ग्रहणम्, कथं वा सुद्ध्युपास्य इत्यत्र यणिति चेन्न; प्रत्याहारग्रहणेषु तद्वाच्यवाच्ये निरूढा लक्षणा भवति । तेन दीर्घादीनामपि ग्रहणं सिद्ध्यति । अतएव न यथासंख्यसूत्रेण निर्वाहः । अन्यथा चत्वारः इकः चत्वारश्च यणः उभयोः यथासंख्येनान्वयेन कार्यनिर्वाहः स्यादेव ! दीर्घादीनामपि ग्रहणे तु इक्पदेन षट्षष्टेः

यण्पदेन च सप्तानां ग्रहणेन यथासंख्याभावात् स्थानेऽन्तरतमसूत्रेण स्थानत आन्तर्य-स्वीकारः। इदं सर्वमभिप्रेत्य उक्तं मूले स्थानत आन्तर्यादीकारस्य यकार इति।

(1) **सुद्ध्युपास्यः** (ई० ४९) सुधी उपास्य इत्यवस्थायां सहितायाः विषये तस्मिन्नि-तिनिर्दिष्टे पूर्वस्य, 'स्थानेऽन्तरतम' इति सूत्रद्वयसहकारेण स्थानतः आन्तर्यादीकारस्य स्थाने 'इको यणचि' इत्यनेन यकारे यणि सुध्य् उपास्य इति जाते 'स्थानिवदा-देशोऽनल्विधौ' इत्यनेन स्थानिवद्भावे प्राप्ते 'अनल्विधौ' इत्यनेन तान्निषेधे पुनः 'अचः परस्मिन् पूर्वविधौ' इत्यनेन स्थानिवद्भावे प्राप्ते 'न पदान्तद्विर्वचनवरेय-लोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु।' इत्यनेन स्थानिवद्भावनिषेधे 'अनचि चे' ति धकारस्य द्वित्वे, 'झलां जश् झशि' इत्यनेन पूर्वधकारस्य दकारे 'संयोगान्तस्य लोप' इत्यनेन यकारस्य लोपे प्राप्ते 'यणः प्रतिषेधो वाच्यः' इत्यनेन यकारलोप-निषेधे सुद्ध्युपास्य इति सिद्धम्। अत्र 'यणो मयो द्वे वाच्ये' इति वार्तिकेन मय इति पंचमी यण इति षष्ठी इति पक्षे यकारस्यापि द्वित्वे चत्वारि रूपाणि। तथा —सुध्युपास्यः, सुद्ध्युपास्य; सुद्ध्युपास्यः, सुद्ध्य्युपास्यः इति। सुधीभिः उपास्यः इति देवः विष्णुः गणेशो वा।

अत्र 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इत्यनेन ह्रस्वसमुच्चितः प्रकृतिभावो न भवति 'न समासे' इति निषेधात्।

(2) **लाकृतिः** (ई० ५३) लृ आकृतिरित्यवस्थाथा 'इको यणचि' इत्यनेन 'स्थानेऽन्तरतमः' सूत्रसहकारेण यणि लाकृतिः इति सिद्धम्।

(3) **पुत्रजग्धी** (ई० ५४) पुत्र + जग्धी इत्यवस्थायां 'हतजग्धयोः' इत्यनेन वैकल्पिके द्वित्वे पुत्त्रजग्धी, पुत्रजग्धी इति रूपद्वयं सिद्ध्यति। अनचि चेत्यनेनैव द्वित्वे सिद्धे वार्तिकं नियमार्थम्। यत्र पुत्रशब्दस्य द्वित्वं तर्हि हतजग्धयोरेव तेन पुत्रवित्तिः इत्यादौ न द्वित्वम्।

(4) **इन्न्द्रः** (ई० ४६) 'इन्द्र' इत्यत्र 'त्रिप्रभृतिषु शाकटायनस्ये' ति सूत्रेण नका-रस्य द्वित्वे इन्न्द्रः इति सिध्यति।

(5) **सर्वत्र शाकल्यस्य** (ई० ५४) शाकल्याचार्यस्य मतेन सर्वत्र द्वित्वं न भवति। तेन अर्कः, ब्रह्मा इत्यादौ न द्वित्वम्। अतएव सर्वत्र द्वित्वविकल्पः सिद्ध्यति।

(6) **'हलो यमां यमि लोपः' सूत्रस्य प्रयोजनम् लिखत** (ई० ३८) ननु हरि + अनुभवः, नहि + अस्ति इत्यवस्थायां 'इको यणचि' इत्यनेन यणि 'अचो रहाभ्यां

द्वे' इति वैकल्पिके द्वित्वे द्वित्वपक्षे विकल्पेन 'हलो यमां यमि लोपः' इत्यनेन यकारस्य लोपे ह्यनुभवः, हर्य्यनुभवः, नह्यस्ति नह्ययस्त इति रूपद्वयं सिद्धयति। तत्र लोपाभावेऽपि द्वित्वस्य वैकल्पिकत्वेन रूपद्वयसिद्धौ लोपशास्त्रस्य किं प्रयोजनमिति चेत् श्रूयताम्।

अ दितेरपत्यमादित्यः आदित्यः देवता अस्य हविषः इति आदित्यं हविः इति प्रयोगे आदित्यशब्दात् देवतार्थे 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्य' इत्यनेन ण्यप्रत्यये भत्वेन यस्येति चेत्यनेनाकारलोपे आदित्य्य् इत्यवस्थायां 'हलो यमां यमि' इत्यनेन यकारलोपे आदित्यं हविरिति सिद्धयति। अतः इदं सूत्रमावश्यकम् इति दिक्।

माहात्म्यम्। ई० ४८ ननु माहात्म्यम् इत्यत्र 'हलो यमां यमि' इत्यनेन मकारस्य लोपः कुतो नेति चेन्न, हलो यमां यमि इति सूत्रे यथासंख्यं गृह्यते तेन मकारस्य मकारे परे एव लोपविधानात् अत्र च यकारपरत्वेन न लोप इति दिक्।

विष्णवे (ई० ५६) विष्णो + ए इत्यवस्थायां 'यथासंख्यमनुदेशः समानाम्' इति सूत्रसहकारेण 'एच्चोयवायावः' इत्यनेन ओकारस्य अवादेशे विष्णवे इति सिद्धम्।

नचात्र वकारस्य हलन्त्यमित्यनेन इत्त्वात् लोपः कुतो नेति वाच्यम्, उच्चारण-सामर्थ्यात्। तेन अत्र वकारस्य इत्संज्ञापि न भवति।

गव्यम्। गोर्विकारः इत्यर्थे 'गोपयसोर्यत्' इत्यनेन यति गो × यत् इत्य-वस्थायाम् 'वान्तो यि प्रत्यये' इत्यनेन अवादेशे अमि गव्यमिति सिद्धयति।

गव्यूतिः (ई० ५२) युधातोरधिकरणे क्तिन् प्रत्यये 'ऊतियूतिसातिहेतिकीर्त-यश्चे' त्यनेन निपातनाद्दीर्घे यूतिशब्दः निष्पद्यते, ततः गो + यूतिः इत्यवस्थायां 'गोर्यूतौ छन्दस्युपसंख्यानमि' त्यनेन अवादेशे गव्यूतिः इति सिद्धयति वेदे। लोके तु 'गव्यूतिः स्त्री क्रोशयुगम्' इति कोशबलाद् 'अध्वपरिमाणेचे' त्यनेनावादेशे गव्यूतिरिति सिद्धयति।

न च गव्यम्, नाव्यम् इत्यादौ गव् इत्यस्य पदत्वात् 'लोपः शाकल्यस्ये' त्यनेन वकारस्य लोपः कुतो नेति वाच्यम्। वान्त इत्यत्र वकारात् गोर्यूतौ इत्यत्र छकाराद्वा लोपो व्योरित्यनेन लुप्तस्य वकारस्य प्रश्लेषः क्रियते तस्य इदं तात्पर्यम् यत् वकार. न लुप्यते। श्रूयमाणवकारान्तः आदेशो भवति इति भावः।

लव्यम्। (ई० ५७) लूञ् छेदने इत्यस्मात् यत् प्रत्यये गुणे लो × यम् इत्य-वस्थायाम् 'धातोस्तन्निमित्तस्यैव' इत्यनेन अवादेशे लव्यमिति सिद्धम्।

न च लो यम् इत्यत्र 'वान्तो यि प्रत्यये' इत्यनेनैवावादेशे सिद्धे इदं सूत्रं किमर्थ-मिति वाच्यम् नियमार्थत्वात्। नियमाकारश्च यादौ प्रत्यये परे धातोरेचश्चेद् वान्तादेशः तर्हि तन्निमित्तस्यैव। तेन लव्यम् अवश्यलाव्यमित्यत्र वान्तादेशः सिध्यति। ओयते,

औयत इत्यत्र च न वान्तादेशः। यतो हि आङ्पूर्वात् वेञ् धातोः कर्मणि लटि यकि, आत्मनेपदे, यजादित्वात् सम्प्रसारणे पूर्वरूपे 'अकृत्सार्वधातुकयोरिति' दीर्घे ओयते इति सिद्धयति। अत्र ओ यते इत्यवस्थायां न वान्तादेशः यादिप्रत्ययनिमित्तकस्यैचोऽभावात्। औयत इत्यत्र तु वेञः कर्मणि लङि यकि, आत्मनेपदे, सम्प्रसारणे, पूर्वरूपे आटि 'आटश्चेति' वृद्धौ औयत इति रूपम्। अत्रापि एचः यादिप्रत्ययनिमित्तकत्वाभावेन न वान्तादेशः।

(14) **क्षय्यम्**—क्षेतुं शक्यं क्षय्यम्। अत्र क्षि धातोः शक्यार्थे यत् प्रत्यये गुणे क्षेयम् इत्यवस्थायाम् एकारस्याच्परकत्वाभावेन 'एचोऽयवायावः' इत्यस्याप्राप्तौ 'क्षय्यजय्यौ शक्यार्थे' इत्यनेन अयादेशनिपातने क्षय्यम् इति सिद्धयति।

(15) **क्रय्यम्** :—क्रेतारः क्रीणीयुरिति बुद्धया आपणे प्रसारितं द्रव्यं क्रय्यम्। अन्यत्र प्रदर्शनार्थं प्रसारिते वस्तुनि क्रेयमिति। तत्र क्री धातोः कर्मणि यत् प्रत्यये गुणे क्रेयम् इत्यवस्थायाम् 'एचोयवायावः' इत्यस्याप्राप्तौ 'क्रय्यस्तदर्थे' इत्यनेन अयादेशनिपातनेन क्रय्यम् इति सिद्धम्। अन्यत्र क्रेयमिति।

(16) **हर एहि**—(ई० ३६) हरे एहि स्थिते 'एचोयवायावः' इत्यनेन अयादेशे 'लोपः शाकल्यस्ये'त्यनेन वैकल्पिके यकारलोपे हर एहि इत्यवस्थायाम् 'ओमाङोश्चेति' पररूपे प्राप्ते पूर्वत्रासिद्धमिति यलोपस्यासिद्धत्वात् न पररूपम् हर एहि इति सिद्धम्। यलोपाभावपक्षे हरयेहि इति सिद्धम्।

(17) **गुरावुत्कः**—(ई० ५५) गुरौ उत्कः इत्यवस्थायाम् 'एचोयवायावः' इत्यनेनावादेशे 'लोपः शाकल्यस्ये' ति वैकल्पिके वलोपे आद्गुणे प्राप्ते 'पूर्वत्रासिद्धमि'ति लोपस्यासिद्धत्वात् न गुणे, गुरा उत्कः इति निषेधे। लोपाभावपक्षे गुरावुत्कः इति सिद्धयति।

(18) **कानि सन्ति, कौ स्तः**—ननु शास्त्रे पक्षद्वयं वाक्यसंस्कारपक्षः पदसंस्कारपक्षश्च। तत्र मुख्ये वाक्यसंस्कारपक्षे कानि सन्ति, कौ स्तः इत्यवस्थायाम् अचः परस्मिन् पूर्वविधौ इति सूत्रेण अस् धातोः 'श्नसोरल्लोपः' इत्यनेन लुप्तस्य अकारस्य स्थानिवद्भावात् कानि सन्ति इत्यत्र यण्, कौ स्तः इत्यत्र अवादेशः कुतो नेति चेन्न। न पदान्तद्विर्वचनेत्यादिना सूत्रेण पदस्य चरमावयवे कार्ये कर्तव्ये स्थानिवद्भावनिषेधेन न यणावादेशौ। पदसंस्कारपक्षे तु असधातुघटकाकारात् कानीतीकारस्य कौ इत्यौकारस्य वा पूर्वत्वेन दृष्टत्वाभावात् स्थानिवद्भावाप्राप्त्या न शङ्कायाः लेशोपीति दिक्।

19) **कृष्णर्द्धिः**—(ई० ४५) कृष्ण ऋद्धिः इत्यवस्थायाम् 'उरण् रपरः' इति सूत्रसहकारेण 'आद्गुण' इत्यनेन अर् गुणे कृष्णर्द्धिः इति सिद्धम् । अत्र अचो रहाभ्यां द्वे इत्यनेन पक्षे द्वित्वम् झरो झरि सवर्णे इत्यनेन पक्षे झरो लोपे इत्थं त्रीणि रूपाणि । द्वित्वाभावे लोपे च कृष्णर्धिः, असति लोपे द्वित्वे लोपे च कृते कृष्णर्द्धिः । द्वित्वे लोपाभावे च कृष्णर्द्धिः ।

20) **तवल्कारः**—(ई० ५७) तव लृकारः इत्यवस्थायाम् 'उरण् रपरः' सूत्रसहकारेण 'आद्गुण' इत्यनेन अल् गुणे तवल्कार इति द्धिम् ।

अत्र 'यणो मयो द्वे वाच्ये' इति वार्तिकेन यण इति पंचमी मय इति षष्ठी इति पक्षे ककारस्य द्वित्वे लकारस्य 'अनचि चेति' द्वित्वे रूपचतुष्टयम् सिद्धयति। तद् यथा द्वित्वाभावे तवल्कारः, लकारस्यैव द्वित्वे तवल्ल्कारः, ककारस्यैव द्वित्वे तवल्क्कारः, लकारककारयोर्द्वित्वे तवल्ल्क्कारः । तदाह मूले—

द्वित्वं लस्यव कस्यैव नोभयोरुभयोरपि ।
तवल्कारादिषु बुधैर्बोध्यं रूपचतुष्टयम् ।।

21) **उपैति**—(ई० ५७) उप एति इत्यवस्थायां 'वृद्धिरेची'ति वृद्धि प्रबाध्य प्राप्तं 'एङि पररूपमि'ति सूत्रं प्रबाध्य 'एत्येधत्यूठ्सु' इति वृद्धौ उपैतीति सिद्धम् ।

22) **प्रष्ठौहः**—(ई० ५७) प्रष्ठ ऊहः इत्यवस्थायाम् 'आद्गुण' इति गुणं प्रबाध्य 'एत्येधत्यूठ्सु' इति वृद्धौ प्रष्ठौहः इति सिद्धम् ।

23) **माभवान् प्रेदिधत्**—(ई० ४७) ननु एजादिपदानुवृत्तिः किमर्था एत्येधत्योः एजादित्वात् इति चेन्न, मा भवान् प्र + इदिधत् इत्यवस्थायाम् एधतेः एजादित्वाभावेऽपि वृद्धावनिष्टं प्रसज्येत । अतः एजादिग्रहणम् । तेनात्र न वृद्धिः किन्तु 'आद्गुण' इत्यनेन गुणे रूपं सिध्यति ।

24) **अवेहि**—(ई० ४९) अव + आ + इहि, इत्यवस्थायाम् 'अकः सवर्णे दीर्घ' इति दीर्घे प्राप्ते 'आद्गुण' इति गुणे च प्राप्ते 'असिद्धं बहिरंगमन्तरङ्गे' इति परिभाषया धातूपसर्गयोः कार्यस्यान्तरङ्गत्वात् गुणे अव + एहि इति जाते 'वृद्धिरेचि' त्यनेन वृद्धौ प्राप्तायां तां प्रबाध्य 'एङि पररूपमि'ति पररूपे प्राप्ते तत् प्रबाध्य 'एत्येधत्यूठ्सु' इत्यनेन वृद्धौ प्राप्तायाम् तां प्रबाध्य 'ओमाङोश्चेति' पररूपे अवेहीति सिद्धम् ।

ननु 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति' इति परिभाषया 'एत्येधत्यूठ्सु' इति सूत्रं यथा 'एङि पररूपमि'त्यस्य बाधकम् तथैव 'ओमाङोश्चे'-त्यस्यापि बाधात् अवेहीत्यत्र वृद्धिः कुतो नेति चेन्न ? 'पुरस्तादपवादा अनन्तरान्

विधीन् बाधन्ते नोत्तरान्' इति न्यायेनेयं वृद्धिः 'एङि पररूपमि' त्यस्यैव बाधिका ननु 'ओमाङोश्चे'त्यस्य तेन अवेहीत्यत्र वृद्धिकरणमनुचितमेव ।

25) **प्रोढवान्**—[ई० ५२] प्र-ऊढवान् इत्यत्र 'आद्गुण' इत्यनेन गुणे प्रोढवानिति सिद्धम् ।

26) **ननु**—प्रोढवानित्यत्र 'प्रादूहोढोढ्येषैष्येषु' इति वार्तिकेन वृद्धिः कथन्नेति चेन्न । समुदायोऽर्थवान् समुदायस्यैकदेशो निरर्थकः इति सिद्धान्तात् 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमि'ति परिभाषया च ऊढवान् घटकस्य ऊढः इत्यस्य निरर्थकत्वेन वार्तिकाप्रवृत्तेः वृद्धिर्न भवति ।

27) परिभाषायां मानञ्च—'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति सूत्रे राजेः पृथग् भ्राजिग्रहणमेव । अन्यथा राज् ग्रहणेन भ्राजः ग्रहणे सिद्धे पुनः भ्राज् ग्रहणं व्यर्थं स्यात् । परिभाषायां सत्यां तु भ्राज्घटकस्य राजः अनर्थकत्वेन सूत्राप्रवृत्त्या भ्राज ग्रहणस्य सार्थकत्वं सिद्धयति इति दिक् ।

28) **दशार्णः**—(ई० ५३) दश ऋणानि दुर्गभूमयः जलानि वा यस्मिन् देशे स दशार्णो देशः । दश + ऋणः इति स्थिते 'आद्गुणः' इति गुणं प्रबाध्य 'प्रवत्सतरकम्बलवसनार्णदशानामृणे' इति वार्तिकेन वृद्धौ 'उरण् रपर' इति रपरे दशार्ण इति साधुः ।

29) **प्रार्च्छति**—प्र + ऋच्छति इत्यवस्थायाम् 'आद्गुण' इति गुणं प्रबाध्य 'उपसर्गादृति धातौ' इति सूत्रेण वृद्धौ 'उरण् रपर' इति रपरे प्रार्च्छति इति सिद्धम् ।

30) **ननु**—'अन्तादिवच्चेति' सूत्रेण एकादेशविशिष्टस्य प्रार् इत्यस्य पूर्वान्तवद्भावेन पदत्वात् पदान्तरेफस्य 'खरवसानयोर्विसर्जनीयः' इत्यनेन विसर्गः कुतो नेति चेन्न । 'उभयथर्क्षु' 'कर्तरि चर्षिदेवतयोः' इत्यादिषु रेफस्य विसर्गादर्शनेन ज्ञायते यत् अन्तवद्भावेन पदान्तरेफस्य विसर्गो न भवति तेन न विसर्ग इति दिक् ।

31) **उपसर्गादृति धातौ**—ननु उपसर्गपदादेव धातोराक्षेपे सिद्धे पुनः सूत्रे धातुग्रहणं किमर्थमिति चेन्न; धातोः इति पदं योगविभागार्थम् । तेन 'ऋत्यकः' इति सूत्रेण प्राप्तमपि प्रकृतिभावं प्रबाध्यानेन वृद्धौ सत्यां एकमेव रूपं सिद्ध्यति इति दिक् ।

32) **उपार्च्छति**—(ई० ४७) उप + ऋच्छति इत्यवस्थायां गुणे प्राप्ते तं प्रबाध्य 'उपसर्गादृति धातौ' इत्यनेन वृद्धौ उपार्च्छति इति सिद्धम् ।

33) **ननु**—'अन्तादिवच्चे'ति पूर्वान्तवद्भावेन उपार् घटकरेफस्य पदान्तत्वात् 'खरवसानयोर्विसर्जनीयः' इत्यनेन विसर्गः कुतो नेति चेन्न; उभयर्क्षु–कर्तरि चर्षि– इत्यादिनिर्देशेन अन्तवद्भावेन पदान्तरेफस्य न विसर्गः इति ज्ञापनेनादोषात् ।

34) **अन्तादिवच्च**—[ई० ५४] तत्र: 'एकः पूर्वपरयोः' इति सूत्रमनुवर्तते । तेन योऽयमेकादेशः स पूर्वस्यान्तवत् परस्यादिवत् स्यादित्यर्थः । अत्रायं निष्कृष्टोऽर्थः = एकादेशशास्त्रप्रवृत्तेः प्राक् पूर्वस्थानिनिष्ठचरमावयवतानिरूपकसमुदायवृत्तिधर्म्मः एकादेशनिष्ठचरमावयवतानिरूपकसमुदायविशिष्टे आयाति । एवं एकादेशास्त्रप्रवृत्तेः प्राक् परस्थानिनिष्ठाद्यवयवतानिरूपकसमुदायवृत्तिधर्मः एकादेशनिष्ठाद्यवयवतानिरूपकसमुदायविशिष्टे आयाति इत्यर्थः । तेन क्षीरपेण इत्यत्र पूर्वान्तवत्त्वेन 'प' इत्यस्योत्तरपदस्येकाच्त्वात् णत्वं भवति । एवं खट्वा इत्यत्र दीर्घे कृते आकारस्य परादिवद्भावेन टाप्त्वात् सोर्लोपः सिद्ध्यति ।

35) **प्रार्षभीयति** [ई० ५७] प्र + ऋषभीयति इत्यवस्थायाम् 'आद्गुण' इति गुणं प्रबाध्य 'वा सुप्यापिशलेः' इति विकल्पेन वृद्धौ रपरे प्रार्षभीयति इति सिद्धम् । वृद्धौ सत्यां 'अचो रहाभ्यां द्वे' इत्यनेन पकारस्य द्वित्वं तु न भवति 'शरोचीति' निषेधात् । पक्षे गुणे रपरे प्रर्षभीयति इति साधुः ।

36) **उपेडकीयति**—[ई० ५२] 'एङि पररूपम्' इति सूत्रे 'वा सुप्यापिशलेः' इति सूत्रात् 'वा सुपि' इत्यनुवर्तते । तेन अवर्णान्तादुपसर्गादेङादौ सुब्धातौ परे पररूपमेकादेशो वा स्यादित्यर्थः । तेन पक्षे प्रेजते इत्यादौ नित्यं पररूपम् । पक्षे उपेडकीयति इत्यत्र उप + एडकीयति इत्यवस्थायाम् विकल्पेन पररूपे उपेडकीयति इति । पक्षे वृद्धौ उपैडकीयति च सिद्ध्यति ।

37) **टिसंज्ञा इत्यादि**—[ई० ४७] 'अचोन्त्यादि टि' इति सूत्रेण टिसंज्ञा विधीयते । अस्यार्थः—अचां मध्ये योन्त्यः स आदिर्यस्य समुदायस्य स समुदायः टिसंज्ञको भवति । प्रकृतेः अन्त्यभागस्य टिसंज्ञा विधीयते । यथा मनीषा इत्यत्र मनस् = ईषा इत्यवस्थायाम् अचां मध्ये योऽन्त्योऽच् मनसः नकारोत्तरोऽकारः स 'अस्' समुदायस्य आद्यवयवः, अतः अस् इति प्रकृतेः अन्त्यभागस्य टिसंज्ञा ।

38) **शकन्धुः**—[ई०] शकानां देशविशेषाणामन्धुः इति विग्रहः । अन्धुः = कूपः । शक + अन्धुः इत्यवस्थायाम् 'अकः सवर्णे दीर्घः' इति दीर्घं प्रबाध्य 'आद्यन्तवदेकस्मिन्' इति परिभाषाबलेन 'अचोन्त्यादि टि' इति सूत्रसहकारेण 'शकन्ध्वादिषु पररूपं वाच्यमि'ति वार्तिकेन पररूपे शकन्धुरिति सिद्धम् ।

39) **मनीषा**—(ई० ५५) मनसः ईषा इति विग्रहे मनस् ईषा इत्यवस्थायाम् 'अचोन्त्यादि टि' इत्यनेन अस् इति समुदायस्य टि संज्ञायाम् 'शकन्ध्वादिषु पररूपं

वाच्यमि'ति वार्तिकेन पररूपे मनीषा इति सिद्धम् ।

(40) **कुलटा**—अटतीति अटा कुलस्य अटा कुलस्य कुलटा । कुल + अटा इत्यवस्थायाम् 'अचोन्त्यादि टि' इत्यनेन टिसंज्ञायाम् 'शकन्ध्वादिषु पररूपं वाच्यम्' इति वार्तिकेन पररूपे कुलटा इति सिद्धम् ।

(41) **मार्तण्डः**—मृतण्डागतः मार्तण्डः अण् विषये एव मार्त + अण्ड इत्यवस्थायां दीर्घं प्रबाध्य 'अचोन्त्यादि टि' इति टिसंज्ञायाम् 'शकन्ध्वादिषु पररूपं वाच्यमि'ति वार्तिकेन पररूपं सिद्धम् ।

(42) **स्थूलोतुः**—(ई० ५५) ओतुः मार्जारः । स्थूल ओतुः इत्यवस्थायाम् वृद्धिं प्रबाध्य 'ओत्वोष्ठयोः समासे वा' इति वार्तिकेन विकल्पेन पररूपे स्थूलोतुः, पक्षे वृद्धौ स्थूलौतुः इति सिद्धम् ।

(43) **शिवेहि**—(ई० ५२) शिव आ इहि इत्यवस्थायां 'आद्गुण' इति गुणे 'अकः सवर्णे दीर्घ' इति दीर्घे च प्राप्ते धातूपसर्गयोः कार्यस्याऽन्तरङ्गत्वात्, 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषाबलेन पूर्वं गुणे शिव एहि इति सिद्धम् । शिव + एहि इत्यत्र 'अन्तादिवच्चे'ति अन्तवद्भावे 'ओमाङोश्चे'त्यनेन पररूपे शिवेहीति सिद्धम् ।

(44) **पटत्पटेति** (ई० ५२) पटत् इति ध्वनेरनुकरणे 'डाचि बहुलं द्वे भवतः' इति बहुलग्रहणात् पटदित्यस्य द्वित्वे 'तस्य परमाम्रेडितम्' इति द्वितीयस्याम्रेडितसंज्ञायाम् । 'नाम्रेडितस्यान्त्यस्य तु वा' इत्यनेन विकल्पेन पररूपे 'आद्गुणः' इति गुणे पटत्पटेति इति रूपं सिद्धम् । पररूपाभावे 'झलां जशोन्ते' इति जश्त्वे पटत्पटदिति च रूपं सिद्धम् ।

(45) **अचि किम्**—(ई० ३८) ननु 'अकः सवर्णे दीर्घ' इति सूत्रे अचि पदानुवृत्त्यभावेऽपि अकः सवर्णे अक एव भविष्यति पुनः अचि पदानुवृत्तिर्व्यर्था इति चेन्न; कुमारी शेते इत्यत्र दीर्घेकारशकारयोः स्थानप्रयत्नसाम्यात् सावर्ण्ये सवर्णदीर्घापत्तिः । न च 'नाज्झलौ' इत्यनेन अज्झलोः सावर्ण्यनिषेधः स्यादिति वाच्यम् वर्णानामुपदेशस्तावदुपदेशोत्तरकाला इत्संज्ञा इत्संज्ञोत्तरकालः प्रत्याहारः प्रत्याहारोत्तरकाला सवर्णसंज्ञा ततः सवर्णग्राहकता इति सवर्णसंज्ञाकाले सवर्णानां ग्रहणाभावाद् 'नाज्झलौ' इत्यनेन न दीर्घेकारशकारयोः सावर्ण्यनिषेधः कर्तुं शक्यः । अतः अचिपदानुवृत्तिः कर्तव्या तेन न दीर्घः इति दिक् ।

(46) **होतृकारः**—(ई०) होतृ + ऋकारः इत्यवस्थायाम् 'अकः सवर्णे दीर्घः' इति

दीर्घे प्राप्ते तं प्रबाध्य 'ऋति सवर्णे ऋवा' इति वार्तिकेन द्विमात्रिके ऋकारे होतृकारः, पक्षे 'अकः सवर्णे दीर्घ' इति दीर्घे होतॄकारः इति सिद्धम् ।

अत्र 'ऋति सवर्णे ऋवा' इति वार्तिकेन विधीयमाने ऋकारे द्वौ रेफौ तयोरेका मात्रा अभितः अज् भक्तेः अपरा मात्रा इति द्विमात्रिकोऽयं ऋकारः ।

47 **होतॣकारः**—(ई० ४५) होतृ ऌकारः इत्यवस्थायाम् 'अकः सवर्णे दीर्घ' इति दीर्घं प्राप्ते तं प्रबाध्य 'ऌति सवर्णे ऌ वा' इति वार्तिकेन पूर्वपरयोः स्थाने ऌकार एकादेशे होतॢकारः इति सिद्धम् । पक्षे 'अकः सवर्णे दीर्घः' इति सावर्ण्यात् दीर्घे ॠकारे होतॄकार इति सिद्धम् ।

अत्र 'ऌति सवर्णे ऌवा' इति वार्तिकेन विधीयमाने ऌकारे द्वौ लकारौ तयोरेका मात्रा, अभितः अज् भक्तेरपरा मात्रा इति द्विमात्रिकोऽयं ऌकारः ।

48 **उभयत्रापि**—'ऋत्यकः' इति प्रकृतिभावे होतृ ऋकारः, होतृ ऌकारः इत्यपि साधु ।

49 **गवाग्रम्**—(ई० ३४) 'गो + अग्रम्' इति स्थिते 'एचोयवायावः' इति अवादेशं प्रबाध्य 'सर्वत्र विभाषा गोः' इति प्रकृतिभावे प्राप्ते तमपि प्रबाध्य 'ङिन्चे'ति सहकारेण 'अवङ् स्फोटायनस्य' इत्यनेन अवङि गव-अग्रमिति जाते सवर्णदीर्घे गवाग्रमिति सिद्धम् । पक्षे 'सर्वत्र विभाषा गोः' इत्यनेन प्रकृतिभावे गो अग्रम् इति । पक्षे 'एङः पदान्तादति' इति पूर्वरूपे गोऽग्रम् इति सिद्धम् ।

50 **अतीति निवृत्तम्**—'अवङ् स्फोटायनस्येति सूत्रेण अति न सम्बद्ध्यते किन्तु अचीति मण्डूकप्लुत्यानुवर्तते । अत्र प्रमाणन्तु 'प्लुतप्रगृह्या अचि नित्यम्' इत्यस्मिन् सूत्रे नित्यग्रहणाभावेऽपि 'इन्द्रे च' इति सूत्रारम्भसामर्थ्यादेव नित्यत्वलाभात् इति भाष्योक्तमेव । अन्यथा गवेन्द्रः इत्यत्र 'अतः' परत्वाभावेनावङोऽप्राप्त्या तदर्थं सूत्रस्यावश्यकत्वेनारम्भसामर्थ्यात् नित्यत्वलाभकथनं भाष्यकृतः असंगतं स्यात् । अचीत्यस्य मण्डूकानुवृत्तिस्वीकारे तु पूर्वसूत्रेणैवावङि सिद्धे 'इन्द्रेचे'त्यस्य वैय्यर्थ्येन तत्सामर्थ्यात् नित्यत्वलाभसम्भवेन नित्यग्रहणं किमर्थमिति प्रश्नः संगच्छते ।

51 **गवाक्षः**—(ई० ५२) गवाक्षः = वातायनम् । गो अक्षः इत्यवस्थायाम् अवङादेशे दीर्घे गवाक्षः इति सिद्धम् ।

ननु—यथा गो अग्रम् इत्यत्र पाक्षिकः प्रकृतिभावो भवति तथैव गवाक्ष इत्यत्रापि पाक्षिकः प्रकृतिभावः कुतो नेति वाच्यम् । अत्र व्यवस्थितविभाषास्वीकारे-

णादोषात् । विगता अवस्था विकल्परूपा जाता अस्याम् इति व्यवस्थिता सा चासौ विभाषा च इति व्यवस्थितविभाषा तया व्यवस्थितविभाषया गवाक्षः इत्यत्र नित्यम् अवङादेशः । विभाषा त्रिविधा—क्वचिद् प्राप्तविभाषा, क्वचिदप्राप्तविभाषा क्वचिदुभयत्र विभाषा इति लक्ष्यानुसारेण व्यवस्थया प्रकृता विभाषा व्यवस्थित विभाषा । सा च 'सर्वत्र विभाषा गोः' इत्यत्राश्रीयते । तेन गवाक्षः इत्यत्र नित्यमेवावङादेशो न विकल्पेनेति दिक् ।

अथ प्रकृतिभावः

(60) **हरी एतौ इत्यादावयमेव प्रकृतिभावो यथा स्यात् ।** (ई० ५६) ननु 'प्लुत-प्रगृह्या अचि नित्यमि'ति सूत्रे नित्यमिति किमर्थम् इति चेन्न । नित्यमिति पदाभावे हरी ईशौ इत्यत्र 'प्लुतप्रगृह्या अचि नित्यम्' इति सावकाशम् चक्री-अत्र इत्यत्र 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्चे'ति चरितार्थम्, हरी-एतौ इत्यत्रोभयोः प्राप्तौ परत्वात् ह्रस्वसमुच्चितः प्रकृतिभावो न स्यादित्येतदर्थं नित्यग्रहणमावश्यकम् । तदाह मूले हरी-एतौ इत्यत्रायमेव प्रकृतिभावो यथा स्याद् 'इको' इति ह्रस्वस-मुच्चितः प्रकृतिभावो माभूदिति ।

(61) **चक्रि-अत्र**—चक्री-अत्र इत्यवस्थायाम् 'इको यणची' ति यणि प्राप्ते तं प्रबाध्य 'इको सवर्णे शाकल्यस्य ह्रस्वश्चे'ति ह्रस्वसमुच्चिते प्रकृतिभावे चक्रि अत्र इति । पक्षे यणि चक्रयत्र इति सिद्धम् ।

(62) **पार्श्वम्**—(ई० ४८) पर्शूनां समूहः इति विग्रहे 'पर्श्वा णस् वक्तव्यः' इति णसि अनुबन्धलोपे आदिवृद्धौ पार्शु अ इत्यवस्थायाम् 'इको सवर्णे शाकल्यस्य ह्रस्वश्चेति' ह्रस्वसमुच्चिते प्रकृतिभावे प्राप्ते तं प्रबाध्य 'सिति च' इति वार्तिकेन तन्निषेधे यणि विभक्तिकार्ये पार्श्वमिति सिद्धम् ।

(63) **देवद३त्त**—(ई० ४५) देवद३त्त शब्दे 'गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्' इति सूत्रेण क्रमशः गुरोः प्लुते देवद३त्त इति सिद्धम् एवमेव दे३वदत्त ३ इत्यपि सिद्ध्यति ।

(64) **सुश्लोकेति**—(ई० ५६) सुश्लोक इति इत्यवस्थायाम् 'अप्लुतवदुपस्थिते' इत्यनेन अप्लुतवद्भावे कृते सति 'आद्गुणः' इति गुणे सुश्लोकेति, पक्षे सुश्लोक३ इति सिद्धम् ।

(65)

वत् किम्—(ई० ४३) ननु 'अप्लुतवदुपस्थिते' इति सूत्रे 'वत्' ग्रहणाभावेऽपि इष्टसिद्धौ वत् ग्रहणं किमर्थमिति चेन्न ? 'अप्लुत उपस्थिते' इति सूत्रकरणे अप्लुत एव विधीयेत प्लुतश्च निषिध्येत तथा च प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात् । ततश्च 'अग्नी ३ इति' इत्यत्र अनेन अप्लुतविधाने 'ईदूदेद्द्विवचनं प्रगृह्यम्' इत्यनेन प्रगृह्यसंज्ञायाम् 'प्लुत प्रगृह्या अचि नित्यमि' त्यनेन प्रकृतिभावे ईकारः त्रिमात्रो न श्रूयेत । कृते तु वत्करणे प्लुतकार्यस्य प्रकृतिभावस्यैव निवृत्तिः न तु प्लुतस्यापि तेन अप्लुतवद्भावे कृतेऽपि न प्लुतस्य निवृत्तिः किन्तु प्लुतप्रयुक्तः कार्याभाव एव । अतः वत् ग्रहणं कर्तव्यमेवेति दिक् ।

(66) **चिनु हि ३ इति**—(ई० ४१) चिनुहि ३ इति इत्यवस्थायाम् 'इ ३ चाक्रवर्मणस्य' इति सूत्रेण प्लुतस्य अप्लुतद्भावे सवर्णदीर्घे चिनुहीति सिद्धम् । पक्षे चिनुहि ३ इति इति रूपं सिद्ध्यति ।

(67) **हरी-एतौ** (ई० ५६) हरी-एतौ इत्यवस्थायाम् । 'इको यणचि' इति यणि प्राप्ते तं प्रबाध्य 'ईदूदेद्विवचनमि'ति प्रगृह्यसंज्ञायाम् 'प्लुत प्रगृह्या अचि नित्यमि'ति प्रकृतिभावे हरी एतौ इति सिद्धम् ।

(68) **नचात्र** ईदन्तद्विवचनत्वाभावात् कथं प्रगृह्यसंज्ञेति वाच्यम् । परादिवद्भावेन द्विवचनत्वस्य व्यपदेशिवद्भावेन ईकारान्तत्वस्य चाश्रयणेन ईदन्तद्विवचनत्वलाभात् । तेन ईकारान्तं द्विवचनं रेफोत्तरवर्ती ईकारस्तस्य प्रगृह्यसंज्ञा भवति इति दिक् ।

(69) **अमुकेऽत्र** (ई० ४७) ननु 'अदसो मात्' इति सूत्रे मात् ग्रहणाभावेऽपि सकलेष्टसिद्धौ माद् ग्रहणं किमर्थमिति चेन्न 'ईदूदेद्द्विवचनं प्रगृह्यम्' इत्यतः एत् इत्यस्यानुवृत्तिनिरोधार्थत्वात् । अन्यथा एत् इत्यस्यानुवृत्त्या एकारस्यापि प्रगृह्यसंज्ञायाम् अदस् शब्दादकच् प्रत्यये जसि त्यदाद्यत्वे, पररूपत्वे, असः श्यादेशे गुणे मुत्वे अमुके इति रूपम् । ततः अमुके-अत्र इत्यवस्थायामनेन प्रगृह्यत्वे प्रकृतिभावापत्तिः । कृते तु माद्ग्रहणे एकारानुवृत्त्यभावे सति न प्रगृह्यत्वम् किन्तु 'एङः पदान्तादति' इति पररूपे अमुकेऽत्र इति सिद्धम् ।

(70) **वाक्यस्मरणयोरङित्** । अयं भावः—'निपात एकाजनाङ्' इति सूत्रे अनाङ् इत्यस्य पर्युदासाद् ङिदाकारः प्रगृह्यो नेत्यर्थो लभ्यते । तेन यत्र ङित् आकारः तत्र न प्रगृह्यसंज्ञा । अतः ङित अङित आकारस्य विभागमाह ।

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्यात् **वाक्यस्मरणयोरङित्** ॥

तेन आ (ईषत्) उष्णम् इत्यत्र न प्रगृह्यसंज्ञा किन्तु 'आद्गुण' इति गु ओष्णम् इति सिद्धयति । वाक्ये, आ एवं नु मन्यसे, आ एवं किल तत् इत्यादौ अङित्वात् प्रकृतिभावः सिद्ध्यति ।

विष्णो इति (ई० ४२) विष्णो इति इति स्थिते 'सम्बुद्धौ शाकल्यस्येतावनार्षे' इत्यनेन प्रगृह्यत्वे, 'प्लुतप्रगृह्या अचि नित्यमि' त्यनेन प्रकृतिभावे विष्णो इति, प्रगृह्यत्वाभावे 'एचोयवायावः' इति अवादेशे विष्णविति इति, 'लोपः शाकल्यस्येति' वलोपे विष्ण इति, रूपद्वयं सिद्धयति ।

न च विष्ण इति इत्यत्र 'आद्गुणः' इत्यनेन गुणः कुतो नेति वाच्यम् । 'पूर्वत्रासिद्धम्' इत्येन लोपस्यासिद्धत्वात् न गुणः ।

ऊँ इति, उ इति, विति (ई० ५७) ऊँ इति, इत्यवस्थायाम् 'ऊँ' इति सूत्रेण प्रगृह्ये ऊँ इत्यादेशे प्रकृतिभावे 'ऊँ' इति । पक्षे 'उञः' इत्यनेन प्रगृह्यत्वात् प्रकृतिभावे, उ इति । पक्षे यणि विति इति रूपत्रयं सिद्ध्यति ।

ननु एके योगे एव सकलेष्टसिद्धौ योगविभागः किमर्थ इति चेन्न । एकयोगे उञः इतो परे ऊँ इत्ययं दीर्घोऽनुनासिकः प्रगृह्यश्चादेशः स्यादित्यर्थे ऊँ इति । पक्षे 'निपात एकाजनाङ्' इति रूपं स्याद् विति रूपं न सिद्ध्येत् । अतः योगविभागकरणमुचितमेवेति दिक् ।

किम्वुक्तम् (ई० ५७) किमु उक्तम् इत्यवस्थायाम् यणं दीर्घं 'निपात एकाजनाङ्' इति सूत्रं च प्रबाध्य 'मय उञो वो वा' इत्यनेन वादेशे किम्वुक्तम्, इति सिद्धम् । अत्र 'मोनुस्वारः' इत्यनुस्वारो न वत्वस्यासिद्धत्वात् ।

सोमो गौरी अधिश्रितः (ई० ४६) सोमो गोर्याम् अधिश्रितः इति स्थिते 'सुपां सुलुक् पूर्वसवर्णाच्छेयाड्डाड्याज्जालः' इत्यनेन सुपो लुकि 'ईदूतौ च सप्तम्यर्थे' इत्यनेन प्रगृह्यसंज्ञायां प्रकृतिभावे उक्तं रूपं सिद्धम् ।

मामकी तनू इति । (ई० ५६) मामक्यां तन्वां इति स्थिते 'सुपां सुलुगि'ति, सुपो लुकि 'ईदूतौ च सप्तम्यर्थे' इत्यनेन प्रगृह्यसंज्ञायां प्रकृतिभावे तनू इति सिद्धम् ।

अर्थग्रहणं किम्—(ई० ५७) ननु 'ईदूतौ च सप्तम्यर्थे' इति सूत्रे अर्थग्रहणाभावेऽपि ईदूदन्तं तत् सप्तम्यन्तं तत् प्रगह्यसंज्ञकं भवतीत्यर्थेनैवेष्टसिद्धौ सूत्रे अर्थग्रहणं

किमर्थम् ? न च 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति'— इति परिभाषया तदन्तविधिनिषेधेन उक्तार्थासम्भवे ईकारोकाररूपा या सप्तमी इत्यर्थलाभेऽनिष्टापत्तिरिति वाच्यम्, ईदूतौ सप्तमी प्रगृह्यम्, अदसः, एच्च द्विवचनम् इति लघुभूतन्यासेनैष्टसिद्धौ गुरुतरन्यासकरणसामर्थ्यात् ऊकारांशे ययी, पपी इत्यादौ परादिवद्भावेन सप्तमीत्वमादाय सूत्रसाफल्येऽपि अकारांशे सप्तमीरूपत्वासम्भावाच्च तदन्तविधौ उक्तार्थलाभे अर्थग्रहणं व्यर्थमेवेति चेन्न 'वाप्यश्वः' इत्यत्र 'वाप्यामश्वः' इति विग्रहे वापी-अश्व इत्यवस्थायाम् अनेन प्रगृह्यत्वे प्रकृतिभावापत्तिः। कृते तु अर्थग्रहणे तत्सामर्थ्यात् समभिव्याहृतान्तरपदार्थानन्वयित्वेनोपस्थितिविषयसप्तम्यर्थपर्यवसन्नस्यैव सप्तम्यन्तस्य ग्रहणं भवतीति ज्ञापनेन समासस्थले उत्तरपदार्थान्वयित्वस्य सप्तम्यर्थे सत्वेन न 'वाप्यश्व' इत्यत्र प्रगृह्यत्वमिति दिक्। तदाह मूले-वृत्तावर्थान्तरोपसंक्रान्ते माभूदिति।

दधि, दधिँ—(ई० ४१) दधि इत्यत्र 'अणोऽप्रगृह्यस्यानुनासिकः' इति विभाषया अनुनासिके दधिँ इति। पक्षे दधि इति सिद्ध्यति।

इत्यच्सन्धिः।

अथ हल्सन्धिप्रकरणम्

टोः किं सर्पिष्टमम्—(ई० ५५) ननु एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः इति परिभाषया ष्टुना ष्टुः सूत्रात् ष्टुपदानुवृत्तावपि पदान्तषकारस्य जश्त्वेन डकारस्यैव सम्भवात् ततः परस्य ष्टुत्वनिषेधस्येष्टत्वात् 'नपदान्ताट्टोरनाम्' इति सूत्रे 'टोः' ग्रहणं व्यर्थमिति चेन्न ? सर्पिष् तमम् इत्यवस्थायाम् 'ह्रस्वात्तादौ तद्धिते' इत्यनेन विहितस्य षत्वस्यासिद्धत्वेन जश्त्वाप्रवृत्तौ पदान्तषकारस्यापि लाभसम्भवेन ततः ष्टुत्वनिषेधात् सर्पिष्टमम् इति रूपं न सिद्ध्येद्। अतः सूत्रे टोः ग्रहणं कर्तव्यमिति दिक्।

यरोनुनासिकेऽनुनासिको वा—[ई० ५७] यरः पदान्तस्यानुनासिके परे अनुनासिको वा स्यादित्यर्थः। एतन्मुरारिः इत्युदाहरणम्।

एतन्मुरारिः—[ई० ४०] एतद्-मुरारिः इत्यवस्थायाम् 'यरोऽनुनसिकेऽनुनासिको वा' इत्यनेन दकारस्यानुनासिके नकारे एतन्मुरारिः इति सिद्धम् पक्षे एतद्मुरारिः इति।

(84) **चतुर्मुखः**—(ई० ५) ननु 'स्थानेऽन्तरतम उरण्रपरः' इति संहितापाठः
तत्र प्रथमान्तपाठपक्षे स्थानिनामन्तरतम आदेशो भवति इत्यर्थे 'चतुर्मुखः' इत्य
प्रतिलक्ष्यं लक्षणोपप्लवः इति सिद्धान्तेन पदान्तस्य रेफस्यानुनासिको भवती
लक्षणस्याचारितार्थ्येन रेफरूपस्थानिनोऽन्यादेशापेक्षया स्थानमात्रसादृश्येनान्तरतम्या
णकाररूपानुनासिकः कुतो नेति चेन्न; अत्र सप्तम्यन्तपाठाङ्गीकारेण आदेशानामन्त
रतमे स्थानिनि सति आदेशो भवति इत्यर्थे स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शे चरिता
र्थोऽयं विधिः रेफे न प्रवर्तते इति चतुर्मुखः इत्यत्र नानुनासिको णकारः ।

(85) **नच**—सप्तम्यन्तपाठाङ्गीकारे सुद्ध्युपास्यः इत्यादौ दीर्घे यण् न स्यादिति
प्रथमान्तपाठ एव उचित इति पक्षे 'चतुर्मुख': इत्यत्र णत्वं कुतो नेति वाच्यम्
'अनुस्वारस्य ययि परसवर्णः' इति सूत्रात् सवर्णपदानुवृत्त्या, सवर्णानुनासिको भवती
त्यर्थलाभे 'रेफोष्मणां सवर्णा न इति सन्ति' भाष्यात् रेफस्य सवर्णानुपलब्धेः न
णत्वमिति दिक् ।

(86) **मदोदग्राः ककुद्मन्त इति**—(ई० ६०) ननु 'प्रत्यये भाषायां नित्यम्' इत्यनेन
यथा तन्मात्रमित्यादौ नित्यमनुनासिकत्वं तथैव ककुद्मन्तः इत्यत्रापि नित्यमेवानु
नासिकत्वे 'मदोदग्राः ककुद्मन्तः' इत्यादिकालिदासप्रयोगस्य कथं साधुत्वमिति चेन्न।
यवादिगणेऽनुनासिकरहितस्य पाठेनेदं कल्प्यते यत् अनुनासिको न भवति । अथवा
'यचि भम्' 'तसौ मत्वर्थे' इति संहितापाठे नकारात्प्राक् चर्त्वेन दकारप्रश्लेषेण दका-
रस्य च भत्वेन पदत्वाभावात् नानुनासिक इति बोध्यमिति दिक् ।

(87) **उत्थानम्**—(ई० ५५) उद् स्थानमित्यवस्थायाम् 'स्थानेऽन्तरतमः' इति
सूत्रसहकारेण 'उदः स्थास्तम्भोः पूर्वस्य' इत्यनेन सकारथकारयोः दन्तस्थानजन्य-
त्वेन विवार-श्वासाघोषमहाप्राणप्रयत्नवत्त्वेन च सादृश्यात् सकारस्थाने थकारे तस्य
'झरो झरि सवर्णे' इति लोपे दकारस्य 'खरिचे'ति चर्त्वे उत्थानम् इति सिद्ध्यति
लोपाभावपक्षे 'खरिचे'ति चर्त्वं प्रति थकारस्यासिद्धत्वात् एकथ, कारकं द्विथकारकं
च रूपं सिद्ध्यति इति भावः ।

(88) **वाग्घरिः**—(ई० ५७) वाग् हरिः इत्यवस्थायां 'झयो होऽन्यतरस्याम्' इति
सूत्रेण घोषवतो नादवतः संवृतकण्ठस्य हकारस्य तादृश एव घकारे पूर्वसवर्णे जाते
वाग्घरिः । पक्षे वाग्हरिः इति सिद्ध्यति ।

तच्छिवः—(ई० ५३) तद्-शिवः इत्यवस्थायाम् दस्य श्चुत्वेन जकारे 'खरि

चे' ति चर्त्वेन जकारस्य स्थाने चकारे 'शश्छोऽटि' इति छत्वे तच्छिवः इति । पक्षे तच्शिवः इति सिद्धम् ।

९०) **कुण्ठितः**—(ई० ५५) कुन् ठितः इत्यवस्थायाम् 'नश्चापदान्तस्य झलि' इत्यनुस्वारे कृते 'अनुस्वारस्य ययि परसवर्णः' इति परसवर्णेन णकारे कुण्ठितः इति सिद्धम् ।

९१) **कुर्वन्ति**—(ई० ४३) कृ धातोः लटि प्रथमपुरुषवहुवचने रूपम् । अत्र 'रषाभ्यां' इति णत्वे प्राप्ते तस्यासिद्धत्वात् 'नश्चापदान्तस्य झलि' इत्यनुस्वारे 'अनुस्वारस्य ययि परसवर्णः' इति परसवर्णे कुर्वन्ति इति सिद्ध्यति ।

नच परसवर्णे कृते पुनः णत्वं कुतो नेति वाच्यम्. णत्वं प्रति परसवर्णस्यासिद्धत्वान्न णत्वमिति दिक् ।

९२) **यँल्लोकम्** (ई० ५१) यम्-लोकम् इत्यवस्थायाम् 'मोनुस्वारः' इत्यनेनानुस्वारे 'वा पदान्तस्य' इति परसवर्णेनानुसिके लकारे यँल्लोकम् इति सिद्धम् ।

९३) **किम् ह्नुते** (ई० ३६) किम् ह्नुते इत्यवस्थायाम् 'नपरे नः' इत्यनेन मस्य नत्वे किन् ह्नुते इति । नत्वाभावपक्षे 'मोनुस्वारः' इत्यनेन मस्यानुस्वारे 'किं ह्नुते' इति सिद्धम् ।

९४) **प्राङ् ख्षष्ठः** (ई० ४६) प्राङ् षष्ठः इत्यवस्थायाम् 'ङ्णोः कुक्टुक्शरि' इति कुकि 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्' इति कुकः ककारस्य द्वितीयाक्षरे खकारे प्राङ्ख् षष्ठः इति । पक्षे प्राङ्क्षष्ठः इति । कुगभावपक्षे प्राङ् षष्ठः इति सिद्धम् ।

९५) **सन्त्सः** (ई० ५७) सन् स, इत्यवस्थायाम् 'नश्च' इत्यनेन धुटि अनुबन्धलोपे जश्त्वेन दत्वे, चर्त्वेन तत्वे, सन्त्सः इति सिद्धम् ।

९६) **सञ्छम्भुः** (५७, ६०) सन् शम्भुः इत्यवस्थायाम् 'शि तुक्' इत्यनेन तुकि अनुबन्धलोपे 'शश्छोऽटि' इत्यनेन शस्य छत्वे, 'स्तोः श्चुना श्चुः' इत्यनेन तकारस्य श्चुत्वेन चकारे, पुनः 'स्तोः श्चुना श्चुः' इत्यनेन नकारस्य श्चुत्वेन ञकारे 'झरोझरि सवर्णे' इति चकारस्य लोपे 'सञ्छम्भुः' इति, चलोपाभावे सञ्च्छम्भुः इति, छत्वतुकोरभावे सञ्शम्भुः इति रूपाणि सिद्ध्यन्ति ।

९७) **तदाह मूले**—

ञछौ ञचछा ञचशा ञशाविति चतुष्टयम् ।

रूपाणामिह तुक्छत्वचलोपानां विकल्पनात् ॥ इति ।

(98) **सन्नच्युतः**—सन् अच्युतः इत्यवस्थायाम् 'ङमो ह्रस्वादचि ङमुण् नित्यम्' इत्यनेन नुडागमे अनुबन्धलोपे सन्नच्युतः इति सिद्धम् ।

(99) **संस्स्कर्ता** (ई० ५७) सम्-कर्ता इत्यवस्थायाम् 'सम्परिभ्यां करोतौ भूषणे' इत्यनेन सुटि अनुबन्धलोपे सम् स्कर्ता इति स्थिते 'समः सुटि' इत्यनेन समो मकारस्य रुत्वे अनुबन्धलोपे, सरु स्कर्ता इति जाते ततः 'अनुनासिकात्परोऽनुस्वारः' इत्यनेनानुस्वारे, 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे 'विसर्जनीयस्य सः' इति विसर्गस्य सत्वे प्राप्ते तं प्रबाध्य 'वा शरि' इति विकल्पेन बिसर्गस्य सत्वे प्राप्ते तं प्रबाध्य 'सम्पुंकानां सो वक्तव्यः' इति वार्तिकेन विसर्गस्य सत्वे संस्स्कर्ता इति, अनुनासिकपक्षे 'अत्रानुनासिकः पूर्वस्य तु वा' इत्यनेन पक्षेऽनुनासिके सँस्स्कर्ता इति द्विसकारकं रूपद्वयं सिद्धयति ।

(100) **अत्र** 'समो वा लोपमेके' इति भाष्यम् तेन मकारस्य वा लोपः । लोपस्यापि रुप्रकरणस्थत्वात् अनुस्वारे, अनुनासिके च कृते एकसकारकं सँस्कर्ता, संस्कर्ता इति रूपद्वयं सिद्ध्यति ।

उभयोः पक्षयोः 'अनचि चेति' सकारस्य द्वित्वे त्रिसकारकमपि रूपद्वयं सिद्धयति । अयोगवाहानां 'अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयानां अकारोपरि शर्षु च पाठस्य व्यवस्थापितत्वेन' अनुस्वारस्यापि अच्त्वात् 'अनचि चे' त्यस्य प्राप्तेः सम्भवात् ।

(101) **अनुनासिकवतां** त्रयाणां 'शरः खयः' एति ककारस्य द्वित्वे षड्रूपाणि । अनुस्वारवतामनुस्वारस्य 'शरः खयः' इति ककारस्यापि द्वित्वे द्वादशरूपाणि एषामष्टादशानां तकारस्य द्वित्वे 'अचो रहाभ्यां द्वे' इत्यनेन द्वित्वे 'यणो मयो द्वे वाच्ये' इत्यनेन च द्वित्वे एकतं द्वितं त्रितमिति सङ्कलनया (५४) चतुष्पञ्चाशत् 'अणोऽप्रगृह्यस्यानुनासिकः' इति तकारोत्तराकारस्यानुनासिकत्वे (५४) चतुष्पञ्चाशत् एवं सङ्कलनया १०८ अष्टोत्तरशतं रूपाणि सिद्धयन्ति ।

(102) **पुंस्कोकिलः** (ई० ५५) पुम् कोकिलः इत्यवस्थायाम् 'पुमः खय्यम्परे' इत्यनेन पुमो मकारस्य रुत्वे पक्षे 'अत्रानुनासिकः पूर्वस्य तु वा' इत्यनेन अनुनासिकत्वे, पक्षे 'अनुनासिकात् परोऽनुस्वारः' इत्यनेन अनुस्वारे रेफस्य विसर्गे पुंः कोकिलः इति जाते **व्युत्पत्तिपक्षे** 'इदुदुपधस्य चाप्रत्ययस्य' इति सूत्रे अप्रत्ययस्येति षत्वपर्युदा-

सत्वात् इदुदुपधस्येति षत्वाप्राप्तावपि 'कुप्वो ᳲक ᳲपौ च' इत्यनेन उपध्मानीये प्राप्ते तं प्रबाध्य, एवम् अव्युत्पत्तिपक्षे 'इदुदुपधस्य चाप्रत्ययस्ये'ति प्राप्तं षत्वं प्रबाध्य 'सम्पुंकानां सो वक्तव्यः' इत्यनेन विसर्गस्य सत्वे पुंस्कोकिलः इति रूपद्वयम् सिद्धम् ।

103) **पुंस्पुत्रः** (ई० ४८) पुम्-पुत्रः इत्यवस्थायाम् 'पुमः खय्यम् परे' इत्यनेन पुमो मकारस्य रुत्वे 'अत्रानुनासिकः पूर्वस्य तु वा' इत्यनेन पक्षे अनुनासिके 'खरवसानयोर्विसर्जनीयः' इत्यनन रेफस्य विसर्गे पुम् शब्दस्य **व्युत्पत्तिपक्षे** उपध्मानीये अव्यु-**त्पत्तिपक्षे** च 'इदुदुपधस्य चा प्रत्ययस्येति' षत्वे प्राप्ते तं प्रबाध्य 'सम्पुंकानां सो वक्तव्यः' इति वार्तिकेन सत्वे पुंस्पुत्रः इति । अनुस्वारपक्षे 'अनुनासिकात्परोऽनुस्वारः' इति अनुस्वारे शेषं पूर्ववत् । 'पुंस्पुत्रः' इति च सिद्धम् ।

(104) **पुंख्यानम्** (ई० ५६) चक्षिङ् धातोर्ल्युटि 'युवोरनाकौ' इत्यनेन अनादेशे 'चक्षिङः ख्याञ्' इति ख्याञादेशे ख्यानम् इति सिद्ध्यति । ततः पुम् ख्यानम् इत्यवस्थायान् 'मोनुस्वारः' इत्यनुस्वारे पुंख्यानम्, 'वा पदान्तस्य' इत्यनेन परसवर्णे पुङ्ख्यानम् इति च सिद्ध्यति ।

(105) **नच** 'पुमः खय्यम्परे' इत्यनेन पुमो मकारस्य रुत्वं कुतो नेति वाच्यम् । 'ख्याञादेशे न' इति वार्तिकेन निषेधात् ।

(105) **चक्रिँस्त्रायस्व** (ई० ४१) चक्रिन् त्रायस्व इत्यवस्थायां 'नश्छव्यप्रशान्' इत्यनेन नस्य रुत्वे अनुबन्धलोपे 'अत्रानुसिकः पूर्वस्य तु वा' इत्यनेन पक्षे अनुनासिके 'खरवसानयोर्विसर्जनीयः' इत्यनेन रेफस्य विसर्गे 'विसर्जनीयस्य सः' इत्यनेन विसर्गस्य सत्वे चक्रिँस्त्रायस्व इति, अनुस्वारपक्षे 'अनुनासिकात् परोऽनुस्वारः' इति अनुस्वारे शेषं पूर्ववत् चक्रिंस्त्रायस्व इति रूपं सिद्धम् ।

(106) **नॄँ न् पाहि** (ई० ४५) नॄन्-पाहि इत्यवस्थायाम् 'नॄन् पे' इत्यनेन नकारस्य रुत्वे अनुबन्धलोपे 'अत्रानुनासिकः पूर्वस्य तु वा' इत्यनेन पक्षे अनुनासिके 'खरवसानयोर्विसर्जनीयः' इत्यनेन रेफस्य विसर्गे 'विसर्जनीयस्य सः' इत्यनेन सत्वे तं प्रबाध्य 'कुप्वोᳲक ᳲपौ च' इत्यनेन उपध्मानीये कृते नॄँᳲपाहि, इति अनुनासिकाभावपक्षे 'अनुनासिकात् परोनुस्वारः' इति अनुस्वारे नॄंᳲपाहि, इति, उपध्मानीयाभावपक्षे विसर्गे नॄः पाहि. नॄं पाहि इति रुत्वाभावपक्षे नॄन् पाहि इति,

पञ्च रूपाणि सिद्ध्यन्ति ।

(107) **वासः क्षौमम्** इत्यत्र 'विसर्जनीयस्य सः, शर्परे विसर्जनीयः कुप्वो ≍क ≍पौ च, इत्येतेषां प्राप्तौ 'येन नाप्राप्तौ यो विधिरारम्यते स तस्य बाधको भवतीति' न्यायेन जिह्वामूलीयेन सत्वस्य बाधेऽपि परत्वात् 'शर्परे विसर्जनीयः' इति विसर्ग एव।

(108) **कांस्कान्** (ई० ५६) कान् कान् इत्यवस्थायाम् 'तस्य परमाम्रेडितम्' इत्यनेन द्वितीयस्य कान् शब्दस्याम्रेडितसंज्ञायाम् 'कानाम्रेडिते' इत्यनेन आम्रेडिते परे पूर्वस्य 'कान्' इत्यत्र नकारस्य रुत्वे अनुबन्धलोपे 'अत्रानुनासिकः पूर्वस्य तु वा' इत्यनेनानुनासिकत्वे 'खरवसानयोर्विसर्जनीयः' इत्यनेन विसर्गे 'सम्पुंकानां सो वक्तव्य' इत्यनेन विसर्गस्य सत्वे काँस्कान् इति पक्षे 'अनुनासिकात् परोऽनुस्वारः' इत्यनेन अनुस्वारे कांस्कान् इति च सिद्धम् ।

(109) **कौतस्कुतः** (ई० ५६) कुतः कुतः आगत इत्यर्थे 'तत आगत' इत्यणि आदिवृद्धौ कौतः कुतः इत्यवस्थायाम् 'कुप्वो≍क ≍पौ च' इत्यनेन जिह्वामूलीये प्राप्ते तं प्रबाध्य, 'कस्कादिषु च' इत्यनेन विसर्गस्य सत्वे कौतस्कुतः इति सिद्धम् ।

(110) **धनुष्कपालम्** (ई० ४०) धनुः कपालम् इत्यवस्थायाम् 'इसुसोः सामर्थ्ये' इति षत्वविकल्पे प्राप्ते तं प्रबाध्य 'नित्यं समासेऽनुत्तरपदस्थस्येति' नित्यं षत्वे धनुष्कपालमिति सिद्धम् ।

(111) **शिवच्छाया** (ई० ५२) शिव छाया इति स्थिते 'छे च' इति तुकि शिव त् छाया इत्यस्थायाम् 'स्तोः श्चुना श्चुः' इति प्राप्तस्य श्चुत्वस्यासिद्धित्वात् झलां जशोन्ते' इति जश्त्वेन तकारस्य दकारे 'खरि चेति' प्राप्तस्य चर्त्वस्यासिद्धत्वात् पुनः दस्य श्चुत्वेन जकारे ततः 'खरि च' इति चर्त्वेन जकारस्य चकारे शिवच्छाया इति सिद्धम् । पुनः 'चोः कुः' इति कुत्वं तु न भवति श्चुत्वस्यासिद्धत्वात् ।

(112) **आच्छादयति** (ई० ५३) आ छादयति इति स्थिते 'पदान्ताद्वा' इति तुकि श्चुत्वस्यासिद्धत्वात् जश्त्वेन दकारे ततः चर्त्वस्यासिद्धत्वात् दस्य श्चुत्वेन जकारे ततः 'खरि च' इत्यनेन चर्त्वेन चकारे आच्छादयतीति सिद्धम् ।

(113) न च 'चोः कुः' इत्यनेन कुत्वं कुतो नेति वाच्यम्, कुत्वं प्रति श्चुत्वस्यासिद्धत्वात् कुत्वं न भवतीति दिक् ।

चेच्छिद्यते (ई० ५१) चे छिद्यते इत्यवस्थायाम् 'दीर्घात्' इत्यनेन तुकि दीर्घस्यायं तुक् न तु छस्य 'सेनासुराच्छाया' इति ज्ञापकात् अनुबन्धलोपे श्चुत्वस्यासि-

त्वात् जश्त्वेन तकारस्य दकारे ततः चर्त्वस्यासिद्धत्वात् श्चुत्वेन दकारस्य जकारे ततः 'खरि च' इत्यवेन चर्त्वे चेच्छिद्यते इति सिद्धम् ।

न च 'चोः कुः' इत्यनेन कुत्वं कुतो नेति वाच्यम् । कुत्वं प्रति श्चुत्वस्यासिद्धत्वात् कुत्वं न भवति ।

कस्कः (ई० ५०) कः कः इत्यवस्थायाम् 'कस्कादिषु' च इत्यनेन सत्वे कस्कः इति सिद्धम् ।

स्वच्छाया (ई० ४१) स्व-छाया इत्यवस्थायाम् 'छे च' इत्यनेन तुकि अनुबन्धलोपे स्वत् छाया इति जाते 'झलां जशोन्ते' इति तकारस्य दकारे 'स्तोः श्चुना श्चुः' इति दस्य श्चुत्वेन जकारे 'खरि च' इति जस्य चर्त्वेन चकारे स्वच्छाया इति ।

लक्ष्मीच्छाया (ई० ५०) लक्ष्मीच्छाया इत्यवस्थायाम् 'पदान्ताद्वा' इति तुकि अनुबन्धलोपे लक्ष्मी त् छाया इति स्थिते 'झलां जशोऽन्ते' इति तकारस्य जश्त्वेन दकारे 'स्तोः श्चुना श्चुः' इति दस्य श्चुत्वेन जकारे 'खरि च' इति जस्य चर्त्वेन चकारे लक्ष्मीच्छाया इति सिद्धम् । तुगभावे लक्ष्मीछाया इति सिध्यति ।

इति हल्सन्धिः ।

अथ विसर्गसन्धिः

कः त्सरुः इत्यत्र 'विसर्जनीयस्य सः' इति सत्वे प्राप्ते तं प्रबाध्य 'शर्परे विसर्जनीयः' इत्यनेन विसर्जनीये कः त्सरुः इति सिद्धम् ।

हरिः शेते—(ई० ३६) हरिः शेते इति स्थिते 'विसर्जनीयस्य सः' इति सत्वे प्राप्ते तं प्रबाध्य 'वा शरि' इत्यनेन विसर्गस्य विकल्पेन विसर्गे हरिः शेते इति । पक्षे सत्वे 'स्तोः श्चुना श्चुः' इत्यनेन श्चुत्वे हरिश्शेते इति सिद्धम् ।

रामस्थाता—(ई० ५०) रामः स्थाता इत्यवस्थायाम् 'विसर्जनीयस्य सः' इत्येनेन सत्वे प्राप्ते तं प्रबाध्य 'वा शरि' इत्येनेन विसर्गस्य विकल्पेन विसर्गे पक्षे 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' इत्यनेन विसर्गलोपे रामस्थाता, विसर्गपक्षे रामः स्थाता सत्वपक्षे रामस्स्थाता इति त्रीणि रूपाणि सिद्ध्यन्ति ।

हरिः स्फुरति—(ई० ५७) हरिः स्फुरति इत्यवस्थायाम् सत्वं पाक्षिकं विसर्गं च प्रबाध्य 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' इत्यनेन विसर्गलोपे हरि स्फुरति इति, पक्षे 'वा शरि' इति विसर्गे हरिः स्फुरति इति । पक्षे विसर्जनीयस्य सः' इति

सत्वे हरिस्स्फुरति इति रूपत्रयं सिद्ध्यति ।

(123) **पयस्पाशम्**—(ई० ५१) पयः पाशम् इत्यवस्थायाम् 'सोऽपदादौ' इत्यनेन विसर्गस्य सत्वे पयस्पाशम् इति सिद्धम् ।

(124) **सर्पिष्पाशम्**—(ई० ४५) सर्पिः पाशम् इत्यवस्थायाम् 'सोऽपदादौ इति विसर्गस्य सत्वे प्राप्ते तं प्रबाध्य 'इणः षः' इत्यनेन विसर्गस्य षत्वे सर्पिष्पाशम् इति सिद्धम् ।

(125) **सर्पिष्कल्पम्**—(ई० ५०) सर्पिः कल्पम् इत्यवस्थायाम् 'पाशकल्पककाम्येष्विति वाच्यम्' इत्यनेन सत्वे प्राप्ते तं प्रबाध्य 'इणः षः' इत्यनेन विसर्गस्य षत्वे सर्पिष्कल्पम् इति सिद्धम् ।

(126) **सर्पिष्कम्**—(ई० ५५) सर्पिः कम् इत्यवस्थायाम् 'पाशकल्पककाम्येष्विति वाच्यम्' इति वार्तिकसहकारेण 'सोऽपदादौ' इत्यनेन प्राप्तं सत्वं प्रबाध्य 'इणः षः' इत्यनेन षत्वे सर्पिष्कम् इति सिद्धम् ।

(127) **गीः काम्यति**—(ई० ५५) गॄधातोः क्विपि अनुबन्धलोपे इत्वे रपरत्वे सोर्लोपे रेफस्य विसर्गे दीर्घे गीः इति सिद्ध्यति । ततः गीः काम्यति इत्यवस्थायाम् 'सोऽपदादौ' इति सत्वे प्राप्ते 'काम्ये रोरेवेति वाच्यम्' इति वार्तिकेन रोरेव विसर्गस्य सत्वविधानात् न सत्वम् । तेनः गीः काम्यति इति सिद्धयति ।

(128) **सर्पिष्काम्यति**—(ई० ४८) सर्पिः काम्यति इति स्थिते 'पाशकल्पककाम्येष्विति वाच्यमि'ति वार्तिकसहकारेण 'सोऽपदादौ' इत्यनेन विसर्गस्य सत्वे प्राप्ते तं प्रबाध्य 'इणः षः' इत्यनेन विसर्गस्य षत्वे सर्पिष्काम्यति इति सिद्धम् ।

(129) **नमस्करोति**—(ई० ५७) नमः करोति इत्यवस्थायाम् 'साक्षात्प्रभृतीनि च' इति कृञो योगे विकल्पेन गतिसंज्ञायाम् 'नमस्पुरसोर्गत्योः' इति विसर्गस्य सत्वे नमस्करोति इति सिद्धम् । गतिसंज्ञाभावे नमः करोति इत्यपि सिद्ध्यति ।

(130) **आविष्कृतम्**—(ई० ५३) आविः कृतम् इत्यवस्थायाम् 'इदुदुपधस्य चाप्रत्ययस्य' इत्यनेन विसर्गस्य षत्वे आविष्कृतमिति सिद्धम् ।

(131) **अग्निःकरोति**—ननु 'इदुदुपधस्य चाप्रत्ययस्य' इत्यत्र अप्रत्ययग्रहणाभावेऽपि सकलेष्टसिद्धौ अप्रत्ययग्रहणं किमर्थमिति चेन्न; अग्निः करोति इत्यत्र प्रत्ययसम्बन्धिविसर्गस्य षत्वापत्तिः स्याद् अतः अप्रत्ययग्रहणं कर्तव्यम् । न च विसर्गे प्रत्ययत्वं स्थानिवद्भावेन लब्धुं शक्यते तच्च न सम्भवति 'स्थानिवत्' सूत्रदृष्टया विसर्गवि-

धायकस्य त्रिपादीस्थत्वेन असिद्धतया पदान्तत्वाभावात् प्रत्ययत्वाभावाच्च न षत्वापत्तिः अतः अप्रत्ययग्रहणं व्यर्थमिति वाच्यम् । अप्रत्ययग्रहणसामर्थ्यात् 'वतिघटितातिदेशानां त्रिपाद्यामपि प्रवृत्तिरि' ति ज्ञापनेन स्थानिवत्त्वप्रवृत्या प्रत्ययत्वस्य सुलभत्वेन अप्रत्ययग्रहणस्यावश्यकत्वात् ।

(132) **मातुःकृपा**—(ई० ५४) ननु 'इदुदुपधस्य चाप्रत्ययस्य' इत्यनेन मातुः कृपा इत्यत्र विसर्गस्य षत्वं कुतो नेति चेन्न; कस्कादिगणे भ्रातुष्पुत्रशब्दस्य पाठबलाद् इदं कल्प्यते यत् 'एकादेशनिमित्तकस्य विसर्गस्य षत्वं न भवति' । नच 'ऋत उद्' इत्यनेन कृते एकादेशे रपरत्वे च मातुरित्यत्र रेफस्यैव एकादेशनिमित्तकत्वं नतु विसर्गस्येति कथं षत्वनिषेध इति वाच्यम् । एकादेशनिमित्तनिमित्तकस्य न षत्वमिति कथनेनादोषात् ।

(133) **चतुष्कपालः**—(ई० ५३) ननु 'सहचरितासहचरितयोर्मध्ये सहचरितस्यैव ग्रहणमि'ति परिभाषया सुजन्तद्वित्रिशब्दसाहचर्यात् सुजन्तस्यैव चतुःशब्दस्य ग्रहणात् चवतुष्कपालः इत्यत्र चतुःशब्दस्य सुजन्तत्वाभावेन षत्वाभावात् सूत्रे कृत्वोर्थग्रहणं व्यर्थमिति चेन्न । कृत्वोर्थग्रहणं व्यर्थं सज्ज्ञापकं भवति यत् सहचरितपरिभाषा अनित्या इति । एवञ्च सुजन्तातिरिक्तस्यापि चतुःशब्दस्य वैकल्पिकषत्वापत्तिवारणाय कृत्वोर्थग्रहणस्यावश्यकत्वात् । तेन 'दीधीवेवीटाम्' इत्यत्र दीधीङ् धातुसाहचर्यात् न इटः धातोर्ग्रहणं किन्तु आगमस्यैवेति दिक् ।

(134) **द्विष्करोतिः**—(ई० ५७) द्विः करोति इत्यवस्थायाम् 'द्विस्त्रिश्चतुरिति कृत्वोर्थे' इति विसर्गस्य षत्वे द्विष्करोति सिद्धम् । षत्वाभावे द्विः करोति इति ।

135 **कस्कादिषु सर्पिष्कुण्डिका**—ननु 'नित्यं समासेऽनुत्तरपदस्थस्य' इत्यनेन सर्पिष्कुण्डिका इत्यत्र षत्वसिद्धौ कस्कादिगणे सर्पिष्कुण्डिकाशब्दस्य पाठो व्यर्थ इति चेन्न, कस्कादिषु सर्पिष्कुण्डिका शब्दोऽसमासे व्यपेक्षाविरहेऽपि षत्वार्थो, व्यपेक्षायां नित्यार्थश्च । तेन आनय, सर्पिष्कुण्डिका तिष्ठतु इत्यत्र व्यपेक्षायामपि षत्वं सिद्ध्यति ।

136 **धनुष्कपालम्**—(ई० ५६) धनुः कपालम् इत्यवस्थायाम् 'इसुसोः सामर्थ्ये' इति षत्वविकल्पे प्राप्ते तं प्रबाध्य 'नित्यं समासेऽनुत्तरपदस्थस्य' इत्यनेन षत्वे धनुष्कपालम् इति सिद्धम् ।

138 **परमसर्पिःकुण्डिका**—(ई० ४७) ननु 'नित्यं समासेऽनुत्तरपदस्थस्य' इत्यत्र अनुत्तरपदस्थस्येति ग्रहणाभावेऽपि सकलेष्टसिद्धौ अनुत्तरपदग्रहणं व्यर्थमिति चेन्न ।

अनुत्तरपदस्थस्येत्यस्याभावे परमञ्चादः सर्पिः परमसर्पिः तस्य कुण्डिका परमसर्पिः-कुण्डिका इत्यत्र विसर्गस्य उत्तरपदस्थत्वेपि नित्यं षत्वं स्यात् कृते अनुत्तरपदस्थ-स्येति ग्रहणे तु विसर्गस्य उत्तरपदस्थत्वेन न षत्वमिति दिक् ।

(139) **अयस्कुम्भः**—(ई० ३४) अयः कुम्भः इत्यवस्थायाम् 'अतः कृकमिकं' सकुम्भ-पात्रकुशाकर्णीष्वनव्ययस्य' इत्यनेन विसर्गस्य सत्वे अयस्कुम्भः इति सिद्धम् ।

(140) **स्वः कामः**—(ई० ४४) ननु 'अतः कृकमिकं'-सइत्यादि सूत्रे अनव्ययस्येति पदाभावेऽपि सकलेष्टसिद्धौ अनव्ययग्रहणं किमर्थम् इति चेत् शृणु अनव्ययग्रहणाभावे स्वः कामः इत्यत्र अव्ययविसर्गस्यापि सत्वं स्यात् अतः अनव्ययस्येति ग्रहणं कर्तव्यम् इति दिक् ।

इति विसर्गसन्धिः ।

अथ स्वादिसन्धिः

(141) **शिवोऽर्च्यः**—(ई० ५२) शिवशब्दात् 'स्वौजसमौट्'-इत्यादिना सुप्रत्यये शिवस् अर्च्यः इति स्थिते जश्त्वं प्रबाध्य 'ससजुषोरुः' इति रुत्वे 'अतो रोरप्लुतादप्लुते' इति रोः उत्वे 'प्रथमयोः पूर्वसवर्णः' इत्यनेन दीर्घे प्राप्ते 'नादिचि' इति निषेधे 'आद्गुण' इति गुणे 'एङः पदान्तादति' इति पूर्वरूपे 'शिवोऽर्च्यः' इति सिद्धम् ।

(142) **न च**—उत्वं प्रति त्रैपादिकत्वेन रुत्वस्यासिद्धत्वात् कथमुत्वमिति वाच्यम्; उत्वं प्रति रुत्वस्यासिद्धत्वं न भवति रुत्वमनूद्य उत्वविधेः सामर्थ्यात् ।

(143) **देवा इह**—(ई० ३३) देवास् इह इत्यवस्थायाम् 'ससजुषोरुः' इति रुत्वे 'भोभगोअघोअपूर्वस्य योऽशि' इति रोर्यादेशे 'लोपः शाकल्यस्य' इति यलोपे देवा इह इति । यलोपाभावे देवायिह इति रूपे सिद्ध्यतः ।

(144) **न च**—यलोपे कृते 'आदगुणः' इत्यनेन गुणः कुतो न भवतीति वाच्यम् 'पूर्वत्रासिद्धम्' इत्यनेन लोपस्यासिद्धत्वात् गुणाभावेन रूपसिद्धेः ।

(145) **भो देवाः**—(ई० ३४) भोस् देवाः, इत्यवस्थायाम् 'ससजुषोरुः' इति रुत्वे 'भोभगोअघोअपूर्वस्य योऽशि' इत्यनेन यत्वे 'हलि सर्वेषाम्' इति यलोपे भो देवाः इति सिद्धम् ।

(146) **स उ एकाग्निः**—(ई० ५६) सस् उ एकाग्निः इत्यवस्थायाम् 'ससजुषोरुः' इति रुत्वे 'भोभगोअघोअपूर्वस्य योऽशि' इत्यनेन यत्वे 'उञि च पदे' इत्यनेन यलोपे स उ एकाग्निः इति सिद्धम् ।

(1) **एहि सुस्रोत३अत्र स्नाहि**—ननु 'अतो रोरप्लुतादप्लुते' इत्यस्मिन् सूत्रे अप्लुतात् पदाभावेऽपि सकलेष्टसिद्धौ अप्लुताद् ग्रहणं किमर्थमिति चेन्न; एहि सुस्रोत३अत्र स्नाहि इत्यत्र एहि सुस्रोतस्३अत्र स्नाहि इत्यवस्थायाम् रुत्वे उत्वे च कृतेऽनिष्ट-मापद्येत। न च अतः इति तपरकरणसामर्थ्यात् प्लुते नास्य प्रवृत्तिरिति वाच्यम्, प्लुतस्यासिद्धत्वेन अतः परत्वात् सूत्रप्राप्तौ बाधकाभावात्। न च अप्लुतादिति विशेषणदानेऽपि प्लुतस्यासिद्धत्वादतः परत्वेन कथं नोत्वमिति वाच्यम्, अप्लुतग्रहण-सामर्थ्येन प्लुतस्यासिद्धत्वं न भवति इति कल्पनेनादोषात्। न च तपरकरणसामर्थ्या-देव प्लुतस्यासिद्धत्वाभावः कथं न कल्प्यते इति वाच्यम्। दीर्घनिवृत्त्या चरितार्थ-त्वात्। अतः अत्र उत्ववारणाय अप्लुतग्रहणं कर्तव्यमेवेति दिक्।

(2) **अशि किं देवाः सन्ति**—(ई० ४६) ननु विसर्गयत्वयोः प्राप्तौ विसर्गदृष्ट्या यत्वस्यासिद्धत्वेन विसर्ग एव स्यादिति 'भोभगो अघो अपूर्वस्य योऽशि' इति सूत्रे अशिग्रहणं व्यर्थमिति चेन्न; देवाः सन्ति इत्यत्र रोर्यत्वापत्तिः स्यात्। न च यत्वस्या सिद्धत्वात् विसर्ग एव लभ्यत इति वाच्यम्, यत्वस्य विसर्गदृष्ट्यासिद्धत्वेन तल्लाभेऽपि तस्य स्थानिवत्त्वेन सत्त्वबुद्ध्या यत्वप्रवृत्तौ दोषस्य दुर्वारत्वात्। न च 'अनल्विधौ' इति निषेधात् न स्थानिवत्त्वमिति वाच्यम्, अस्य अल्विधित्वाभावेनादोषात्। अल्-विधिस्तु तत्र भवति यत्र अलि एव विधीयते अत्र तु 'रोः' इति रेफोकारसमुदायस्य स्थानित्वेन अल्विधित्वाभावेनादोषात्।

(3) **भो लक्ष्मि**—(ई० ४१) भोस् लक्ष्मि इत्यवस्थायाम् सत्वे 'भोभगोअघोअपूर्व-स्य योऽशि' इति यत्वे 'हलि सर्वेषाम्' इति यलोपे च कृते भो लक्ष्मि इति सिद्धम्।

(4) **अहरहः** (ई० ५४) अहन् अहः इत्यवस्थायाम् 'रोऽसुपि' इत्यनेन पूर्वनकारस्य रेफादेशे कृते अहरहः इति सिद्धम्।

(5) **अहर्गणः**—(ई० ५४) अहन् गणः इत्यवस्थायाम् 'रोऽसुपि' इति नस्य रेफादेशे अहर्गणः इति सिद्धम्।

(6) **भो अच्युत**—(ई० ५७) भोस् अच्युत इत्यवस्थायाम् 'ससजुषो रुः' इति सस्य रुत्वे 'भोभगोअघोअपूर्वस्य योऽशि' इति रुत्वस्य यत्वे 'व्योर्लघुप्रयत्नतरः शाकटा-यनस्य' इत्यनेन यकारस्य स्थाने विभाषया लघूच्चारणे यादेशे भो यच्युत इति सिद्धम्। पक्षे भो य् अच्युत इति दशायां अलघुप्रयत्नस्य यकारस्य 'ओतो गार्ग्यस्य' इत्यनेन लोपे भो अच्युत इति सिद्धम्।

(7) **अहोरूपम्**—(ई० ३८) अहन् रूपम् इत्यवस्थायाम् 'रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्' इति वार्तिकेन नकारस्य रुत्वे 'हशि च' इत्युत्वे 'आद्गुण' इति गुणे अहोरूपम् इति सिद्धम् ।

(8) **अहोरात्रः**—(ई० ५१) अहन् रात्रः इत्यवस्थायाम् 'रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्' इति नस्य रुत्वे 'हशि च' इति उत्वे 'आद्गुणः' इति गुणे 'रात्राह्नाहाः पुंसि' इति पुंस्त्वे अहोरात्रः इति सिद्धम् । नचात्र रात्रिशब्दपरकत्वाभावात् कथं रुत्वमिति वाच्यम् 'एकदेशविकृतमनन्यवत्' इति परिभाषया इष्टसिद्धेः ।

(9) **अहर्पतिः**—(ई० ५२) अहन् पतिः इत्यवस्थायाम् 'अहन्' इत्यनेन नकारस्य रुत्वे 'अहरादीनां पत्यादिषु वा रेफः' इत्यनेन रेफस्य विसर्गं प्रबाध्य पाक्षिके रेफे अहर्पतिः इति सिद्धम् । रत्वाभावे विसर्गे तस्य 'कुप्वो ᳲक ᳲपौ च' इत्यनेन उपध्मानीये पक्षे विसर्गे च कृते अहᳲपतिः, अहःपतिः इति त्रीणि रूपाणि सिद्ध्यन्ति ।

(10) **गीर्पतिः**—(ई० ५६) गीः पतिः इत्यवस्थायाम् 'अहरादीनां पत्यादिषु वा रेफः' इत्यनेन विसर्गं प्रबाध्य रेफे गीर्पतिः इति । पक्षे गीः पतिरिति । पक्षे उपध्मानीये गीᳲपतिरिति त्रीणि रूपाणि सिद्ध्यन्ति ।

(11) **धूर्पतिः**—(ई० ४८) धुर् पतिः इत्यवस्थायाम् 'अहरादीनां पत्यादिषु वा रेफः' इत्यनेन विसर्गं प्रबाध्य रेफे 'र्वोरुपधाया दीर्घ इकः' इत्यनेन दीर्घे धूर्पतिरिति सिद्धम् । रत्वाभावपक्षे विसर्गस्य उपध्मानीये धूᳲपतिरिति सिद्धयति । पक्षे विसर्गे धूः पतिरिति च सिद्धयति ।

(12) **असुपि किं अहोभ्याम्**—ननु 'रोऽसुपि' इत्यत्र असुपि ग्रहणाभावे अस्य सुप्यपि प्रवृत्तौ अहन् सूत्रस्य वैयर्थ्यापत्त्या सामर्थ्यात् अस्य सुप्यप्रवृत्तिकल्पनेनैवेष्टसिद्धौ असुपिग्रहणं व्यर्थमिति चेन्न; असुपि ग्रहणाभावे अहोभ्याम् इत्यत्र नस्य रेफादेशे तस्य नलोपदृष्ट्यासिद्धत्वेन प्राप्तनलोपव्यावृत्त्यर्थमावृत्तेरावश्यकत्वेन तदर्थमहन्सूत्रस्यावश्यकत्वादनेनोक्तकल्पनायाः कर्तुमशक्यत्वेन 'रोऽसुपि' इत्यस्य सुप्यपि प्रवृत्तौ उक्तप्रयोगसिद्धयापत्तिरित्यावश्यकमेव सूत्रे असुपीत्यस्य ग्रहणम् इति दिक् ।

(13) **ढ्रलोपे पूर्वस्य दीर्घोऽणः**—(ई० ४७) अयमर्थः-ढश्च रेफश्च ढ्रौ तौ लोपयति इति ढ्रलोपः तस्मिन् ढ्रलोपे ढलोपनिमित्ते ढकारे रेफलोपनिमित्ते रेफे च परतः पूर्वस्याणो दीर्घः स्याद् इति फलितोर्थः । लीढः, पुना रमते इत्यादीन्युदाहरणानि ।

(14) **पुना रमते**—(ई० ३९) पुनर् रमते इत्यवस्थायाम् 'रोरि' इत्यनेन रेफस्य लोपे

'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति नकारोत्तराकारस्य दीर्घे पुना रमते इति सिद्धम् ।

हरी रम्यः (ई०) हरिर् रम्यः इत्यवस्थायाम् 'रोरि' इत्यनेन रेफस्य लोपे, 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घे हरी रम्यः इति सिद्धम् ।

शम्भू राजते—शभुर् राजते इत्यवस्थायाम् 'रोरि' इत्यनेन रेफस्य लोपे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति शम्भू राजते इति सिद्धम् ।

अणः किं तृढः—(ई० ३८) ननु 'ढ्रलोपे पूर्वस्य दीर्घोऽण;' इति सूत्रे दीर्घ-पदश्रवणात् 'अचः' इति परिभाषोपस्थितौ अच एव दीर्घो भविष्यति व्यर्थमण् ग्रहण-मिति चेन्न; तृहू वृहू धातुभ्यां क्त प्रत्यये उदित्वेन वेट्कत्वात् 'यस्य विभाषा' इति निष्ठायाम् इण्निषेधे ढत्वे धत्वे ष्टुत्वे च कृते 'ढो ढे लोपः' इत्यनेन ढलोपे तृढः वृढः इत्यादीनां सिद्धिर्भवति । यदि अत्र अण् ग्रहणं न स्यात् तदा तृढ इत्यत्र ढलोपनि-मित्तभूतस्य ढकारस्य पूर्ववर्तिनः अचः ऋकारस्य दीर्घेऽनिष्टं रूप प्रसज्येत तद्वारणाय अण्ग्रहणस्यावश्यकत्वात् इति दिक् ।

पूर्वग्रहणमनुत्तरपदेऽपि पूर्वमात्रस्य दीर्घार्थम्, अजर्घाः (ई० ४९) ननु ढ्रलोपे इत्यत्र सप्तमीश्रिवणात् 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषाया उपस्थितौ पूर्वस्येत्यर्थलाभे पुनः अत्र सूत्रे पूर्वग्रहणं व्यर्थमिति चेन्न; पूर्वंग्रहणासत्वे 'अलुगुत्तरपदे' इत्यतः उत्तरपदोपस्थितौ ढ्रलोपनिमित्तयोरुत्तरपदस्थढरेफयोः परयोपूर्वस्याणो दीर्घ इत्यर्थे अजर्घर लीढ इत्यादौ दीर्घो न स्यात् उत्तरपदस्थढरेफपरकत्वाभावात् । उत्तरपदशब्दस्य समासचरमावयवे रूढत्वात् । अतः पूर्वग्रहणं कर्तव्यम् । कृते च पूर्वग्रहणे उत्तरपदाननुवृत्तौ समासे असंमासे सर्वत्रैव प्रवृत्तौ अजर्घाः इत्यादौ दीर्घः सिद्धयति इति दिक् ।

अजर्घाः इत्यस्य साधुत्वं तु गृधु धातोः यङि तस्य लोपे द्वित्वे, अभ्याससंज्ञायाम् 'हलादिः शेषे' अभ्यासस्य रुकि, अनुबन्धलोपे, 'कुहोश्चुः' जश्त्वे लङि सिपि, शपि तस्य लुकि, लघूपधगुणे, रपरत्वे, 'इतश्चे'तीकारलोपे, हल्ङ्याादिना सलोपे जर्गर्ध् इति स्थिते भष्भावेन गकारस्य घकारे जश्त्वेन दकारे 'दश्चे'ति रुत्वे, अडागमे अज-र्घर्र् इति स्थिते 'रोरी'ति रेफस्य लोपे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घे रेफस्य विसर्गे अजर्घाः इति सिध्यति ।

मनोरथः (ई० ५७) मनस् रथः इत्यवस्थायाम् 'ससजुषोरुः' इति सस्य रुत्वे 'हशि च' इति रोः उत्वे प्राप्ते 'रोरी' ति रेफस्य लोपे च प्राप्ते 'विप्रतिषेधे

परं कार्यम्' इत्यनेन परत्वात् 'रोरी' त्यनेन रेफकस्य लोपे प्राप्ते 'पूर्वत्रासिद्धम्' इत्यनेन सपादीस्थं 'हशि च' इति सूत्रं प्रति त्रिपादिनः 'रोरी' त्यस्यासिद्धत्वे 'हशि चे' त्यनेन उत्वम् ततः 'आद्गुण' इति गुणे मनोरथः इति सिद्धम् ।

(21) **एष विष्णुः** (ई० ३३) एषस् विष्णुः इत्यवस्थायाम् सत्वं प्रबाध्य 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि' इत्यनेन सुलोपे एष विष्णुरिति सिद्धम् ।

(22) **स शम्भुः** (ई० ३४) सस् शम्भुः इत्यवस्थायाम् रुत्वं प्रबाध्य 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि' इति सुलोपे स शम्भुः इति सिद्धम् ।

(23) **एषको रुद्रः** (ई० ३८) ननु 'एतत्तदोः सुलोपोऽकोरनञ्समास हलि' इति सूत्रे अकोः ग्रहणाभावेऽपि सकलेष्टसिद्धौ सूत्रे अकोः ग्रहणं किमर्थम् इति चेन्न; एषकस् रुद्रः इत्यत्रापि सुलोपे अनिष्टं रूपं स्यात् । कृते तु अकोः ग्रहणे अत्र सककारत्वात् न भवति सुलोपः । किन्तु 'ससजुषोरुः' इति रुत्वे 'हशिचे' त्युत्वे 'आद्गुण' इति गुणे एषको रुद्र इति सिद्धयति ।

(24) **सैष दाशरथी रामः** (ई० ५७) सस् एष दाशरथी रामः इत्यवस्थायाम् 'सोचि लोपे चेत् पादपूरणम्' इत्यनेन सुलोपे 'वृद्धिरेचि' इत्यनेन वृद्धौ सैष दाशरथी रामः इति सिद्धम् ।

(25) **न च** अनेन सुलोपाभावेऽपि सकारस्य रुत्वे 'भोभगो' इत्यादिना यत्वे यलोपे च कृते वृद्धौ सैष प्रयोगः सिद्धयति एव इति वाच्यम्, वृद्धिं प्रति सुलोपस्यासिद्धत्वास् स एष इति रूपं स्यात् तेन पादः न पूर्येत । अतः इदं सूत्रं कृतमिति दिक् ।

(26) **असः शिवः** (ई० ४४) ननु 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि' इति सूत्रे अनञ्समासग्रहणाभावेऽपि सकलेष्टसिद्धौ अनञ्समासग्रहणं किमर्थम् इति चेत् शृणु, अनञ्समासग्रहणाभावे असः शिवः इत्यत्रापि सोर्लोपे अस शिवः इत्यनिष्टं प्रसज्येत । यतः अत्र न सः इति असः एवं नञ्समासोऽस्ति ।

(27) **सेमामविड्ढिप्रभृतिम्** [ई० ५६] सस् इमामविड्ढि प्रभृतिम् इत्यवस्थायाम् 'सोचि लोपे चेत्पादपूरणम्' इत्यनेन सोर्लोपे 'आद्गुणः' इति गुणे उक्तं रूप सिद्धम् ।

(28) **सोहमाजन्मशुद्धानाम्** [ई० ५१] सस् अहम् इत्यस्थायाम लोपाभावे एव पादपूर्तेः सम्भवेन 'सोचि लोपे चेत् पादपूरणम्' इत्यनेन सोर्लोपाभावे किन्तु रुत्वे 'अतोरोरप्लुतादप्लुते' इत्यनेन उत्वे 'आद्गुणः' इति गुणे पूर्वरूपे च कृते सोऽहम इत्यादि सिध्यति ।

सोचि लोपे चेत् पादपूरणम्—सस् इत्यत्रोत्तरसकारस्य लोपः स्यादचि किन्तु स लोपः तदैव स्यात् यदा लोपे सत्येव छन्दःपादस्य पूर्तिश्चेत् । अतः यत्र लोपं विनैव पादपूर्तिः सम्भवति न तत्र लोप इति सूत्रार्थः ।

इति स्वादिसन्धिः

अथ अजन्तपुंल्लिगप्रकरणम्

अर्थवदधातुरप्रत्ययः प्रातिपदिकम्—अत्र अर्थवत् अधातुः अप्रत्ययः प्रातिपदिकमिति पदानि । तत्र न धातुः अधातुः, न प्रत्ययः अप्रत्ययः इति विग्रहः । प्रत्ययपदमावर्तते तेन च तदन्तविधिः । ततः धातुभिन्नं प्रत्ययभिन्नं प्रत्ययान्ततदादिभिन्नं अर्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञं स्याद् इत्यर्थः । धनं वनं इत्यत्र प्रतिवर्ण प्रातिपदकत्वं माभूदिति अर्थवत् पदम्, अहन् इत्यादौ नलोपवारणाय अधातुः पदम्, हरिषु इत्यत्र प्रत्ययपर्युदासात् सुपः न प्रातिपदिकत्वम् । तदन्तपर्यदासाच्च हरिषु इति समुदायस्य न प्रातिपदिकत्वम् ।

कृत्तद्धितसमासाश्च (ई० ३४) ननु पाचकः, औपगवः इति कृदन्ते तद्धिते च प्रत्यायन्तत्वेन निषेधात् पूर्वसूत्रेण न प्रातिपदिकत्वम् इति 'कृत्तद्धितसमासाश्चे'ति सूत्रे कृद्ग्रहणं तद्धितग्रहणं चावश्यकम् । राजपुरुष इत्यादौ समासे तु 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च ग्रहणम्' इति परिभाषया राजन् ङस् इति समुदायस्य, पुरुष सु इति समुदायस्य वा प्रत्ययान्तत्वेन प्रातिपदिकसंज्ञायाः निषेधकत्वेऽपि समुदायस्य प्रातिपदिकसंज्ञाया निषेधाभावेन पूर्वसूत्रेणैव प्रातिपदिकसंज्ञासिद्धौ अत्र सूत्रे समासग्रहणं व्यर्थमिति चेत् नियमार्थम् । **नियमाकारश्च** 'यत्र संघात पूर्वो भागः पदं तस्य चेत् भवति तर्हि समासस्यैव' । तेन राजपुरुषः इत्यत्र पूर्वेण प्रातिपदिकत्वासिद्धौ समासग्रहणम् ।

नच जन्मवान् इत्यत्र 'स्वादिष्वसर्वनामस्थाने' इत्यनेन पूर्वभागस्य पदत्वेन प्रातिपदिकत्वं न स्यादिति वाच्यम् । 'यत्र संघाते पूर्वो भागः पदम् उत्तरस्तु प्रत्ययो न तत्र चेद् भवति प्रातिपदिकसंज्ञा तर्हि समासस्यैव' इति नियमाकारस्वीकारेणादोषात् ।

ङ्याब्ग्रहणप्रयोजनम् (ई० ५३) ननु 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषया रमा, गौरी इत्यादौ ङ्याबन्तस्यापि प्रातिपदिकपदेन ग्रहणात् स्वादिसिद्धौ ङ्याब्ग्रहण किमर्थमिति चेन्न; ङ्याबन्तात्तद्धितोत्पत्तिर्यथा स्यात्

ङ्याब्भ्यां प्राङ् माभूदित्येवं नियमार्थं ङ्याब्ग्रहणम् । अन्यथा आर्यशब्दात् टापः प्रागन्तरङ्गत्वात् कनि ततष्टापि 'आर्य्यका' इत्यवस्थायाम् आत्स्थानिकाकाराभावात् 'उदीचामातः स्थाने यकपूर्वायाः' इत्यस्याप्राप्तौ प्रत्ययस्येति नित्यमित्वे आर्यिका इत्येकमेवं रूपं स्यात् । एवं लोहितशब्दात् ङीपः प्राग् अन्तरङ्गत्वात् कनि ततष्टापि तोपधत्वाभावेन 'वर्णादनुदात्तात्तोपधात्तो नः' इत्यस्याप्राप्तौ 'प्रत्ययस्थात् कात् पूर्वस्येदाप्सुपः' इत्यनेन नित्यमित्वे लोहितिकेत्येकमेव रूपं स्यात् । अतः ङ्याब्ग्रहण कर्तव्यम् । कृते च तद्ग्रहणे तत्सामर्थ्यात् पूर्वं टापि ततः कनि एवं ङीपि ततः कनि सति 'आर्यका, आर्यिका, लोहितका, लोहितिका' इति रूपद्वयं सिद्धयति ।

(4) **रामः**—(ई० ३१) रामशब्दात् प्रातिपदिकसंज्ञायाम् प्रथमाया एकवचने सुप्रत्यये अनुबन्धलोपे सस्य 'ससजुषोरुः' इति रुत्वे रेफस्य 'खरवसानयोर्विसर्जनीयः' इति विसर्गे रामः इति सिद्धम् ।

(5) **रामाः**—(ई० ५२) रामशब्दात् प्रातिपदिकसंज्ञायाम् जसि 'चुटू' इत्यनेन जकारस्येत्संज्ञायां लोपे च कृते 'अकः सवर्णे दीर्घ' इति दीर्घे प्राप्ते तं प्रबाध्य 'अतो गुणे' इति पररूपे प्राप्ते परत्वात् 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्ण दीर्घे सस्य रुत्वे विसर्गे रामाः इति सिद्धम् ।

नच राम अस् इत्यवस्थायाम् सकारस्य 'हलन्त्यमि' त्यनेन इत्संज्ञा कुतो नेति वाच्यम् 'न विभक्तौ तुस्मा' इत्यनेन निषेधात् । नच पूर्वसवर्णदीर्घमपि प्रबाध्य 'अतो गुणे' इत्यनेन पररूपं कुतो नेति वाच्यम्, 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति न्यायेनार्य सवर्णदीर्घस्यैवापवादः नतु पूर्वसवर्णदीर्घस्येति दिक् ।

(6) **सम्बुद्ध्याक्षिप्तस्येति**—(ई० ४८) ननु 'येन विना यदनुपपन्नं तत्तेनाक्षिप्यते' इति न्यायात् अङ्गं विना सम्बुध्यनुपपत्त्या अङ्गमाक्षिप्यते । तथा च 'येन यस्याक्षेपस्तस्य तत्रैवान्वयः' इति न्यायात् अङ्गस्य सम्बुद्धिविशेषणत्वम् एवं 'श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान्' इति न्यायेन एङ्ह्रस्वयोर्हल्विशेषणत्वमेव युक्तम् । तथाहि अङ्गात् परा या सम्बुद्धिः तदवयवो यो हल् लुप्यते स च हल् एङ्ह्रस्वाभ्यां परीभूतश्चेत् इत्यर्थः समुचितः । तर्हि कथं अङ्गस्य एङ् ह्रस्वाभ्यां विशेषणत्वमिति चेन्न; एवमर्थस्वीकारे हे कतरत् इत्यत्र कतरशब्दाददडि अनुबन्धलोपे हे कतरत् इत्यवस्थायाम् अनेन तकारस्य लोपे अनिष्टं रूपं स्यात् । अतः 'श्रुतानुमितयोः श्रुतसम्बन्धो

बलीयान्' इति न्यायं तिरस्कृत्य मूलोक्तार्थः स्वीकर्तव्यः तेन न तकारलोपः।

नच अङ्गात्परा या सम्बुद्धिस्तदवयवो यो हल् स च लुप्यते सा च सम्बुद्धिः एङ्ह्रस्वाभ्यां परीभूता चेत् इत्यर्थस्त्रीकारे अद् इति सम्बुद्धेः ह्रस्वात्परत्वाभावेन न दोष इति वाच्यम्, हे कुल इत्यत्र सोरमादेशे पूर्वरूपत्वे च कृते 'एकदेशविकृत-मनन्यवत्' इत्यनेन लान्तभागस्याङ्गत्वे परादिवद्भावेन सम्बुद्धित्वे च जाते ह्रस्वात् परायाः सम्बुद्धेरभावेन मकारलोपो न स्यात्। अतः अन्येनाक्षिप्तस्यान्यत्रान्वयः स्वीकार्य एव।

(७) रामान्—(ई० ३६) रामशब्दात् प्रातिपदिकसंज्ञायां द्वितीयाबहुवचने शसि 'लशक्वतद्धिते' इत्यनेन शकारस्येत्संज्ञायाम् लोपे च कृते राम अस् इत्यवस्थायां 'अकः सवर्णे दीर्घः' इति दीर्घं प्रबाध्य प्राप्तं 'अतो गुणे' इति पररूपं च प्रबाध्य 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे 'तस्माच्छसो नः पुंसि' इत्यनेन सकारस्य नकारे रामान् इति सिद्धम्।

नच रामान् इत्यत्र नकारस्य 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन णत्वं कुतो नेति वाच्यम् 'न पदान्तस्येति' निषेधात्।

(८) भवामि भविष्यामि.......तदादिग्रहणम् [ई० ५१] ननु 'यस्मात्प्रत्ययविधि-स्तदादि प्रत्ययेऽङ्गम्' इति सूत्रे तदादिग्रहणं न कर्तव्यमिति चेन्न; तदादि ग्रहणाभावे भवामि भविष्यामि इत्यादौ 'अतो दीर्घो यञि' इत्यनेन दीर्घो न स्यात् मिप् प्रत्य-यस्य भूधातोः विहितत्वात्। तदादिग्रणे कृते तु न दोषः। अतः मिप् प्रत्ययः यस्मात् भू इत्यस्मात् क्रियते तदादि शब्दस्वरूपं भव इति भविष्य इति ततः तयोः अङ्ग-संज्ञया दीर्घः सिद्ध्यति इति तदादिग्रहणं कृतम्।

तदाह मूले—भवामि भविष्यामि इत्यादौ विकरणविशिष्टस्याङ्गसंज्ञार्थं तदादि-ग्रहणम्।

(९) विधिः कि स्त्री इयती—(ई० ४७) ननु 'यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽ-ङ्गम्' इति सूत्रे विधिग्रहणाभावेऽपि यः प्रत्ययः यस्मात्परत्वेन श्रूयते तदादिशब्द-स्वरूपं तस्मिन् प्रत्यये परेऽङ्गसंज्ञं भवति इत्यर्थेनैवेष्टसिद्धे सूत्रे विधिग्रहणं व्यर्थमिति चेन्न, इदम्शब्दात् वतुपि वस्य घादेशे 'आयनेयनीयीयः फढखछघां प्रत्ययादीनाम्' इत्यनेन घस्य इयादेशे 'इदं किमोरीश्की' इत्यनेन इदमः ईशादेशे तस्य 'यस्येति च' इत्यनेन लोपे उगित्वान्ङीपि स्वादिकार्ये इयतीति सिद्ध्यति। ततः स्त्री इयती-

त्यवस्थायाम् इयतीत्यस्य केवलं प्रत्ययत्वेनानेन स्त्रीशब्दस्याङ्गत्वे 'स्त्रियाः' इत्यनेन इयङापत्तिरतो विधिग्रहणम् कर्त्तव्यम् । कृते च विधिग्रहणे इयतीत्यस्य स्त्रीशब्दात् विहितत्वाभावेन नाङ्गत्वमिति दिक् ।

प्रत्यये किम् (ई० ४७) ननु 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रे प्रत्यये इति पदाभावेऽपि सकलेष्टसिद्धौ प्रत्यये इति पदं व्यर्थमिति चेन्न, प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वाङ्गत्वं मा भूत् इत्येतदर्थं प्रत्यये इति पदम् कर्त्तव्यम् । प्रत्ययविशिष्टस्याङ्गत्वं यथा—वव्रश्च व्रश्च धातोः लिटि तिपि णलि द्वित्वेऽभ्याससंज्ञायां सम्प्रसारणे 'उरत्' इति अत्वे रपरत्वे 'हलादिः शेषः' इति, अभ्यासलोपे वव्रश्चेति सिद्धम् । अत्र प्रत्ययग्रहणाभावे उरदित्यत्राऽनुवृत्त्यभावेनात्वस्य परनिमित्तकत्वाभावेन 'अचः परस्मिन्' इत्यनेन स्थानिवत्त्वाभावात् 'न सम्प्रसारणे सम्प्रसारणम्' इत्यस्याप्राप्त्या वव्रश्चेत्यत्र पूर्ववकारस्य सम्प्रसारणत्वेऽनिष्टं रूपं प्रसज्येत । कृते तु प्रत्ययग्रहणे अत्वस्य परनिमित्तकत्वेन स्थानिवत्त्वात् सम्प्रसारणनिषेधेनेष्टसिद्धिः ।

ततोऽप्यधिकस्याङ्गत्वं यथा 'देवदत्त ओदनमपाक्षीत्' इत्यादौ देवदत्तशब्दोत्तरे सुपं निमित्तीकृत्य लुङ्पर्यन्तस्याङ्गत्वात् देवदत्तशब्दात्पूर्वमपि अडागमापत्तिः स्यात् ।

रामाय—(ई० ५७) रामशब्दात् प्रातिपदिकात् ङे विभक्तौ, 'ङेर्यः' इत्यनेन यादेशे 'स्थानिवादादेशोऽनल्विधौ' इत्यनेन स्थानिवत्त्वेन यादेशस्य सुप्त्वात् 'सुपि च' इत्यनेन दीर्घे रामाय इति सिद्धम् ।

न च 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्ये' ति परिभाषया यादेशनिमित्तभूतस्य ह्रस्वाकारस्य 'सुपि च' इत्यनेन दीर्घो भवितुं नार्हति उपजीव्यविरोधात् इति वाच्यम्, 'कष्टाय क्रमणे' इत्यादौ दीर्घदर्शनेन सन्निपातपरिभाषायाः अनित्यत्वज्ञापनेनात्राप्रवृत्तेः ।

रामेभ्यः (ई० ३०) रामशब्दात् प्रातिपदिकात् भ्यसि 'बहुवचने झल्येत्' इति एत्वे विसर्गे रामेभ्यः इति सिद्धम् ।

रामात् । रामशब्दात् प्रातिपदिकात् ङसि विभक्तौ अनुबन्धलोपे 'टाङसिङसामिनात्स्याः' इत्यनेन आत् आदेशे 'अकः सवर्णे दीर्घः' इति दीर्घे जश्त्वे 'वाऽवसाने' इत्यनेन विकल्पेन चर्त्वे रामात् । पक्षे रामाद् । 'अनचि चे' त्यनेन द्वित्वे रामात्त् रामाद्द् इति रूपचतुष्टयं सिद्ध्यति ।

रामस्य (ई० '५५) रामशब्दात् प्रातिपदिकात् ङसि 'टाङसिङसामिनात्स्याः' इति स्य रामस्य इति सिद्धम् ।

न च अत्र 'अनचि चे' ति सस्य द्वित्वे पूर्वसकारस्य चर्त्वेन तकारे रामत्य इति रूपं स्यादिति वाच्यम्, सकारस्य महाप्राणत्वेन तकारस्य चाल्पप्राणत्वेन प्रयत्नभेदात् सस्य न चर्त्वम् । अतएव घत्स्यति इत्यत्र 'सः स्यादार्धधातुके' इत्यादिना सस्य तादेश आरभ्यते । अतः रामस्येत्यत्र सकारस्य द्वित्वेऽपि चर्त्वेन स एव न तु तः आन्तरतम्यात् ।

रामाणाम् (ई० ५६) रामशब्दात् प्रातिपदिकात् आटि 'ह्रस्वनद्यापो नुट्' इत्यनेन नुटि अनुबन्धलोपे 'नामीति' दीर्घे 'अट्कुप्वाङ् नुम्व्यवायेऽपि' इति णत्वे रामाणामिति सिद्धम् ।

नच राम नाम् इत्यवस्थायाम् 'सुपि चेति' दीर्घेणैवेष्टसिद्धेः 'नामी' ति सूत्रकरणं व्यर्थमिति वाच्यम्, सन्निपातपारिभाषाविरोधात् । तथा च ह्रस्वान्तमुपजीव्य प्रवृत्तस्य नुटः ह्रस्वविघातकं 'सुपि च' इति दीर्घं प्रति निमित्तत्वं न स्यातु ।

नच नामीत्यस्यापि सन्निपातपरिभाषाविरोधादप्रवृत्तिरस्तु इति वाच्यम् । नामीति सूत्रं तु आरम्भसामर्थ्यात् परिभाषां वाधते अन्यथा सूत्रकरणमनर्थकं स्यात् ।

सर्वे (ई० ५२) सर्वशब्दात् प्रातिपदिकात् जसि 'सर्वादीनि सर्वनामानि' इत्यनेन सर्वनामसंज्ञायाम् 'जसः शी' इत्यनेन अनेकाल्त्वात् सर्वादेशे 'आद्गुण' इत्यनेन गुणे सर्वे इति सिद्धम् ।

नच अत्र अनेकाल्त्वात् सर्वादेश इति कथनमसङ्गतम् शित्वात् सर्वादेश इति कथनस्यैव युक्तत्वादिति वाच्यम्, सर्वादेशत्वात् प्राक् शस्येत्संज्ञाया एवाभावेन शित्वस्यालाभात् । नच 'अवर्णस्त्रसावनञः' इत्यदाविव 'नानुबन्धकृतमनेकाल्त्वमि' ति परिभाषया कथमनेकाल्त्वमिति वाच्यम् 'इत्संज्ञावत्त्वमनुवन्धत्वम्' इति सिद्धान्तेन सर्वादेशत्वात् प्राग् इत्संज्ञाया अभावेन अनुबन्धत्वाभावात् परिभाषाया अप्रवृत्तेः ।

तदन्तस्यापीयं संज्ञा । 'द्वन्द्वे च' इति सूत्रेण वर्णाश्रमेतरशब्दस्य सर्वादिगणे पाठाभावात् 'सर्वादीनि सर्वनामानि' इत्यनेन सर्वनामसंज्ञाया अप्राप्तावपि सर्वनामसंज्ञाया निषेधः क्रियते, तेन ज्ञायते यत्तदन्तस्यापि संज्ञेयं भवति । एवञ्च सर्वादीनीति शब्दस्य शब्दस्वरूपमिति विशेष्यमादाय 'येन विधिस्तदन्तस्य' इत्यनेन तदन्तविधिना सर्वादीनां सर्वाद्यन्तशब्दस्वरूपाणाञ्च सर्वनामसंज्ञा भवति इत्यर्थो निष्पद्यते

सूत्रस्य । तथा च यथा सर्वशब्दस्य सर्वनामसंज्ञा भवति तथैव परमसर्वशब्दस्य भवति, एवञ्च तस्मात् त्रल् प्रत्ययः सिद्धयति । सर्वादिगणपठितस्य भवत्शब्दा स्याकचि कृते 'परमभवकान्' इति च सिद्धयति । अन्यथा परमभवच्छन्दस्य स दावभावात् तस्य सर्वनामसंज्ञाया अप्राप्तौ 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इति सूत्रे कच् न स्यात् ।

19 **सर्वेषाम्** (ई० ४८, ५७) सर्वशब्दात् प्रातिपदिकादामि 'सर्वादीनि स नामानि' इत्यनेन सर्वनामसंज्ञायां 'आमि सर्वनाम्नः सुट्' इत्यनेन सुटि अनुबन्धल 'बहुवचने झल्येत्' इति सूत्रेणैत्वे 'आदेशप्रत्यययोः' इति सुटः सकारस्य षत्वे स षामिति सिद्धम् ।

20 न च सुटः प्रत्ययत्वाभावात् 'आदेशप्रत्यययोः' इत्यनेन नं सकारस्य आम् वि क्तेश्च झलाद्यभावात् 'बहुवचने झल्येत्' इति सूत्रकृतमेत्वञ्च न युक्तमिति वाच्य 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति परिभाषया सुटः आम्ग्रहणेन प्र यत्वात् झलादित्वाच्च ।

21 **सर्वादिगणे उभशब्दस्य पाठः किमर्थः** । ननु सर्वादिकार्यस्य एकवचनबहुव नयोरेव विधानादुभशब्दस्य च तयोः रूपाभावात् सर्वादिगणे पाठेन सर्वनामसंज्ञा "अव्ययसर्वनाम्नामकच् प्राक्टेः' इति सूत्रेणाकचि उभकौ शब्दस्य निष्पादना तस्यावश्यकत्वात् । न च स्वार्थे कप्रत्ययेनेष्टसिद्धिरिति वाच्यम्, द्विवचनपरत्वाभा नोभयत उभयत्रेत्यादाविवायच् प्रसङ्गात् । अकचि कृते तु 'तन्मध्ये पतितस्तद्ग्रहणे गृह्यते' इति न्यायेन द्विवचनपरत्वान्न दोषः । कप्रत्ययेन स्वरे भेदः स्यादिति शङ्कयम्, चित्स्वरेण प्रत्ययस्वरेण वा अन्तोदात्तत्वे विशेषाभावात् ।

22 **उभयशब्दस्येति** 'उभयोऽन्यत्र' इति वार्तिकस्य 'उभयो मणिः' 'उभये देवमनुष्या इति उदाहरणदानपरकभाष्येण ज्ञायते यत् "उभय" शब्दस्य द्विवचनन्नास्ति अतएव तस्माद्द्विवचनानुत्पादात् तस्यासार्वविभक्तिकत्वात् अव्ययत्वे प्राप्ते "तद्धि श्चासर्वविभक्तिः" इति सूत्रे कृत्तद्धितानां च ग्रहणं इति भाष्यं कैयटेनावतारि सङ्गच्छते ।

23 हरदत्तस्तु—पचतिकल्पं पचतिरूपमिति वारणेन पाठस्योपेक्षणीयत्वेनाभिधा प्रमाणन्नास्ति । तथा च प्रचलत्येव तस्य द्विवचने रूपम् इत्याह ।

24 **डतरडतमौ प्रत्ययौ** । केवलं प्रत्ययस्य प्रयोगाभावात् सर्वादिगणे च केव

प्रत्ययस्यैव डतरडतमस्य ग्रहणात् 'प्रत्ययग्रहणे तदन्तग्रहणम्' इति परिभाषया तदन्तविधौ डतरडतमान्तस्यैव 'सर्वादीनि सर्वनामानि' इत्यनेन सर्वनामसंज्ञा भवति न तु केवलयोस्तयोः। तथा च कतरकतमादिशब्दानां सिद्ध्यति सर्वनामसंज्ञा।

न च 'सुप्तिङन्तं पदम्' इति सूत्रेऽन्तग्रहणज्ञापितया 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणन्नास्ति' इति परिभाषयाऽत्र प्रत्ययसंज्ञा विधानेन तदन्तग्रहणभावात् कतरकतमशब्दयोर्न सिद्ध्येत् सर्वनामसंज्ञेति वाच्यम्, केवलयोः संज्ञायाः प्रयोजनाभावात् तदनुपस्थितेः।

उभये (ई० ६३ ४९) उभौ अवयवौ येषामिति विग्रहे समासादिकार्ये 'संख्याया अवयवे तयप्' इत्यनेन तयपि तत्स्थाने 'उभादुदात्तो नित्यम्' इत्यनेनायचि अनुबन्धलोपे प्रातिपदिकत्वाज्जसि तयपः स्थानिवत्वेन 'प्रथमचरमतयाल्पार्धकतिपयनेमाश्च' इति वैकल्पिकसर्वनामसंज्ञायां प्राप्तायां विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वात् 'सर्वादिनि सर्वनामानि' इत्यनेन नित्यमेव संज्ञायां कृतायां 'जसः शी' इति श्यादेशेऽनुबन्धलोपे 'आद्गुणः' इति गुणे उभये इति सिद्धम्। यदि तूभयशब्दादयच् स्वतन्त्रः, न तु तयप् आदेशः इति निष्कर्षः स्वीक्रियते तदा 'प्रथमचरमतयाल्पार्धकतिपयनेमाश्च' इत्यस्य प्राप्तिरेव नास्ति।

स्वाभिधेयापेक्षावधिनियमो व्यवस्था। अस्यायमर्थः-स्वस्य पूर्वादिशब्दस्य अभिधेयेन वाच्यार्थेन नियमेनावधिरपेक्ष्यते तादृशो नियमो व्यवस्था तद्वाचिपूर्वादिशब्दानां सर्वनामसंज्ञा भवतीति सूत्रार्थः। पूर्वादिशब्दे उच्चारिते कस्मात्पूर्वः कस्मात्परः इत्यादिनियमेनावधिसापेक्षोऽर्थः इति यावत्। 'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्' इति सूत्रे व्यवस्थापदाभावे कुशलवाचिदक्षिणशब्दस्यापि सर्वनामसंज्ञा स्यात्, सा माभूत् इति व्यवस्थाग्रहणं कृतम्। कृते तु तस्मिन् कुशलार्थस्य कस्मात् कुशल इति अवध्यपेक्षत्वेऽपि कुशलमात्रप्रतिपादनेच्छयोच्चारितदक्षिणशब्दार्थस्य अवध्यपेक्षत्वाभावेन नियमेन अवधिसापेक्षार्थकत्वाभावात् सर्वनामसंज्ञा न भवतीति। तथा च दक्षिणाः इति एकमेव रूपन्नतु द्वितीयमिति। यदि तु इह अमुकस्मात् कुशल इति अवध्यन्वयसम्भवेन अस्तीह व्यवस्था तदा 'अधरे ताम्बूलरागः उत्तरे प्रत्युत्तरे च शक्तः' इति प्रत्युदाहरणं बोध्यम्।

स्वे (ई० ३९) स्वशब्दात् प्रातिपदिकाज्जसि विभक्तौ 'स्वमज्ञातिधनाख्यायाम्' इत्यनेन वैकल्पिकसर्वनामसंज्ञायां 'जसः शी' इसि श्यादेशेऽनुबन्धलोपे 'आद्-

गुण' इति गुणे स्वे इति सिद्धम्। सर्वनामसंज्ञाभावे सवर्णदीर्घे सकारस्य विसर्गे च कृते 'स्वाः' इति रूपं भवति। 'स्वाः ज्ञातयोत्मनि स्वं त्रिष्वा- स्वोऽस्त्रियां धने' इति कोशात् स्वशब्दस्य चत्वारोऽर्थाः प्रतिपादिताः। तत्र ज्ञा- भिन्ने धनभिन्ने चाऽर्थे स्वशब्दस्य जसि स्वे इति रूपं भवति। तदर्थे तु स्वा- रूपं भवति। अतएव ज्ञातयोऽर्था वेति मूले।

(29) त्वत्कपितृकः (ई० ४५) त्वकं पिता यस्य अहकं पिता यस्येति लौकिक- युष्मत् सु पितृ सु, अस्मत् पितृ सु इत्यलौकिकविग्रहे बहुव्रीहिसमासात् प्रागे- बहुव्रीहौ' इत्यनेन सर्वनामसंज्ञानिषेधेऽकचोऽप्राप्त्या के 'प्रत्ययोत्तरपदयोश्च' त्वमादेशे 'नद्यृतश्च' इति कप्यनुबन्धलोपे स्वादिकार्ये सिद्धम्।

(30) न च त्वत्कपितृक इत्यादौ सर्वनामसंज्ञानिषेधाय 'न बहुव्रीहौ' इत्यस्याव- कता नास्ति 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इति वार्तिकेनैव सर्वनामसंज्ञा- धादिति वाच्यम्, उपसर्जनसंज्ञायाः समासकरणानन्तरमेव सम्पद्यमानत्वेन स- सात्पूर्वं तन्निषेधाभावेन सर्वनामत्वात् 'अव्ययसर्वनाम्नामकच् प्राक् टेः' इति अ- कृते लौकिके विग्रहवाक्ये इव त्वकत्पितृकः मकत्पितृक इति समासेऽपि अ- श्रवणं स्यात्। तथा च समासात् पूर्वमेव तन्निषेधाय बहुव्रीहौ चिकीर्षिते सर्वना- संज्ञा न स्यादित्यर्थकस्य 'न बहुव्रीहौ' इति सूत्रस्यावश्यकत्वात्। न च निमित्तस- नुपसर्जनत्वस्य विनाशोन्मुखत्वात् 'अकृतव्यूहाः पाणिनीयाः' इति परिभाषाप्र- समासात् प्रागपि सर्वनामता न स्यादिति वाच्यम्, तस्या अनित्यत्वात्। तत्र- त्सूत्रस्यैव ज्ञापकत्वात् इति पाणिनिमतम्।

(31) भाष्यकारास्तु—'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इति वार्तिकं स्वीकृ- 'अकच्स्वरौ तु कर्त्तव्यौ प्रत्यङ्गं मुक्तसंशयौ' इत्युक्त्वा त्वकत्पितृको मकत्पि- इति रूपे इष्टापत्तिं कृत्वा 'न बहुव्रीहौ' इति सूत्रं प्रत्याचख्यौ।

न च वार्तिकापेक्षया सूत्रस्य प्राबल्येन वार्तिकेन तत्खण्डनमनुचितमिति वाच्य- 'यथोत्तरं मुनीनां प्रामाण्यम्' इति परिभाषणेन तस्यैव प्रामाण्यात्।

(32) संज्ञोपसर्जनीभूतास्तु न सर्वादयः—(ई० ५४) 'सर्वादीनि सर्वनामानि' इ- सूत्रे सर्वनाम इति महासंज्ञाकरणेन तस्याश्चान्वर्थतया सर्वान्नमयन्ति, सर्वे- नामानि वेति विग्रहेण प्राधान्येन इतराविशेषणत्वेन स्वीयसर्वार्थोपस्थापक इत्य- लाभात् तादृशसर्वादिगणपठितशब्दानामेव सर्वनामसंज्ञा। सर्वनामसंज्ञोद्देश्या-

र्वादिशब्दानां प्राधान्येन स्वीयसर्वार्थोपस्थापकानामेव च गणे सन्निवेशेन त्यदादयः ब्दा अपि तादृशा एव पठ्यन्ते इति 'त्यदादीनामः' इति सूत्रेणात्वं 'तदोः सः वनन्त्ययोः' इति सत्वं अद्ड्डतरादिभ्यः पञ्चभ्यः' इति सूत्रेणाद्डादेशश्च तादृशा-र्थोपस्थापकशब्दानामेवेति संज्ञायामुपसर्जनत्वे तु सर्वादीनां संज्ञा अत्व, सत्वं, अद्डा-देशश्च न भवन्ति इति क्रमेण सर्वो नाम कश्चित् तस्मै सर्वाय देहि, अतिक्रान्तः सर्वमतिसर्वः तस्मै अतिसर्वाय देहि, अतिकतरं कुलम्, अतितत्, इत्युदाहरणानि बोध्यानि ।

(33) **वर्णाश्रमेतराणाम्**— (ई० ५७) वर्णाश्च आश्रमाश्च इतरे च वर्णाश्रमेत-राः तेषां वर्णाश्रमेतराणामिति । अत्र वर्णाश्रमेतरशब्दात् प्रातिपदिकादामि 'सर्वादीनि सर्वनामानि' इति सर्वनामसंज्ञायां प्राप्तायां 'द्वन्द्वे च' इति निषेधे 'ह्रस्वनद्यापो नुट्' इति नुट्यनुबन्धलोपे 'नामि' इति दीर्घे, णत्वे च कृते वर्णाश्रमेतराणामिति सिद्धम् ।

(34) न च 'द्वन्द्वे च' इत्यनेन समुदायस्यैव सर्वनामसंज्ञाया निषेधविधानेन केवल-मितरशब्दस्य निषेधाभावात् तस्य सर्वनामत्वात् 'आमि सर्वनाम्नः सुट्' इत्यनेन सुटा भाव्यमिति वाच्यम्, इतरशब्दस्य सर्वनामत्वेऽपि 'आमि सर्वनाम्नः सुट्' इत्य-नेन अवर्णान्तादङ्गात् परस्य सर्वनाम्नो विहितस्यैव सुड् विधानात् । अत्र च आम्-विभक्तेः सर्वनामसंज्ञकेतरशब्दादविहितत्वात्, वर्णाश्रमेतरशब्दाद्विहितत्वात्तस्य च सर्वनामत्वाभावात् ।

(35) **अतिसर्वाय**—[ई० ३९] सर्वमतिक्रान्तायेति विग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासे सुब्लुकि पुनः समासत्वात् प्रातिपदिकत्वान्ङे विभक्तौ 'स्वार्थोपस्थापकत्वमुपसर्जनत्वम्' इति उपसर्जनलक्षणत्वे सर्वशब्दस्योपसर्जनत्वात् 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इति वार्तिकेन 'सर्वादीनि सर्वनामानि' इत्यनेन प्राप्तायाः सर्वनामसंज्ञायाः विषेधे स्मायादेशाभाधात् ङे इत्यस्य 'ङेर्यः' इत्यनेन यादेशे 'स्थानिवदादेशोऽनल्विधौ' इत्यनेन स्थानिवद्भावेन सुप्त्वधर्मस्य यकारे आनयनात् 'सुपि च' इति दीर्घे अतिसर्वायेति सिद्धम् ।

(36) न च 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति परिभाषयाऽतिसर्व-शब्दस्य सर्वनामसंज्ञाप्राप्तिरेव नास्ति ततश्च संज्ञोपसर्जनत्वेन निषेधो व्यर्थ इति चेन्न, उपर्युक्तपरिभाषया वर्णाश्रमेतराणामित्यत्रापि सिद्धे 'द्वन्द्वे च' इति सूत्रं व्यर्थीभूय ज्ञापयति यत् तदन्तस्यापीयं संज्ञा तेन दोषाभावात् ।

मासपूर्वाय—(ई० ५३) मासेन पूर्वायेति विग्रहे समासे सुब्लुकि समासत्व
प्रातिपदिकत्वात् ङे विभक्तौ 'सर्वादीनि सर्वनामानि' इत्यनेन प्राप्तायाः सर्वना
संज्ञायाः 'तृतीया समासे' इति निषेधे सर्वनामत्वाभावात् 'सर्वनाम्नः स्मै' इत्य
स्मायादेशाभावे 'ङेर्यः' इति ङेर्यादेशे सुप्त्वस्य स्थानिवत्त्वेन यकारे आनयनात् 'सु
च' इति दीर्घे मासपूर्वाय इति सिद्धम् ।

अत्र प्रतिपदोक्तस्यैव सर्वनामसंज्ञाविधानेन मासपूर्वशब्दस्य सर्वनामसंज्ञाया अ
प्त्या 'तृतीया समासे' इति निषेधस्याऽनर्थक्यं न शङ्क्यम्, 'द्वन्द्वे च' इति ज्ञापित
तदन्तस्यापीयं संज्ञा इत्यनेनाऽदोषात् ।

वर्णाश्रमेतरकाः (ई० ३६, ५१) वर्णाश्च आश्रमाश्च इतरे च इति द्वन्द्वसम
सुब्लुकि स्वार्थे कनि वर्णाश्रमेतरकशब्दात् प्रातिपदिकात् जसि तदन्तयापीयं सं
इति ज्ञपनेन 'सर्वादीनि सर्वनामानि' इति सर्वनामसंज्ञायां प्राप्तायां 'द्वन्द्वे च' इ
निषेधे सर्वनामत्वाभावात् 'जसः शी' इत्यस्याप्राप्त्या सवर्णदीर्घे सकारस्य रुत्वे विस
च कृते वर्णाश्रमेतरका इति सिद्धम् ।

न च 'सर्वादीनि' इत्यनेन प्राप्तायाः सर्वनामसंज्ञायाः 'द्वन्द्वे च' इत्यने
निषेधेऽपि 'विभाषा जसि' इति वैकल्पिकसर्वनामत्वेन 'अव्ययसर्वनाम्नामकच् प्राक्टेः
इत्यनेनाकजेव कुतो न कृतमिति वाच्यम्, 'विभाषा जसि' इत्यनेन शीभावे कर्त्तव
एव सर्वनामसंज्ञाविधानात्, अत्र च शीभावस्याभावात् ।

निर्दिश्यमानस्येति—अत्रेदं बोध्यम्—'येन विधिस्तदन्तस्य' सूत्रस्य प्रपञ्चभूतय
'पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति परिभाषया 'जराया जरसन्यतरस्याम्
इति सूत्रेण निर्जरसमुदायस्य जरसादेशे प्राप्ते 'निर्दिश्यमानस्यादेशा भवन्ति' इति
परिभाषया जराशब्दस्यैव जरसादेशः क्रियते । न चात्र निर्जरशब्दे जराशब्दत्वा-
भावात् कथं जरसादेश इति वाच्यम्, 'कर्णपुच्छविहीनः श्वा न चाश्वो न च गर्दभः'
इति न्यायानुकूलया 'एकदेशविकृतमनन्यवत्' इति परिभाषया जराशब्देन जर-
शब्दस्यापि ग्रहणात् ।

निर्जरसौ—(ई० ५३) निर्जरशब्दात् प्रातिपदिकात् औ विभक्तौ 'जराया
जरसन्यतरस्याम्' इत्यनेन जरशब्दस्य जरसादशे 'निर्जरसौ' इति सिद्धम् ।

न च जरसादेशस्य जराशब्दस्यैव निर्दिष्टत्वात् निर्जरशब्दे कथं जरसादेश इति

वाच्यम्, 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति तदन्तविधिना निर्जरशब्दस्यापि ग्रहणात् ।

न च जरसादेशस्यानेकाल्त्वात् 'अनेकाल्शित्सर्वस्य' इत्यनेन सम्पूर्णस्य स्थाने जरसादेशेन भवितव्यमिति वाच्यम्, 'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषया जरशब्दस्यैव निर्दिश्यमानत्वात् ।

न च निर्जरशब्दे जरशब्दस्य विद्यमानत्वेऽपि जराशब्दाभावात् जरसादेशस्य च जराशब्दस्यैव विधानात् कथमत्रादेश ईति वाच्यम्, 'एकदेशविकृतमनन्यवत्' इति परिभाषया तस्यापि ग्रहणसम्भवात् ।

निर्जरसा—(ई० ३७, ४६) निर्जरशब्दात् प्रातिपदिकात् टाविभक्तौ 'टाङसिङसामिनात्स्याः' इत्यनेन इनादेशे प्राप्ते 'जराया जरसन्यतरस्याम्' इत्यनेन जरासादेशे च प्राप्ते 'विप्रतिषेधे' परं कार्यम्' इति सूत्रबलेन परत्वाज्जरसादेशे निर्जरसा इति रूपम् । जराशब्दस्यैव जरस् विधानात् निर्जर इत्यत्र च जराशब्दाभावात् जरसादेशस्यानौचित्यं न शक्यम् वक्तुं, 'एकदेशविकृतमनन्यवत्' इत्यनया तस्या पिग्रहणात्, 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति परिभाषया जराशब्दस्यैवादेशविधानेऽपि तदन्तविधिना निर्जरशब्दस्यापि विधीयते ।

'अनेकाल्शित्सर्वस्य' इति सूत्रेण जरसादेशस्यानेकाल्त्वात् सर्वादेशत्वं न शंक्यम् 'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषया जराशब्दस्यैव निर्दिश्यमानत्वात् । जरसादेशाभावपक्षे इनादेशे गुणे नकारस्य णत्वे निर्जरेण इति रूपद्वयम् ।

अत्र केचित् 'बिप्रतिषेधे परं कार्यम्' इत्यत्र अपरमिति पदं छित्वा अपरमित्यस्य इण्टमित्यर्थं कृत्वा पूर्वविप्रतिषेधेन इनादेशे कृते सन्निपातपरिभाषाया अनित्यत्वमाश्रितत्य निर्जरसिन ईत्युक्तं तद्भाष्यविरुद्धम् ।

भाष्ये हि—'टाङसिङसामिनात्स्याः' इति सूत्रे इनातौ प्रत्याख्याय नादेशमदादेशं च विधाय नादेशे परे एत्वं 'आङि चापः', इत्यस्य स्थाने 'आङि च' इति योगं विभज्य साधितम् । एवं सति निर्जरसिन् इत्यादिरूपकथनं भाष्यविरुद्धमेव ।

निर्जरसे (ई० ५६) निर्जरशब्दात् चतुर्थ्येकवचने 'जराया जरसन्यतरस्याम्' इत्यनेन जरासादेशे निर्जरसे इति सिद्धम् । न च जराशब्दस्य विधीयमानो जरस् 'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषया निर्जरशब्दे न स्यात् इति वाच्यम्

'पदाङ्गाधिकारे तस्य च तदन्तस्य' इत्यनेन 'एकदेशविकृतमनन्यवत्' इत्यनेन परिभाषाशास्त्रेण निर्जरशब्दस्यापि जरसादेशविधानात् ।

(43) **निर्जरसिन्**—(ई० ४८) निर्जरशब्दात् प्रादिपदिकसंज्ञायाम् टाविभक्तौ जरसादेशाद्विभक्त्यादेशाः पूर्वविप्रतिषेधेनेति स्वीकृत्य 'अतो भिस ऐस्' इति सूत्रे अदन्तात् परस्य भिसः ऐस् विधानेन वृद्धया इष्टसिद्धौ ऐस्करणसामर्थ्येन जरसादेशविधौ सन्निपात-परिभाषाया अनित्यत्वं स्वीकृत्य जरसादेशात् प्राक् इनादेशे कृते ततः जरसादेशे निर्जरसिन, एवं पञ्चम्येकवचने ङसि विभक्तौ जरसादेशात् प्राक् 'आत्' आदेशे कृते ततः जरसादेशे निर्जरसात् इति रूपे भवतः इति केचित् इति वृत्तिकृता उक्तम् तद् भाष्यविरुद्धम् । तथाहि टाङसि-इति सूत्रे इनातौ प्रत्याख्याय नादेशं मदादेशं च विधाय नादेशे परे एत्वं 'आङि चापः' इत्यत्र 'आङि च' इति योगं विभज्य साधितम् । एवं तर्हि रामेण रामात् अनयोः सिद्धावपि निर्जरसिन निर्जरसाद् इत्यनयोः सिद्धिः प्रत्याख्यानपक्षे न स्यात् । अतः भाष्यविरुद्धत्वादिदं सर्वमसंगतमेव । किन्तु पूर्वं जरसादेशे इनादेशाप्राप्तौ निर्जरसा, निर्जरसः इत्यादीनि एव रूपाणि भवन्ति ।

(44) **निर्जरशब्दस्य रूपाणि** (ई० ३५)

निर्जरः	निर्जरौ, निर्जरसौ	निर्जराः निर्जरसः
निर्जरम्, निर्जरसम्	निर्जरौ, निर्जरसौ	निर्जरान् निर्जरसः ।
निर्जरेण, निर्जरसा,	निर्जराभ्याम्	निर्जरैः
निर्जराय, निर्जरसे	निर्जराभ्याम्	निर्जरेभ्यः
निर्जरात्, निर्जराद् निर्जरसः	,,	,,
निर्जरस्य, निर्जरसः	निर्जरयोः, निर्जरसोः	निर्जराणाम् निर्जरसाम्
निर्जरे, निर्जरसि	,, ,,	निर्जरेषु
हे निर्जर	हे निर्जरौ हे निर्जरसौ	हे निर्जराः, हे निर्जरसः ।

(45) **पदः** (ई० ४५) पादशब्दात् प्रातिपदिकसंज्ञायां शसि विभक्तौ 'पद्दन्नोमास–' इति पादशब्दस्य विकल्पेन पदादेशे सस्य रुत्वे विसर्गे पदः इति । पक्षे पूर्वसवर्णदीर्घे 'तस्माच्छसो नः पुंसिः' इत्यनेन नत्वे पादान् इति च सिद्धयति ।

(46) **पदा** (ई० ४२) पादशब्दात् प्रातिपदिकत्वात् टा विभक्तौ 'पद्दन्नोमास' इत्यादिना पदादेशे पदा इति । पक्षे 'टाङसिङसामिनात्स्याः' इत्यनेन इनादेशे 'आद्गुणः'

इत्यनेन गुणे पादेन इति सिद्धम् ।

स्वादिष्वसर्वनामस्थाने (ई० ५०) एकवचनात् सुप्रत्ययादारभ्य कप्प्रत्ययावधि प्रत्ययाः स्वादिपदेन गृह्यन्ते । तेन कप्प्रत्ययावधिषु स्वादिषु असर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं भवति । राजभ्याम्, राजत्वम्, राजता, राजतमः इत्यादीन्युदाहरणानि । तत्र राजन् शब्दात् भ्यामि ददत् शब्दाच्च भ्यामि अनेन पदत्वे नकारस्य तकारस्य वा पदान्तत्वात् 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन नलोपः सिद्ध्यति । एवं राजता इत्यादावपि ।

दतः (ई० ५२) दन्तशब्दात् प्रातिपदिकसंज्ञायाम् शसि विभक्तौ अनुबन्धलोपे 'पद्दन्नोमास्' इत्यादिना दत् आदेशे 'स्वादिष्वसर्वनामस्थाने' इत्यनेन पदसंज्ञायाम् 'यचि भम्' इत्यनेन भसंज्ञायाम् च प्राप्तायां 'आकडारादेका संज्ञा' इति नियमात् भसंज्ञायाम् पदत्वाभावात् जश्त्वाभावेन सस्य रुत्वे विसर्गे दतः इति सिद्धम् ।

दता (ई० ५४) दन्तशब्दात् प्रातिपदिकसंज्ञायाम् टाविभक्तौ 'पद्दन्नोमास'-इत्यादिना दत् आदेशे 'स्वादिष्वसर्वनामस्थाने' इति पदत्वे 'यचि भम्' इति भत्वे च प्राप्ते 'आकडारादेका संज्ञा' इत्यनेन नियमात् भसंज्ञायाम् जश्त्वाप्राप्त्या दता इति रूपं सिद्धम् ।

मासा (ई० ५७) मासशब्दात् प्रातिपदिकसंज्ञायाम् टाविभक्तौ 'पद्दन्नोमास्' इत्यनेन मास् इत्यादेशे मासा इति सिद्धम् ।

माभ्याम् (ई० ५५) मासशब्दात् प्रातिपदिकात् भ्यामि विभक्तौ 'पद्दन्नोमास'-इत्यादिना मास् इत्यादेशे 'स्वादिष्वसर्वनामस्थाने' इत्यनेन पदसंज्ञाया 'ससजुषोरुः' इति सस्य रुत्वे 'भोभगोअघोअपूर्वस्य योऽशि' इत्यनेन रोर्यादेशे 'हलि सर्वेषाम्' इति यलोपे माभ्याम् इति सिद्धम् ।

माभिः (ई० ५४) मासशब्दात् प्रातिपदिकात् भिस् विभक्तौ 'पद्दन्नोमास्' इत्यादिना मास् आदेशे 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात् सस्य रुत्वे 'भोभगोअघोअपूर्वस्य योऽशि' इत्यनेन रोः यत्वे 'हलि सर्वेषाम्' इति यलोपे सस्य रुत्वे विसर्गे माभिः इति सिद्धम् ।

यूष्णः (ई० ५२) यूषशब्दात् प्रातिपदिकात् शसि विभक्तो 'पद्दन्नोमास्' इति यूषन् आदेशे 'यचि भम्' इत्यनेन भसंज्ञायाम् 'अल्लोपोनः' इत्यल्लोपे यूषन् अस्

इति स्थिते 'अचः परस्मिन् पूर्वविधौ' पूर्वस्माद् विधिः इति पञ्चमीसमासपक्षे सका- रात् परस्य नस्य णत्वे कर्तव्ये अलोपस्य स्थानिवद्भावेन अकारव्यवधानात् 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन णत्वे सकारस्य रुत्वे विसर्गे यूष्णः इति सिद्धम्।

नच 'पूर्वत्रासिद्धे न स्थानिवत्' इति स्थानिवद्भावनिषेध इति वाच्यम् 'तस्य दोषः संयोगादिलोपलत्वणत्वेषु' इति निषेधात्।

(54) **यूषभिः** (ई० ३४) यूषशब्दात् प्रातिपदिकत्वात् भिस्विभक्तौ 'पद्दन्नोमास्' इत्यादिना यूषन् आदेशे 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात् 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन नलोपे यूष भिस् इत्यवस्थायाम् 'अतो भिस ऐस्' इत्यैसादेशो न नलोपस्यासिद्धत्वात्। सस्य रुत्वे विसर्गे यूषभिः इति सिद्धम्।

(55) **यूषभ्यः** (ई० ४७) यूषशब्दात् प्रातिपदिकसंज्ञायाम् भ्यसि विभक्तौ 'पद्दन्नोमास्' इत्यादिना यूषन् आदेशे 'स्वादिष्वसर्वनामस्थाने' इत्यनेन नलोपे नलोपस्यासिद्धत्वात् 'बहुवचने झल्येत्' इति एत्वाभावे सस्य रुत्वे विसर्गे च कृते यूषभ्यः इति सिद्धम्।

(56) **यूष्णि** (ई० ५३) यूषशब्दात् प्रातिपदिकसंज्ञायाम् ङौ विभक्तौ 'पद्दन्नोमास्' इत्यनेन यूषन् आदेशे 'विभाषा ङिश्योः' इति अन् इत्यस्य विकल्पेन लोपे 'रषाभ्यां नो णः समानपदे' इत्यनेन णत्वे यूष्णि इति। लोपाभावपक्षे यूषणि इति च सिद्धम्।

(57) **पद्दन्नोमास इत्यादि** (ई० ४१) ननु भाष्ये 'ककुद्दोषणी' इत्युदाहृतम्। तत्र ककुच्च दोश्चेति द्वन्द्वे प्रातिपदिकत्वेन औ विभक्तौ 'पद्दन्नोमास-' इति सूत्रस्य शसादौ विभक्तौ एव प्रवृत्तेः औ इत्यस्य शसादित्वाभावाद् दोषन्नादेशो न स्यादिति चेन्न; 'पद्दन्नोमास' इति सूत्रे प्रभृतिग्रहणं प्रकारार्थम् 'प्रकारः सादृश्यम् तच्च सुप्त्वेन। तथा सुप्त्वस्य स्वादौ शसादौ च सत्वेन अविभक्तावपि आदेशस्य प्रवृत्त्या ककुद्दोषणी इति भाष्यप्रयोगस्य साधुत्वं सङ्गच्छते। तेन 'पदङ्घ्रिश्चरणोऽस्त्रियाम्' 'स्वान्तं हृन्मानसं मनः' सौ विभक्तावपि पदाद्यादेशाः सिद्ध्यन्ति।

(58) **द्व्यह्न** (ई० ५५) द्वयोरह्नोर्भवः इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे 'कालाट्ठञ्' इति ठञि तस्य 'द्विगोर्लुगनपत्ये' इत्यनेन लुकि 'राजाहःसखिभ्यष्टच्' इत्यनेन टचि 'अह्नोऽह्न एतेभ्यः' इति अह्नादेशे यणि द्व्यह्न इति शब्दात् प्रातिपदिकात् औ विभक्तौ 'संख्याविसायपूर्वस्याह्नस्याऽहनन्यतरस्यां ङौ' इत्यनेन अहनादेशे 'निमित्तापाये नैमित्तिकस्याप्यपायः' इत्यनेन यणादेः निवृत्तौ 'द्वि

अहन् इ' इत्यवस्थायाम् 'विभाषा ङिश्योः' इत्यनेन अल्लोपे ईकारस्य यणि द्व्यह्नि इति । अल्लोपाभावपक्षे द्व्यहनि इति अहन्नादेशाभावपक्षे तु गुणे द्व्यह्ने इति च सिद्ध्यति ।

व्यह्नि (ई० ५२) विगतमहः इति विग्रहे 'प्रादयो गताद्यर्थे प्रथमया' इति समासे 'राजाहःसखिभ्यष्टच्' इति टचि अह्नादेशे यणि व्यह्नशब्दात् प्रातिपदिकात् ङौ विभक्तौ 'संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ' इति पाक्षिके अहन्नादेशे 'विभाषा ङिश्योः' इति पाक्षिके अ लोपे व्यह्नि इति, अल्लोपाभावपक्षे व्यहनि इति, अहन्नादेशाभावपक्षे 'आद्गुणः' इति गुणे व्यह्ने इति त्रीणि रूपाणि सिद्ध्यन्ति ।

विश्वपाः—विश्वपाशब्दात् प्रातिपदिकात् जसि विभक्तौ अनुबन्धलोपे विश्वपा अस् इत्यवस्थायाम् 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे प्राप्ते तं प्रबाध्य 'दीर्घाज्जसि च' इति निषेधे 'अकः सवर्णे दीर्घः' इति दीर्घे सकारस्य रुत्वे विसर्गे विश्वपाः इति सिद्धम् ।

दीर्घाज्जसि च—दीर्घात् जसि इचि च परे पूर्वसवर्णदीर्घो न भवति इत्यर्थः । **न च** विश्वपौ इत्यत्र पूर्वसवर्णदीर्घस्य 'नादिचि' इत्यनेन निषेधात् विश्वपाः इत्यत्र पूर्वसवर्णदीर्घे कृतेऽपि दोषाभावात् अस्य सूत्रस्य किं प्रयोजनमिति चेन्न, गौर्य्यौ गौर्य्यः इत्यादौ 'नादिचि' इत्यस्याप्राप्त्या पूर्वसवर्णदीर्घे अनिष्टं रूपं स्यात् । कृते तु 'दीर्घाज्जसी' ति सूत्रे न पूर्वसवर्णदीर्घः । एतदेवाह मूले—यद्यपीह औङि 'नादिचि' इत्येव सिद्धं जसि तु सत्यपि पूर्वसवर्णदीर्घे क्षतिर्नास्ति तथापि गौर्य्यौ गौर्यः इत्याद्यर्थं सूत्रमिहापि न्याय्यत्वादुपन्यस्तम् ।

विश्वपः—(ई० ३३) विश्वपाशब्दात् प्रातिपदिकात् शसि विभक्तौ अनुबन्धलोपे 'स्वादिष्वसर्वनामस्थाने' इत्यनेन पदसंज्ञायाम् प्राप्तायां 'यचि भम्' इत्यनेन भसंज्ञायाम् च प्राप्तायाम् 'आकडारादेका संज्ञा' इत्यनेन नियमनात् परत्वादनवकाशत्वाच्च भसंज्ञायाम् 'आतो धातोः' इत्यनेन पूर्वसवर्णदीर्घं प्रबाध्य 'अलोन्त्यस्ये' ति सूत्रसहकारेण पकारोत्तरवर्त्याकारस्य लोपे सस्य रुत्वे विसर्गे च कृते विश्वपः इति सिद्धम् ।

शेषो घ्यसखि (ई० ४७) अनदीसंज्ञौ ह्रस्वौ यावीदूतौ तदन्तं सखिवर्जं घिसंज्ञं स्यात् । अनेन प्रकृतिभागस्य घिसंज्ञा विधीयते ।

64) **धातोः किं हाहान्** । ननु 'आतो धातोः' इति सूत्रे धातोः ग्रहणाभावेऽपि अ
स्येति पदानुवृत्त्या आकारान्तं यदङ्गं भं तस्य लोपः स्यादित्यर्थेन सकलेष्टसि
'धातोः' ग्रहणं किमर्थमिति चेन्न 'हाहा' शब्दात् प्रातिपदिकात् शसि विभक्तौ आ
रलोपे हाहान् इति न सिद्ध्येत् । अतः धातुग्रहणं कर्तव्यमिति दिक् ।

65) **शेषे किं मत्यै** । ननु 'यूस्त्र्याख्यौ नदी' इत्यतः यू इत्यस्य 'ङिति ह्रस्व
इत्यतः ह्रस्वपदस्यानुवृत्त्यैव घिसंज्ञायाः विधानात् 'शेषो घ्यसखि' इति सूत्रे शे
ग्रहणं व्यर्थमिति चेन्न ? मत्यै इत्यत्र मतिशब्दात् ङे विभक्तौ नदीसंज्ञायाम् त
घिसंज्ञायाम् 'आण् नद्याः' इत्यनेन आटि गुणावादेशे च कृते अनिष्टं रूपमापद्ये
अतः शेषग्रहणं कर्तव्यम् । न च 'आकडारादेका संज्ञा' इति नियमनात् पुंल्लिंगे न
सर्वलिंगे च सावकाशाया घिसंज्ञायाः परत्वादपवादत्वाच्च नदीसंज्ञया बाधेन घि
ज्ञाया अप्रवृत्त्या शेषग्रहणं व्यर्थमिति वाच्यम् । शेषग्रहणस्य स्पष्टार्थत्वस्वीकारे
दोषात् । अत–आह मूले—एकसंज्ञाधिकारात् सिद्धे शेषग्रहणं स्पष्टार्थम् ।

66) **यू किं मात्रे** । ननु 'शेषो घ्यसखि' इति सूत्रे 'ङिति ह्रस्वश्चे'ति ह्रस्वपद
वृत्त्यैव कार्यनिवाहे यूपदानुवृत्तिः किमर्था इति चेन्न; यूग्रहणाभावे मात्रे इत्यत्र ऋदन्
घित्वेन गुणापत्त्या अनिष्टरूपापत्तिरिति घित्वाभावाय यूपदस्यानुवर्तनीयत्वात् ।

न च 'ऋतोऽङि सर्वनामस्थानयोः' इति सूत्रारम्भसामर्थ्यात् ऋदन्तेभ्यो गु
श्चेत् ङावेवेति नियमाश्रयणेन प्रकृते दोषाभावेन परिच्छेत्तृवाचकमातृशब्दस्य तृती
कवचने घित्वात् नाभावापत्त्या 'मात्रा' इति प्रत्युदाहरणं वाच्यमिति वाच्यम् 'ऋतोऽ
इति सूत्रे ङिग्रहणस्य यू इत्यनुवृत्तावेव तात्पर्ये न पित्रा इत्यादौ नादेशापत्तिरिति दिक्

67) **हरौ** (ई० ५७) हरिशब्दात् प्रातिपदिकसंज्ञायाम् ङौ विभक्तौ 'शेषो घ्यस
इत्यनेन घित्वे 'घेर्ङिति' इति गुणे प्राप्ते तं प्रबाध्य 'अच्च घेः' इत्यनेन ङेरौत्वे अन्त
अकारे च कृते हर औ इत्यवस्थायाम् 'वृद्धिरेची' ति वृद्धौ हरौ इति सिद्धम् ।

68) **हल्ङ्याब्भ्यः किम् ग्रामणीः**—(ई० ५३) ननु 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्य
पृक्तं हल्' इति सूत्रे 'हल्ङ्याब्भ्यः' इति पदं किमर्थमिति चेन्न; ग्रामं नयति इ
विग्रहे क्विपि 'अग्रग्रामाभ्यां नयतेर्णो वाच्यः' इति वार्तिकेन णत्वे विभक्तिका
ग्रामणीस् इति स्थिते अनेन सुलोपः स्यात् । कृते तु तद्ग्रहणे हलन्तात्परयोङ्याप
अभावात् न सुलोपः इति दिक् ।

दीर्घात् किं निष्कौशाम्बिः । ननु 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सूत्रे दीर्घग्रहणाभावेऽपि सकलेष्टसिद्धौ दीर्घग्रहणं किमर्थमिति चेन्न ? निष्कौशाम्बिः इत्यत्र अतिखट्वः इत्यत्र च 'गोस्त्रियोरि'ति ह्रस्वे स्थानिवद्भावेन ङीप्त्वात् आप्त्वात् च सुलोपापत्तिः । कृते तु दीर्घग्रहणे दीर्घङ्याबन्तत्वाभावात् न सुलोप इति दिक् ।

प्रथमहल् किं राजा । ननु 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सूत्रे प्रथमहल्ग्रहणं किमर्थमिति चेन्न; राजा इत्यत्र नलोपो न स्यात् । न च 'संयोगान्तस्य लोपः' इत्यनेन सुलोपे इष्टसिद्धिरिति वाच्यम् । संयोगान्तलोपस्य असिद्धत्वात् नलोपानापत्तेः । न च 'न ङि सम्बुद्ध्योः' इति सूत्रस्यसम्बुद्धिग्रहणेन नलोपे कर्तव्ये 'संयोगान्तस्य लोपः' इत्यस्यासिद्धत्वं न भवतीति वाच्यम् 'अभिनोऽत्र' इत्यत्र रोरुत्वं न स्यात् सिपि 'दश्चे' ति रुत्वे संयोगान्तलोपस्यासिद्धत्वात् । सति तु हल्ग्रहणे अनेन लोपे अस्य रुत्वदृष्टया सिद्धत्वात् न दोषः । तदुक्तम् ।

संयोगान्तस्य लोपे हि नलोपादिर्न सिद्धयति ।
रात्तु चेन्नैव लोपः स्याद् हलस्तस्माद्विधीयते ॥

सखा । सखिशब्दात् प्रातिपदिकात् सौविभक्तौ 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति अङ्गसंज्ञायाम् 'ङिच्चे'ति सूत्रसहकारेण अनङादेशे अनुबन्धलोपे सखन् सु इति जाते 'अल्लोन्त्यात्पूर्व उपधा' इत्यनेन उपधासंज्ञायाम् 'सर्वनामस्थाने चासम्बुद्धौ' इति उपधायाः दीर्घे सखान् सु इति स्थिते 'अपृक्त एकाल् प्रत्ययः' इत्यनेन सकारस्यापृक्तसंज्ञायाम् 'हल्ङ्याब्भ्य' इत्यादिना सलोपे 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन नलोपे सखा इति सिद्धम् ।

सखायौ—सखिशब्दात् प्रातिपदिकात् औ विभक्तौ 'सख्युरसम्बुद्धौ' इत्यनेन णिद्वद्भावे 'अचोञ्णिति' इति वृद्धौ आयादेशे सखायौ इति सिद्धम् ।

सख्युः (ई० ५६) सखिशब्दात् प्रातिपदिकात् ङसि विभक्तौ 'इको यणचि' इत्यनेन यणि 'ख्यत्यात्परस्य' इति विभक्तेरकारस्योत्वे सस्य रुत्वे विसर्गे च कृते सख्युः इति सिद्धम् ।

सख्यौ (ई० ५६) सखिशब्दात् प्रातिपदिकात् ङौ विभक्तौ 'औत्' इत्यनेन ङेरौत्वे यणि सख्यौ इति सिद्धम् ।

सुसखा (ई० ५३) शोभनः सखा इत्यर्थे सुसखिशब्दात् समासात् प्रातिपदि-

कत्वेन सौ 'अनङ् सौ' इत्यस्य आङ्गत्वात् तदन्तेऽपि प्रवृत्तौ अनङादेशे अनुबन्ध
दीर्घे सुलोपे नलोपे च कृते सुसखा इति सिद्धम् ।

सुसखिना (ई० ५५) सुसखिशब्दात् प्रातिपदिकात् टा विभक्तौ समुदाय
सखिरूपत्वाभावात् असखीति निषेधाप्रवृत्तेः 'शेषो घ्यसखि' इत्यनेन घिसंज्ञा
आङो नास्त्रियाम्' इत्यनेन नादेशे सुसखिना इति सिद्धम् ।

सुसखौ (ई० ५४) सुसखिशब्दात् प्रातिपदिकात् ङौ विभक्तौ समुदाय
सखिरूपत्वाभावात् 'शेषो घ्यसखि' ईत्यनेन घिसंज्ञायाम् 'अच्च घेः' इत्यनेन ङेरौ
वृद्धौ सुसखौ इति सिद्धम् ।

अतिसखिः (ई० ४८) सखीमतिक्रान्तः इत्यर्थे 'अत्यादयः क्रान्ताद्यर्थे द्वितीय
इत्यनेन समासे अतिसखी इत्यवस्थायाम् 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे स
संत्वात् प्रातिपदिकत्वेन सौ रुत्वे विसर्गे अतिसखिः इति सिद्धम् ।

न च 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषया सखी
शब्दस्यापि अनङादेशः कुतो नेति वाच्यम्; लिङ्गविशिष्टपरिभाषायाः अनित्यत्वात्
तेन 'राजाहःसखिभ्यष्टच्' इति टजपि न । अनित्यत्वे मानञ्च 'शक्तिलाङ्गला
शतोमरयष्टिघटघटीग्रहणेषु' इति वार्तिके घटघटीग्रहणमेव । तत्र घटग्रहणेन घटीग्रह
सिद्धे घटीग्रहणं व्यर्थं सत् परिभाषाया अनित्यत्वं ज्ञापयति इति दिक् ।

बहुगणवतुडति संख्या (ई० ३५) बहुश्च गणश्च वतुश्च डतिश्चेति समाहार
द्वन्द्वः । बहुशब्दः गणशब्दः वतुप्रत्ययान्तः डतिप्रत्ययान्तश्च संख्यासंज्ञकाः भवन्ति
इत्यर्थः । उदाहरणम् बहुशः, गणशः, यावान्, कति इत्यादयः । अत्र बहुगणशब्द
त्रित्वादिसंख्यावाचिनौ न तु वैपुल्यसंघवाचिनौ अन्वर्थसंज्ञाविधानात् ।

कति (ई० ३५) का संख्या परिमाणमस्येति विग्रहे डति टेर्लोपे कतिशब्दात्
प्रातिपदिकात् जसि विभक्तौ 'बहुगणवतुडति संख्या' ईत्यनेन संख्यासंज्ञायाम् 'डति
च' इति षट् संज्ञायाम् 'षड्भ्यो लुक्' इति जसः लोपे कति इति सिद्धम् ।

न च 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति सूत्रेण प्रत्ययलक्षणे कृते 'जसि च
इत्यनेन इकारस्य गुणः कुतो नेति वाच्यम् । 'न लुमताङ्गस्य' इति प्रत्ययलक्षण
निषेधात् ।

प्रियत्रयाणाम् (ई० ३२) प्रियत्रिशब्दात् प्रातिपदिकात् आमि 'पदाङ्गाधिका

तस्य च तदन्तस्य च' इति परिभाषासहकारेण 'त्रेस्त्रयः' इत्यनेन त्रिशब्दान्तस्यापि त्रयादेशे 'ह्रस्वनद्यापो नुट्' इति नुटि अनुबन्धलोपे 'नामि' इति दीर्घे 'अट्कुप्वाङ्-नुम्व्यवायेऽपि' इति णत्वे प्रियत्रयाणाम् इति सिद्धम् ।

नच 'गौणमुख्ययोर्मख्ये कार्यसम्प्रत्ययः' इति न्यायस्य जागरूकत्वेन त्रिशब्दस्यान्यपदार्थे विशेषणत्वात् गौणत्वेन त्रयादेशः न स्यादिति वाच्यम्, गौणमुख्यन्यायस्य पदकार्यमात्रविषयत्वस्वीकारेणात्राप्रवृत्तेरिति दिक् ।

द्विपर्यन्तानां किम्-भवान् । ननु युस्मदस्मदोः त्वादिविधानात् किमादौ कादेशविधानाच्च 'त्यदादीनामः' इत्यस्याप्राप्त्या द्विपर्यन्तग्रहणं व्यर्थमेवेति चेन्न, भवान् इत्यत्र भवत् शब्दात् प्रातिपदिकत्वात् सु विभक्तौ अनुबन्धलोपे तकारस्य अत्वे कृते 'अतो गुणे' इति पररूपे 'उगिदचामि'ति नुमि उपधादीर्घे सुलोपे तलोपे च कृते अनिष्टं रूपं स्यात् । एवं औ विभक्तौ जसि विभक्तौ च अनिष्टं रूपं स्यात् । अतः द्विपर्यन्तानामेवात्वविधानं कर्तव्यम् ।

नच—भवत् शब्दस्य त्यत् शब्दात् प्राक् पाठे न दोष इति वाच्यम्, तद्शब्देन सह भवच्छब्दस्य समासे सच भवांश्च इति विग्रहे 'त्यदादानां मिथः सहोक्तौ' इति वार्तिकेन तच्छब्दस्यैवेकशेषे भवन्तौ इति रूपं न सिद्ध्येत् । अतः द्विपर्यन्तग्रहणं कर्तव्यमेवेति दिक् ।

उडुलोमाः (ई० ५६) उडूनि इव लोमानि यस्य स उडुलोमा तस्यापत्यम् औडुलोमिः । तस्य बहुवचने विवक्षिते 'लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः' इति वार्तिकेन 'बाह्वादिभ्यश्चे'ति सूत्रं प्रबाध्य अकारप्रत्यये 'नस्तद्धिते' इति टिलोपे उडुलोमशब्दाज्जसि पूर्वसवर्णदीर्घे रुत्वे विसर्गे उडुलोमा इति सिद्धम् ।

उडुलोमान् (ई० ५५) उडुलोमस्यापत्यमित्यर्थे उडुलोमन्शब्दात् बहुवचने विवक्षिते 'बाह्वादिभ्यश्चे' ति प्राप्तं इञं प्रबाध्य 'लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः' इति अकारप्रत्यये 'नस्तद्धिते' इति टिलोपे उडुलोम इत्यस्मात् प्रातिपदिकात् शसि पूर्वसवर्णदीर्घे 'तस्माच्छसो नः पुंसि' इति सस्य नत्वे उडुलोमान् इति सिद्धम् ।

वातप्रमीः—(ई० ५४) वातं प्रमिमीते इति वातप्रमीः । वातम् इत्युपपदे माङ्धातोः उणादिके ईप्रत्यये निपातनात् कित्वे च जाते 'आतो लोप इटि च' इति आलोपे 'उपपदमतिङ्' इति समासे प्रातिपदिककार्ये वातप्रमीः इति सिद्धम् ।

(45) **नच**—अत्र 'हल्ङ्याबादीति' सुलोपः कुतो नेति वाच्यम् अङ्यन्तत्वात् न सुलोपः ।

(46) **हे बहुश्रेयसि** (ई० ४२) बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी तत्सम्बुद्धौ हे बहुश्रेयसि इत्यत्र बहुश्रेयसीशब्दात् प्रातिपदिकात् सम्बोधनविवक्षायाम् सौ 'प्रथमलिङ्गग्रहणं च' इति वार्तिकेन नदीसंज्ञायाम् 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वे सम्बुद्धिलोपे हे बहुश्रेयसि इति सिद्धम् ।

(47) **नच**—अत्र 'ह्रस्वस्य गुण' इति गुणः कुतो नेति वाच्यम् । ह्रस्वविधानसामर्थ्यादत्र गुणो नेति भाष्ये स्पष्टम् ।

(48) **बहुश्रेयस्यै** (ई० ४२) बहुश्रेयसीशब्दात् प्रातिपदिकात् ङे विभक्तौ 'प्रथमलिङ्गग्रहणञ्च' इत्यनेन नदीसंज्ञायाम् 'आण् नद्याः' इत्यनेन आटि बहुश्रेयसी आ ए इति स्थिते 'आटश्च' इत्यनेन वृद्धौ यणादेशे बहुश्रेयस्यै इति सिद्धम् ।

(49) **बहुश्रेयस्याम्** (ई० ३३) बहुश्रेयसीशब्दात् प्रातिपदिकात् ङौ विभक्तौ 'प्रथमलिङ्गग्रहणं च' इति नदीसंज्ञायाम् 'ङेराम्नद्याम्नीभ्यः' इति ङेरामि बहुश्रेयसी आम् इति स्थिते स्थानिवद्भावेन ङित्वमादाय 'आण्नद्याः' इत्याटि 'आटश्चे' ति वृद्धौ यणि बहुश्रेयस्यामिति सिद्धम् ।

(50) **नच**—ङेरामि कृते 'ह्रस्वनद्यापो नुट्' इति नुडापत्तिरिति वाच्यम् । परत्वादाटा नुटो बाधसम्भवात् । नच परत्वात् नुटं प्रबाध्य कृतेप्याडागमे नुट् कुतो नेति वाच्यम् 'विप्रतिषधे यद्बाधितं तद्बाधितमेव' इति न्यायस्य जागरूकत्वात् ।

(51) **कुमार्यौ**—(ई० ४९) कुमारीमिच्छन् कुमारीवाचरन् वा ब्राह्मणः कुमारी इति विग्रहे क्यचि धातुत्वाद् सुपो लुकि ततः कर्तरि क्विपि तस्य सर्वापहारिलोपे 'अतो लोपः' इति अलोपे यलोपे कुमारी इति, तस्मात् प्रातिपदिकात् औ विभक्तौ 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यनेन प्राप्तमियङम् प्रबाध्य 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणि कुमार्यौ इति सिद्धम् ।

(52) **नियाम्** (ई० ४६)—ननु 'एरनेकाचोऽसंयोगपूर्वस्य' इति सूत्रे 'अनेकाचः' इत्यस्याऽभावेऽपि सकलेष्टसिद्धौ सूत्रे तद्ग्रहणं व्यर्थमिति चेन्न; नीशब्दात् ङीविभक्तौ नदीत्वाऽभावेपि 'ङेराम्नद्याम्नीभ्यः' इति सूत्रे नीशब्दस्य पृथग्ग्रहणाद् आमि 'नी आम्' इति स्थिते 'अचि श्नुधात्वि'ति इयङ' बाधित्वा यणि 'न्याम्' इति

अनिष्टं रूपं स्यात् । अतः अनेकाच् ग्रहण कृतमिति दिक् ।

दुर्धियः (ई० ३३ ५१)—दुःस्थिता धीर्येषामिति विग्रहे 'प्रादयो धातुजस्य वाच्यो वा चोत्तरपदलोपः' इत्यनेन बहुव्रीहौ पूर्वपदे उत्तरखण्डस्य लोपे च कृते 'दुर्धीः' इति । तस्मात् दुर्धीशब्दात् जसि इयङि सकारस्य रुत्वे विसर्गे 'दुर्धियः' इति ।

नच 'गतिकारकेतरपूर्वपदस्य यण् नेष्यते' इति वार्तिकेन यदा गतिकारकेतर-पूर्वपदस्यैव यण् पर्युदस्यते, तदा प्रकृते दुरित्य य ध्याधातुयोगे 'गतिश्च' इति सूत्रेण गतित्वात् 'एरनेकाच' इति यण् कुतो नेति वाच्यम् 'यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञकाः' इति वचनेन 'दुःस्थिता धीर्यस्य' इत्यत्र दुःशब्दार्थस्य दुष्टत्वस्य स्थाधात्वर्थेऽन्वयेन ध्याधात्वर्थेऽन्वयाभावेन गतित्वाभावात् ।

कथं तर्हि दुर्धियः वृश्चिकभियः इत्यादि—ननु 'दुर्धियः' इत्यत्र गतिपूर्वकत्वात् 'वृश्चिकभियः' इत्यादौ कारकपूर्वकत्वाच्च 'एरनेकाच'—इति यण् कुतो नेति चेन्न 'उपसर्गाः क्रियायोगे', इति सूत्रे योगग्रहणेन 'यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्यु-पसर्गसंज्ञकाः' इति नियमात् दुःस्थिता धीर्येषामित्यर्थे दुरित्यस्य धीशब्दार्थं प्रति गतित्वाऽभावात् । एवं वृश्चिकाद् भीः वृश्चिकभीः इति बुद्धिकृतमपादानत्वं नेह विवक्षितम्, किन्तु वृश्चिकस्य भीः वृश्चिकभीः अथवा वृश्चिकसम्बन्धिनी भीर्वृश्चि-कभीरिति शाकपार्थिवादीनामित्युत्तरपदलोपिसमास इति यणोऽप्राप्तिरिति दिक् ।

शुद्धधियौ (ई० ४६) शुद्धा धीर्यस्येति विग्रहे निष्पन्नात् शुद्धधीशब्दात् औविभक्तौ 'शुद्धधी औ' इति स्थिते 'गतिकारकेतरपूर्वपदस्य यण् नेष्यते' इति वार्तिकेन शुद्धशब्दस्य गतिकारकेतरत्वात् तत्पूर्वकस्य धीशब्दस्येकारस्य 'एरनेकाचः' इति प्राप्तयणो निषेधे 'अचिश्नुधातु-' इति ईयङि 'शुद्धधियौ' इति । शुद्धं ब्रह्म ध्यायतीति विग्रहे तु कारकपूर्वत्वात् स्यादेव यण्-'शुद्धध्यौ' इत्यादि ।

सखायमिच्छति (ई० ५१)—सखायमिच्छतीति विग्रहे 'सुप आत्मनः—' इति क्यचि 'अकृत्सार्वधातुकयोः दीर्घः' इति दीर्घे सखीयति इति तस्मात् सखीय-शब्दात् 'सनाद्यन्ता—' इति धातुसंज्ञकात् क्विपि क्विपः सर्वापहारिलोपे 'अतो लोपः' इत्यल्लोपे 'लोपो व्योर्वलि' इति यलोपे 'सखी' इति ईदन्तं प्रातिपदिकं सिद्धम् । यलोपे कर्तव्ये अल्लोपस्तु न स्थानिवत् 'न पदान्त-' इति यलोपे स्थानि-

वत्वनिषेधात् । 'अचः परस्मिन्–' इति अल्लोपस्य स्थानिवत्वे 'इको यणचि' इ यणादेशोऽपि न 'क्वौ लुप्तं न स्थानिवत्' इति निषेधात् ।

सखीयतीति सखा (ई० ३८)—सखायमिच्छति सखीयति । क्यजन्त सखीयशब्दात् क्विपि अल्लोपे 'लोपे व्योर्वलि' इति यलोपे च कृते 'सखी' इति तस्मात् एकदेशविकृतन्यायेन अनङादिकार्ये सखा इति सिद्धम् ।

सख्युः (ई० ३९, ४७)—सह खेन प्रवर्तते इति सखः तमिच्छतीति 'सखीः' तस्य षष्ठ्येकवचने 'सख्युः' इति । 'ख्यत्यात् परस्य' इति सूत्रे दीर्घस्यापि ग्रहणात् उकारे सस्य रुत्वे विसर्गे सख्युः इति सिद्धम् ।

लून्युः (ई० ४०)—'लूञ् छेदने' इत्यस्माद्धातोः क्तप्रत्यये 'ल्वादिभ्यः' इति नत्वे क्यचि च' इति ईत्वे 'लूनी' इति । तस्मात् प्रातिपदिकत्वात् ङसि 'एरनेकाचः' इति यणि नत्वस्यासिद्धत्वात् 'ख्यत्यात्परस्य' इति उत्वे सकारस्य रुत्वे विसर्गे च 'लून्युः' इति सिद्धम् ।

क्षाम्युः (ई० ४१)—क्षैधातोः क्तप्रत्यये 'आदेच' इत्यात्वे 'क्षायो मः' इति मत्वे क्यचि ईत्वे च कृते 'क्षामी' इति । तस्मात् प्रातिपदिकत्वात्, ङसि 'क्षामी अस्' इति स्थिते 'एरनेकाचोऽसंयोगपूर्वस्य' इति यणि ततः मत्वस्यासिद्धत्वात् 'ख्यत्यात्परस्य' इति उत्वे रुत्वे विसर्गे च कृते 'क्षाम्युः' इति सिद्धम् ।

अप्तृन्तृजिति (ई० ४९)—अप्तृन्निति सूत्रे 'तुरिष्ठेमेयस्सु' इतिवत् 'तृ' इत्येव सिद्धे तृन्तृचोर्भेदेन उपादानं 'क्वचित् सामान्योक्तावपि विशेष एव गृह्यते' इति ज्ञापनार्थम् । अत एव 'न कोपधायाः' इत्यत्र सामान्योक्तावपि वुतद्धितयोरेव को गृह्यते । यद्वा 'अप्तृ' इत्येव वक्तव्ये तृन्तृजिति भेदेनोपादानम् 'अर्णस्तृ'- व्यावृत्तये इत्यवसेयम् ।

नप्त्रादिग्रहणस्येति (ई० ४९, ५५)—'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृ- होतृपोतृप्रशास्तॄणाम्' इति सूत्रे 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' इति पक्षे नप्त्रादानां शब्दानां तृन्नन्तत्वात्तृजन्तत्वाच्च तृन्तृच्ग्रहणेनैव दीर्घसिद्धया नप्त्रादि- ग्रहणं 'सिद्धे सति आरम्यमाणो विधिर्नियमाय भवती' ति सिद्धान्तात् नियमार्थम् । नियमेन च स्वेतरस्वसजातीयव्यावृत्तिः क्रियते इति नप्त्रादीतरोणादिनिष्पन्नतृन्नन्त- तृजन्तशब्दानां न दीर्घः इति फलितम् । तथा च पितृशब्दस्य भ्रात्रादिशब्दस्य वा

तृन्तृजन्तत्वेऽपि न दीर्घः। नचैवमुद्गातृशब्दस्याप्युणादिनिष्पन्नतया तत्रापि दीर्घो न स्यादिति वाच्यम्, समर्थसूत्रे 'उद्गातारः' इति भाष्यप्रयोगदर्शनेन भाष्यप्रामाण्यात्तस्य नियमेन व्यावृत्त्यभावकल्पनात्।

क्रोष्टा—(ई० ३६) कोष्टुशब्दात् प्रातपदिकात् सौ अनुबन्धलोपे 'तृज्वत्क्रोष्टुः, इति तृज्वद्भावे कृते 'ऋतो ङिसर्वनामस्थानयोः, इति गुणे प्राप्ते तम्प्रबाध्य 'ऋदुशनस्पुरुदंशोऽनेहसां च' इत्यनङि अनुबन्धलोपे 'अप्तृन्तृच्'-इति उपधादीर्घे 'हल्ङ्याब्भ्यः' इति सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इति न लोपे 'क्रोष्टा' इति।

क्रोष्टुः (ई० ५२ ५३)—क्रोष्टुशब्दात् प्रातिपदिकात् ङसि अनुबन्धलोपे 'विभाषा तृतीयादिष्वचि' इति तृज्वद्भावे 'ऋत उत्' इति उत्वे रपरत्वे 'रात्सस्य' इति सलोपे 'खरवसानयोर्विसर्जनीयः' रेफस्य विसर्गे 'क्रोष्टुः' इति। तृज्वद्भावाभावे 'शेषो घ्यसखि' इति घिसंज्ञायां 'घेर्ङिति' इति गुणे 'ङसिङसोश्च' इति पूर्वरूपे सस्य रुत्वे विसर्गे च 'क्रोष्टोः' इति भवति।

क्रोष्टूनाम् (ई० ५६)—क्रोष्टुशब्दात् प्रातिपदिकात् आमि 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इति वार्तिकेन तृज्वद्भावं बाधित्वा नुटि 'नामि' इति दीर्घे क्रोष्टूनाम् इति।

नुमचिरेति—(ई० ४७) 'इकोऽचि विभक्तौ' इति नुमः पूर्वम्, 'अचि र ऋतः' इति रेफात् पूर्वं 'विभाषा तृतीयादिष्वचि' इति तृज्वद्भावाच्च पूर्वं पूर्वविप्रतिषेधेन नुमेवेति वार्तिकार्थः। वारीणाम्, क्रोष्टूनाम्, इति क्रमेणोदाहरणानि।

स्वभुवौ—(ई० ५४)—स्वस्मात् भवतीति विग्रहे स्वभूशब्दात् क्विपि सर्वापहारे 'स्वभू' इति, प्रातिपदिकात् औ 'स्वभू औ' इति स्थिते कारकपूर्वकत्वात् 'ओः सुपि' इति यणि प्राप्ते 'न भूसुधियोः' इति निषेधे उवङि उक्त रूपं सिद्धम्।

नः—नृशब्दात् प्रातिपदिकात् सम्बुद्धिविवक्षायां सौ 'ऋतो ङि सर्वनामस्थानयोः' गुणे, रपरे, हल्ङ्यादिना सुलोपे विसर्गे 'नः' इति सिद्धम्।

कीः। 'कॄ विक्षेपे' इति धातुः। तस्यानुकरणे 'अनुकरणं प्रकृतिवद् भवति' इति पक्षे 'कॄ' इत्यस्यार्थत्वेन प्रातिपदिकात् सौ ऋकारस्य इत्वे रपरत्वे 'र्वोरुप-

धाया दीर्घ इकः' इति दीर्घे सोर्हल्ङ्यादिलोपे रेफस्य विसर्गे उक्तं रूपं सिद्धम्।

गमुल् (ई० ५३) गम्लृ शब्दात् प्रातिपदिकात् ङसि 'ऋत उत्' इत्युत्वे लपरत्वे 'संयोगान्तस्य' इति सलोपे 'गमुल्' इति।

शकुल् (ई० ५६) 'शक्लृ अस्' इति स्थिते 'ऋत उत्' इति उत्वे लपरत्वे संयोगान्तलोपे शकुल् इति सिद्धम्।

गाम् (ई० ३४)—गोशब्दात् प्रातिपदिकात् अमि 'गो अम्' इति स्थिते 'औतोऽम्शसोः' इत्यनेन ओकाराकारयोराकारादेशे उक्तं रूपं सिद्धम्। न चेह आकारादेशो न स्यात्, परत्वात् णिद्वद्भावप्रवृत्तौ वृद्धिप्रसङ्गादिति वाच्यम्? निरवकाशतया आत्वविधेः णिद्वद्भावबाधकत्वात्। नहि वृद्धिविषयादन्यत्र आत्वविधेः प्रसक्तिरस्तीति भावः।

गोतो णित्। ननु 'गोतो णित्' इति सूत्रस्य स्थाने 'ओतो णित्' इति सूत्रं कर्तव्यं तत्र विहितविशेषणञ्च। तेन सुद्योः इत्यादावपि वृद्धिः भवति। तस्य च अर्थः—ओकाराद्विहितं सर्वनामस्थानं णिद्वत् भवति।

हे भानो। ननु 'ओतो णित्' इति सूत्रे विहितविशेषणं किमर्थम् इति चेन्न, हे भानो इत्यत्र णिद्वद्भाववारणाय तस्यावश्यकत्वात्। न च 'एङ्ह्रस्वात् सम्बुद्धेः' इति सूत्रे एङ्प्रत्याहारग्रहणसामर्थ्यात् अत्र न णिद्वद्भाव इति वाच्यम्, तर्हि हे भानवः इत्यत्र णिद्वद्भावनिषेधाय तस्यावश्यकत्वात्।

न च 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति परिभाषया प्रतिपदोक्तस्यैव ग्रहणं नात्र दोष इति वाच्यम्; तर्हि विहितविशेषणं न कर्तव्यमिति दिक्।

ग्रामण्याम्—ग्रामं नयति नियच्छति इति ग्रामणीः। ग्रामणीशब्दात्-प्रातिपदिकात् ङौ 'ङेराम्नद्याम्नीभ्यः' इति नीशब्दात् परस्य ङेरामि 'एरनेकाचोऽसंयोगपूर्वस्य' इति यणि ग्रामण्याम्, इति।

धातृणाम् (ई० ३५) धातृशब्दादामि 'ह्रस्वनद्यापो नुट्' इति नुटि 'नामि' इति दीर्घे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति णत्वे 'धातृणाम्' इति।

पितरौ (ई० ३६)—पितृशब्दादौ विभक्तौ 'ऋतो ङि सर्वनामस्थानयोः' इति गुणे रपरत्वे च कृते 'पितरौ' इति। तत्र व्युत्पत्तिपक्षे नप्त्रादिग्रहणस्य नियमार्थत्वात् अप्तृन्निति दीर्घो न। अव्युत्पत्तिपक्षे तु—तृन्तृजादिष्वनन्तर्भावात् दीर्घश-

ङ्क्ैव नोदेतीति दिक् ।

80 **नृणाम्** (ई० ३४) नृशब्दादामि 'ह्रस्वनद्यापो नुट्' इति नुटि अनुबन्धलोपे 'नृ नाम्' इति स्थिते 'नामि' इति सूत्रं प्रबाध्य 'नृ च' इति विभाषया दीर्घे 'ऋवर्णान्नस्ये'ति णत्वे 'नृणाम् नॄणाम् इति सिद्धम् । अत्र 'नामी' ति दीर्घस्तु न 'सकृद्गतौ यद्बाधितं तद्बाधितमेवे' ति न्यायस्य जागरूकत्वात् ।

81 **गौः** (ई० ३५) गोशब्दात् प्रातिपदिकात् सौ 'गोतो णित्' इति ओकारात्परस्य सर्वनामस्थानस्य 'सु' इत्यस्य णिद्वद्भावे 'अचोऽञ्णिति' इति वृद्धौ सस्य रुत्वे विसर्गे 'गौः' इति सिद्धम् ।

82 **गाः** (ई० ३४) गोशब्दात् प्रातिपदिकात् शसि अनुबन्धलोपे 'औतोऽम्शसोः' इति गोशब्दस्थस्य ओकारस्य विभक्तेरकारस्य च आकारैकादेशे सस्य रुत्वे विसर्गे 'गाः' इति सिद्धम् ।

83 **राः** (ई० ३६) रैशब्दात् प्रातिपदिकात् सौ विभक्तौ 'रायो हलि' इति रैशब्दस्थस्य ऐकारस्य आकारादेशे सस्य रुत्वे विसर्गे 'राः' इति निष्पन्नम् ।

इति अजन्तपुँल्लिङ्गप्रकरणम् ।

अथ अजन्तस्त्रीलिङ्गप्रकरणम्

84 **हे रमे** । रमाशब्दात् सम्बुद्धौ सौ 'सम्बुद्धौ च' इत्यनेन आकारस्यैकारे हेरमे सु इत्यवस्थायां 'हल्ङ्यादि' सूत्रे दीर्घाकारप्रश्लेषेण स्थानिवत्वे कृतेऽपि आकाररूपस्यापोऽभावात् सुलोपाप्राप्त्या 'एङ् ह्रस्वात्सम्बुद्धेः' इति सुलोपे हे रमे इति सिद्धम् ।

85 **नच** 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्ये'ति परिभाषाविरोधात् सम्बुद्धि निमित्तीकृत्य जायमानस्यैत्वस्य सम्बुद्धिलोपनिमित्तकत्वाभावेन सुलोपो न स्यादिति वाच्यम् । तस्यानित्यत्वेनात्राप्रवृत्त्या सम्बुद्धिलोपे बाधकाभावाद् इति दिक् ।

86 **रमायाम्** (ई० ५७) रमाशब्दात् प्रातिपदिकात् ङिविभक्तौ 'रमा इ' इति स्थिते 'ङेराम्नद्याम्नीभ्यः' इत्यामादेशे 'याडापः' इति याडागमे सवर्णदीर्घे रमायाम् सिद्धम् ।

87 **सर्वासाम्** (ई० ५५) सर्वाशब्दात् प्रातिपदिकात् आमि ''सर्वा आम्' इति स्थिते 'आमि सर्वनाम्नः सुट्' इति सुटि 'सर्वासाम्' इति । नचात्र आमः अवर्णान्त-

सर्वनामविहितत्वाभावे कथं सुडिति वाच्यम्, सवर्णदीर्घे एकादेशस्य पूर्वान्तत्वेन ग्रहणात् । किंच परादिवद्भावेन आबन्तत्वमादाय तस्य लिङ्गविशिष्टपरिभाषया सर्वनामत्वमिति न दोषः ।

(88) **असंयुक्ता ये डलका इति**—अयम्भावः—भाष्यकृता 'अम्बार्थं द्व्यक्षरं यदि' इति वचनेन द्व्यच्कस्यैवार्थस्य ह्रस्वो भविष्यतीति हे अम्बाडे इत्यादिप्रयोगेषु ह्रस्वो न स्यादिति 'डलकवतां प्रतिषेधो वक्तव्यः' इति वार्तिकं प्रत्याख्यातम् । तथा च—वार्तिकाभावे 'हे अक्क' इत्यादिप्रयोगे ह्रस्वो भवति । वार्तिकसत्तायान्तु ह्रस्वो न भवतीति फलभेदनिरासाय-वार्तिकसत्वेऽपि 'असंयुक्ता ये डलकास्तद्वतां प्रतिषेधो वक्तव्यः' इत्यर्थोऽवश्यं कार्यः ।

(89) **हे अम्बिके** (ई० ४३) अम्बिकाशब्दस्य सम्बोधने हे अम्बिके इति । अत्र 'सम्बुद्धौ च' इत्यनेन अकारस्य एकारे कृते 'एङ् ह्रस्वादि' ति सुलोपो भवति । 'अम्बार्थनद्योर्ह्रस्वः' इत्यनेन ह्रस्वत्वन्तु न भवति, 'असंक्ता ये डलकास्तद्वतां ह्रस्वो न' इति वार्तिकेन निषेधात् ।

(90) **वस्तुतस्तु** 'असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न' इति नापूर्वं वार्तिकं, किन्तु फलितमेव । तथाहि—'डलकवतां प्रतिषेधो वक्तव्यः' इदं वार्तिकम् 'अम्बार्थं द्व्यक्षरं यदि' इत्यनेन भगवता भाष्यकारेण प्रत्याख्यातम् । तथा च प्रत्याख्यानपक्षे हे अक्क इत्यादौ ह्रस्वो भवति । वार्तिकसत्तायां तु ह्रस्वो न भवतीति फलभेदवारणाय वार्तिकसत्त्वेऽपि 'असंयुक्ता ये डलकास्तद्वतां प्रतिषेधो वक्तव्यः' इत्यर्थोऽवश्यं कार्यः इति वस्तुगत्या फलितं सिद्धमिति ।

(91) **जरसौ**—जराशब्दात् औ विभक्तौ शीभावात् परत्वाज्जरसादेशे 'जरसौ' इति । अत्र जरसादेशस्य स्थानिवत्वेन आबन्तत्वमादाय श्यादेशस्तु न, आ आबिति प्रश्लिष्य आकाररूपस्यैवापः सर्वत्र ग्रहणेन अल्विधित्वात् स्थानिवत्त्वाऽप्राप्तेः ।

(92) **जरसाम्** (ई० ५७)—जराशब्दादामि 'जरा आम्' इति स्थिते 'ह्रस्वनद्यापो नुट्' इति प्राप्तं नुटं बाधित्वा 'जराया जरसन्यतरस्याम्' इत्यनेन परत्वाज्जरसादेशे जरसामिति सिद्धम् ।

(93) **न च** परत्वाज्ज्जरसादेशेऽपि तस्य स्थानिवत्त्वेन आबन्ततया 'ह्रस्वनद्यापो नुट्' इति नुट् स्यादिति वाच्यम्, 'अनल्विधौ' इत्यनेन स्थानिवद्भावनिषेधात् । नचाप्त्व-

स्यालमात्रवृत्तित्वाऽभावात् कथं स्थानिवद्भावनिषेध इति वाच्यम् 'ह्रस्वनद्यापः' इत्यत्र आप्पदे आकारात्पूर्वं सवर्णदीर्घेणाकारं प्रश्लिष्य—आकाररूपो य आप् तदन्ताद ङ्गादित्यर्थस्वीकारेण आप्त्वे 'अनल्विधौ' इत्यस्याऽप्रवृत्तावपि आप्त्वस्य आमात्रवृत्तिधर्मत्वेन 'अनल्विधाविति' निषेधात् ।

94) **यद्यपि जरसादेशस्येति । अयम्भावः**—जरसावित्यादौ जरसादेशस्य स्थानिवद्भावेनाबन्तत्वमाश्रित्य 'औङ आपः' 'आङि चापः' 'याडापः' 'ह्रस्वनद्यापः' 'ङेराम्' इति पञ्चापि विधयः प्राप्नुवन्ति, परञ्च 'अनल्विधौ' इति निषेधेन स्थानिवद्भावाभावेनाबन्तत्वाभावान्न भवन्ति ।

न चाबन्तत्वधर्मस्यालमात्रवृत्तित्वाभावेन 'अनल्विधौ' इति निषेधो न स्यादिति वाच्यम् । 'औङ आपः' इत्यादिसूत्रे आकारस्य प्रश्लेषेण आकाररूपो य आप् तदन्तात्परस्य औङः शी स्यादित्याद्यर्थात् । तथाच—आकाररूपत्वधर्मः स्थानिवद्भावेन नह्यायातीति पञ्चापि विधयः न भवन्ति । इत्थञ्च 'हल्ङ्याब्भ्यः' इति सूत्रे ङी ई, आ आप् इति प्रश्लेषेण निष्कौशाम्बिरतिखट्व इत्यादौ आकाररूपधर्मस्यानयनं न स्यादिति सुलोपस्य प्रसङ्ग एव नास्तीति तदर्थं सूत्रे दीर्घग्रहणं न कर्त्तव्यम् ।

नचाकाररूपो य आप् तदन्तमित्याद्यर्थेऽपि अतिखट्वायेत्यत्र श्रूयमाणाऽकारे स्थानिवद्भावेनाप्त्वञ्चाश्रित्य याट् स्यादिति वाच्यम् । आबन्ततदाद्यभिन्नं यदङ्गं ततः परस्य याट् स्यादित्यर्थात् । एवञ्चात्र यत् खट्वा इति आबन्ततदादि न च तदङ्गमस्ति, यच्चाङ्गं वर्तते अतिखट्वेति न च तत् आबन्ततदादीति याडप्रवृत्तिरिति दिक् ।

95) **अतिखट्वाय** (ई० ४८)—ननु 'याडाप' इति सूत्रे आकारप्रश्लेषेऽपि अत्र दीर्घोत्तरमाकाररूपत्वस्य विद्यमानत्वेन स्थानिवत्वेनाप्त्वमाश्रित्य याट् कुतो नेति चेन्न, 'स्त्रीप्रत्यये चानुपसर्जनेने'ति बलात् आबन्तं यत्तदादि तद्रूपादङ्गात् परस्य याडित्यर्थेनादोषादिति दिक् ।

96) **नसा** (ई० ४६)—नासिकाशब्दात् टाविभक्तौ 'पद्दन्न' इति सूत्रेण नासिकाशब्दस्य नसादेशो नसा इति सिद्धम् ।

97) **निट्सु** (ई० ५२)—निशाशब्दस्य सप्तमीबहुवचने 'पद्दन्न' इति सूत्रेण

'निश्' आदेशे 'निश् सु' इति स्थिते 'व्रश्चे' ति सूत्रेण शस्य षत्वे तस्य जश्त्वे डकारे 'डः सि धुट्' इति धुटि डस्य धस्य च चर्त्वे निट्त्सु इति सिद्धम्। धुडभावपक्षे 'निट्सु इति।

नच 'निट् त् सु' इति स्थिते तकारस्य ष्टुत्वं कुतो नेति वाच्यम् स्वादिष्विति पदत्वेन 'न पदान्ताट्टोरनाम्' इति निषेधात्। नच 'चयो द्वितीया' इत्यनेन धुट्पक्षे तस्य थः कुतो नेति वाच्यम्, 'नादिन्याक्रोशे' इति सूत्रभाष्ये 'चयो द्वितीया' इत्यस्य पाठदर्शनेन तत्कर्तव्ये चर्त्वस्य परत्वेन असिद्धत्वात्। नच जश्त्वात् प्राक् 'षढोः कः सि' इति षकारस्य ककारः कुतो नेति वाच्यम्, जश्त्वं प्रत्यसिद्धत्वात्।

निज्भ्याम् (ई० ४८)—केचित्तु 'एकाचो बशो' इत्युत्तरसूत्रे धातोरित्यस्यानुवृत्त्या मध्ये व्रश्चादिसूत्रेपि 'दादेर्धातोर्घः' इति सूत्राद्धातोरित्यनुवर्तयन्ति। तन्मते निशाशब्दस्य भ्यामि 'पद्दन्न' इति सूत्रेण निशादेशे 'निश्भ्याम्' इति स्थिते निशित्यस्य धातुत्वाऽभावात् षत्वाऽभावे 'झलाञ्जशोऽन्ते' इति जश्त्वेन शकारस्य स्थानसाम्याज्जकारे निज्भ्याम् इति सिद्धम्। अत्र कुत्वं तु न भवति, जश्त्वस्याऽसिद्धत्वात्।

निच्श् (५१) सिद्धान्तिनस्तु—'निट्त्सु'-'निट्सु' इति बदन्ति। वस्तुतस्तु तन्मन्दम्। 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्युत्तरसूत्रे 'धातोः' इत्यस्यानुवृत्त्या तन्मध्यपतिते 'व्रश्चा'दि सूत्रेऽपि तदनुवृत्तेरौचित्यात्। एवञ्च 'निश् सु' इति स्थिते शान्तस्य धातुत्वाभावेन 'व्रश्चभ्रस्जसृजमृज-यज-राज-भ्राजच्छशां षः' इत्यस्याऽप्रवृत्त्या 'झलां जशोन्ते' इति जश्त्वेन शकारस्य स्थानसाम्यात् तकारे कृते 'स्तोः श्चुना श्चुः' इति श्चुत्वेन शकारे कृते 'खरि च' इत्यनेन चर्त्वे 'निच्शु' इति। 'शश्छोटि' इति छत्वपक्षे 'निच्छु' इत्यपि सिद्ध्यति।

पृतः (ई० ४१)—पृतनाशब्दात् शसि 'पृतना अस्' इति स्थिते 'मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा' इति पद्दन्नसूत्रस्थवार्तिकेन पृदादेशे रुत्वे विसर्गे च पृतः इति। पृदादेशाभावपक्षे 'पृतना' इति रमावत्। (पृतना = सेना)

मत्यै (ई० ६३, ४६)—मतिशब्दात् ङेविभक्तौ 'ङिति ह्रस्वश्च' इति नदीसंज्ञायाम् 'आण्नद्याः' इत्यादि 'आटश्च' इति वृद्धौ यणि 'मत्यै' इति नदीत्वाऽभावपक्षे 'शेषो घ्यसखि' इति घित्वात् 'घेर्ङिति' इति गुणेऽयादेशे 'मतये' इति।

(103) **प्रियतिसृ**—(ई० ३४) प्रियास्तिस्रो यस्य तत्कुलं 'प्रियतिसृ' इति। प्रियत्रिशब्दात् सौ तस्य लुकि 'न लुमते' त्यस्य अनित्यत्वपक्षे प्रत्ययलक्षणेन विभक्तिपरकत्वात् 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इत्यनेन तिस्रादेशे प्रियतिसृ इति सिद्धम्।

(104) **नच**—'न लुमते' त्यस्यानित्यत्वे किं प्रमाणमिति वाच्यम्? 'इकोऽचि विभक्तौ' इति सूत्रस्थस्य अज् ग्रहणस्य प्रमाणत्वात्। तत्र हि हलादिषु भ्यामादिषु सत्यपि नुमि 'नलोपः प्रातिपदिकान्तस्य' इत्यनेनैव लोपसम्भवात् अचीति व्यर्थं स्यात्। नच सम्बुद्धिव्यावृत्त्यर्थमज् ग्रहणम्, तत्रहि नुमि सति 'न ङि सम्बुद्ध्योः' इति निषेधेन नकारश्रवणादिति वाच्यम्, सम्बुद्धेर्लुका लुप्ततया प्रत्ययलक्षणाभावेन तत्र नुमः प्राप्तेरभावात्। अत एव 'हे त्रपो, हे त्रपु' इति भाष्योदाहरणं सङ्गच्छत इति दिक्।

(105) **स्त्रियामिति त्रिचतुरोः** (ई० १५)—अयं भावः—श्रुतानुमितयोः श्रुतसम्बन्धो बलीयानिति न्यायेन स्त्रियामित्यस्य त्रिचतुरोरेव विशेषणत्वन्नत्वङ्गस्य, तेन प्रियास्त्रयस्त्रीणि वा यस्या इत्यर्थे प्रियत्रिशब्दस्य मतिवद्रूपम्। आमि तु प्रियत्रयाणामिति विशेषः। प्रियास्तिस्रो यस्येत्यर्थे तिस्रादेशे प्रियतिसा प्रियतिस्रावित्यादि। प्रियास्तिस्रो यस्य तत्कुलमित्यर्थे स्वमोर्लुक्यपि 'न लुमतेति' निषेधस्यानित्यत्वात्पक्षे तिस्रादेशे प्रियतिसृ इति। अन्यत्र रादेशात्पूर्वविप्रतिषेधेन नुमि प्रियतिसृणी इत्यादि, टादौ तृतीयादिष्विति पुंवद्भावे प्रियतिस्रा प्रियतिसृणेत्यादीति।

(106) **प्रियत्रि** (ई० ३६, ४५)—प्रियास्तिस्रो यस्य तत्कुलमिति विग्रहे त्रिशब्दस्य स्त्रियां वर्तमानत्वेऽपि 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति तिस्रादेशो न भवति, प्रियत्रिशब्दात् परस्य प्रथमैकवचनविभक्तेः सकारस्य 'स्वमोर्नपुंसकात्' इति लुप्तत्वात्, 'न लुमताङ्गस्य' इति प्रत्ययलक्षणनिषेधाच्च। 'इकोऽचि विभक्तौ' इति सूत्रस्थेन अचिग्रहणेन 'न लुमताङ्गस्य' इत्यस्यानित्यत्वपक्षे तु प्रत्ययलक्षणेन विभक्तिपरकत्वात् तिस्रादेशे 'प्रियतिसृ' इत्यपि भवति।

(107) **प्रियतिसा** (ई० ३९) 'श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान्' इति न्यायेन स्त्रियामित्यस्य त्रिचतुरोरेव विशेषणं न त्वङ्गस्य, तेन प्रियास्तिस्रो यस्य इति विग्रहे समासे 'स्त्रियाः पुंवत्' इति प्रियशब्दस्य पुंवद्भावे 'प्रियत्रि' इत्यस्मात् सौ, प्रियत्रिशब्दस्य पुंल्लिगत्वेपि त्रिशब्दस्य स्त्रीलिङ्गत्वात् तिस्रादेशे 'ऋदुशनस्' इत्यनङि दीर्घे सुलोपे प्रियतिसा इति सिद्धम्।

(108) **प्रियतिस्रा** (ई० ३६) प्रियास्तिस्रो यस्य तत्कुलं प्रियत्रि इति प्रियत्रिशब्दात् टाविभक्तौ अनुबन्धलोपे 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इत्यनेन पुंवद्भावपक्षे नुमभावात् 'अचि र ऋतः' इत्यनेन रत्वे तिस्रादेशे प्रियतिस्रा इति सिद्धम् । पुंवत्त्वाभावपक्षे तु तिस्रादेशे 'इकोऽचि विभक्तौ' इति नुमि णत्वे 'प्रियतिसृणा' इति सिद्ध्यति ।

(109) **प्रियतिसृणाम्**—प्रियास्तिस्रो यस्य तत्कुलमिति विग्रह 'न लुमते' त्यस्यानित्यत्वपक्षे षष्ठीबहुवचने त्रयादेशं बाधित्वा परत्वात् तिस्रादेशे सति रत्वं बाधित्वा 'नुमचिरेति' नुटि णत्वे 'न तिसृचतसृ' इति नामि दीर्घ-निषेधे प्रियतिसृणाम् इति सिद्धम् ।

अत्र प्रियास्तिस्रो यस्य तत्कुलमिति विग्रहे 'प्रियत्रि' 'प्रियतिसृ' इति रूपद्वयं भवति । तथाहि—उक्तविग्रहे त्रिशब्दस्य स्त्रियां वर्तमानत्वेऽपि प्रियत्रिशब्दात् परस्य सोः 'स्वमोर्नपुंसकात्' इति लुकि तस्य 'न लुमताङ्गस्य' इति प्रत्ययलक्षणनिषेधात् विभक्तिपरत्वाऽभावेन 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति तिस्रादेशाऽभावात् 'प्रियत्रि' इति, 'इकोऽचि विभक्तौ' इत्यत्राचिग्रहणेन 'न लुमताङ्गस्य' इत्यस्यानित्यत्वपक्षे तु प्रत्ययलक्षणेन विभक्तिपरत्वात् तिस्रादेशे 'प्रियतिसृ' इति ।

(110) **सखि** (ई० ४७) 'सख्यशिश्वीति भाषायाम्' सखिशब्दात् ङीषि सखीशब्दः, तस्य सौ 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषया 'अनङ् सौ' इत्यनङि णिद्वद्भावे च प्राप्ते 'विभक्तौ लिङ्गविशिष्टाग्रहणम्' इति निषेधे हल्ङ्यादिना सोर्लोपे 'सखी' इति ।

(111) **स्त्रीम्** (ई० ४४, ५७)—स्त्रीशब्दादमि 'वाऽम्शसोः' इत्यङि 'स्त्रियम्' इति पक्षे 'अमि पूर्वः' इति पूर्वरूपे 'स्त्रीम्' इति ।

(112) **अतिस्त्रये** (ई० ३६, ५०, ५७) स्त्रियमतिक्रान्तः इति विग्रहे अतिस्त्रिशब्दात् ङेविभक्तौ गुणनाभावोत्वनुड्भिः परत्वात् पुंसि बाध्यते इति हरिकारिकोक्तदिशा इयङं बाधित्वा 'घेर्ङिति' इति घित्वाद् गुणे अयादेशे उक्तं रूपं सिद्धम् । स्त्रियमतिक्रान्तेति विग्रहे तु 'ङिति ह्रस्वश्च' इति नदीत्वादाटि वृद्धौ इयङि अतिस्त्रियै इति नदीत्वाभावे अतिस्त्रये इति ।

(113) **अतिस्त्रियै** (ई० ५५)—स्त्रियमतिक्रान्तायै इत्यर्थे ङे विभक्तौ 'ङिति ह्रस्वश्चे' ति ह्रस्वान्तत्वान्नदीसंज्ञाविकल्पः । अस्त्रीति निषेधस्तु न शंक्यः । तस्येय-

ङुवङ्स्थानावित्यनेन सम्बद्धतया दीर्घस्यैव निषेधकत्वान्न तु ह्रस्वस्य तत आटि वृद्धौ इयङादेशे च सिद्धम्। पक्षे गुणे अतिस्त्रये इति।

(114) **प्रधीशब्दस्येति**—आध्यै प्रध्यै ब्राह्मण्यै इति भाष्यप्रयोगेण पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति वृत्तिकारमते प्रकृष्टं ध्यायतीत्यर्थे प्रधीशब्दस्य नित्यस्त्रीलिङ्गतया लक्ष्मीवद्रूपम्। उक्तभाष्यप्रयोगे बहुव्रीहिमाश्रित्य लिङ्गान्तरानभिधायकत्वं नित्यस्त्रीत्वमिति कैयटमते उक्तेऽर्थे प्रधीशब्दस्य पुंवद् रूपम्। प्रकृष्टा धीरित्यर्थे उभयमते लक्ष्मीवद्रूपम्। एवं सुष्ठु ध्यायतीत्यर्थे सुधीशब्दस्य वृत्तिकारमते लक्ष्मीवत्, कैयटमते पुंवत्। ग्रामणी-कटप्रू-खलपू-इत्यादीनामुभयमते पुंवदेव, ग्रामनयनादेः स्वभावतः पुंधर्मत्वात्।

(115) **पदान्तरं बिनापि—अयम्भावः—वृत्तिकारमते** ये शब्दाः स्त्रीति पदं विनापि स्त्रीलिङ्गं वक्तुं समर्थास्तेषां शब्दानां स्त्रीलिङ्गवद्रूपं स्यात्। यथा—प्रकृष्टं ध्यायतीति विग्रहे प्रधीशब्दस्य लक्ष्मीशब्दवद्रूपं स्यात्। यतः श्रीभगवतो ध्याने स्त्रीपुरुषयोर्द्वयोरप्याज्ञया प्रधी स्त्रीति विशेष्यविशेषणभावं विनापि प्रधीशब्दः स्त्रीलिङ्गं वक्तुं समर्थ इति नित्यस्त्रीत्वं तस्य। कैयटमते तु ये शब्दा नपुंसकलिङ्गं पुंल्लिङ्गञ्च न वदेयुस्तेषामेव शब्दानां नित्यस्त्रीत्वं भवति, एवञ्च प्रधीः पुरुषः प्रधि कुलमित्याद्यर्थेन प्रधीशब्दस्य नित्यस्त्रीत्वाभावेन लक्ष्मीशब्दवद्रूपन्न स्यादिति।

(116) **हे सुभ्रूः।** ङूप्रत्ययान्ताद् भ्रूब्दात् सु योगे सुभ्रूशब्दात् सम्बोधने सौ अस्त्रीप्रत्ययान्तत्वात् 'गोस्त्रियोरुपसर्जनस्ये'ति ह्रस्वाभावे 'नेयङुवङ्स्थानावस्त्री' इति भ्रूशब्दस्य तदन्तस्य च नदीत्वनिषेधात् 'अम्बार्थनद्योर्ह्रस्वः' इति सिद्ध्यति।

(117) **कथं तर्हि हा पितः क्वासि हे सुभ्रु।** (ई० ५५) ननु यदि भ्रुशब्दस्य उवङ्स्थानित्वेन समुदायस्यापि उवङ्स्थानित्वात् 'नेयङुवङि-'ति निषेधेन नदीत्वाप्राप्त्या सम्बोधने ह्रस्वत्वाभावात् कथं हे सुभ्रु इति भट्टिप्रयोगः संगच्छते इति चेत् श्रूयताम्। प्रमाद एवायमिति बहवः। महाकवीनां क्वचित् एतादृशाः प्रयोगाः क्षम्या एव। केचित्तु-सामान्ये नपुंसकत्वमाश्रित्य ह्रस्वत्वं वदन्ति।

(113) **पुनर्भ्वाम्** (ई० ४४)—पुनर्भूशब्दात् आमि 'दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्यः' इति प्राप्तं यणं प्रबाध्य परत्वात् नद्यन्तत्वान्नुटि दीर्घे 'एकाजुत्तरपदे णः' इति णत्वे पुनर्भूणामिति सिद्धम्।

(119) **सर्वस्याः** (ई० ३४)—सर्वाशब्दात् ङसि अनुबन्धलोपे 'सर्वा अस्' इति स्थिते 'याडापः' इति याटं प्रबाध्य 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याटि आबन्तस्य ह्रस्वत्वे च कृते अनुबन्धलोपे 'सर्वस्या अस्' इति स्थिते सवर्णदीर्घे सस्य रुत्वे विसर्गे सर्वस्याः इति ।

(120) **उत्तरपूर्वस्यै** (ई० ३५)—उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालमिति विग्रहे 'दिङ्नामान्यन्तराले' इति समासनिष्पन्नात् उत्तरपूर्वाशब्दात् ङेविभक्तौ 'विभाषा दिक्समासे बहुव्रीहौ' इति विभाषया सर्वनामसंज्ञायां 'सर्वनाम्नः स्याड्—' इति स्याडागमे ह्रस्वे च कृते 'वृद्धिरेचि'ति इति वृद्धौ उत्तरपूर्वस्यै इति । पक्षे सर्वनामसंज्ञाऽभावे 'याडापः' इति याटि वृद्धौ उत्तरपूर्वायै इति सिद्धम् ।

(121) **उत्तरपूर्वायै** (ई० ३४)—'विभाषा दिक्समासे बहुव्रीहौ' इति सूत्रेण लक्षणप्रतिपदोक्तपरिभाषया 'दिङ्नामान्यन्तराले' इति दिक्छब्दमुच्चार्यनिष्पन्नप्रतिपदोक्तदिक्समास एव सर्वनामसंज्ञाविधानात् 'योत्तरा सा पूर्वा यस्याः उन्मुग्धायाः' इति विग्रहे 'अनेकमन्यपदार्थे' इति बहुव्रीहिसमासनिष्पन्नात् उत्तरपूर्वाशब्दात् ङेविभक्तौ 'याडापः' इति याटि 'वृद्धिरेचि' इति वृद्धौ उत्तरपूर्वायै इति सिद्धम् ।

(121) **हे अम्ब** (ई० ९ ३०)—अम्बाशब्दात् सम्बोधनविवक्षायां सौ 'अम्बार्थनद्योर्ह्रस्व' इति ह्रस्वत्वे सुलोपे हे अम्ब इति ।

(122) **ङिति ह्रस्वश्च**—अत्र सूत्रे 'ङिति' इत्येकं पदम् । इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ङिति नदीसंज्ञौ वा स्तः इति तस्यार्थः । 'ह्रस्वश्च' इत्यपरं पदम् । 'ह्रस्वौ इवर्णोवर्णौ ङिति स्त्रियां नदीसंज्ञौ वा स्तः' इति तस्यार्थः । अत्र 'नेयङुवङ्स्थानावस्त्री' इत्यतो अनुवृत्तम् अस्त्रीति तु इयङुवङ्स्थानावित्यादिप्रथमवाक्यविहितनदीत्वस्यैव पर्युदासः, न तु ह्र वावित्यादिद्वितीयवाक्यविहितनदीत्वस्यापि, तत्सम्बद्धस्यैवानुवृत्तेः ।

(123) **मत्यै** (ई० ३२)—मतिशब्दात् ङेविभक्तौ अनुबन्धलोपे 'मति ए' इति जाते 'ङिति ह्रस्वश्च' इति नदीसंज्ञायाम् 'आण्नद्याः' इत्याटि आटश्च इति वृद्धौ 'इको यणचि' इति यण् 'मत्यै' इति । नदीत्वाभावे 'शेषो घ्यसखि' इति घिसंज्ञायां 'घेर्ङिति' इति गुणे 'एचोऽयवायावः' इत्ययादेशे 'मतये' इति सिद्धम् ।

(124) **मत्याम्** (ई० ५६)—मतिशब्दात् ङिविभक्तौ 'ङिति ह्रस्वश्च' इति नदीसंज्ञायाम् 'इदुद्भ्याम्' इति ङेरामि कृते स्थानिवद्भावेन ङित्वमादाय 'आण्नद्याः;

इत्यादि 'आटश्च' इति वृद्धौ 'इको यणचि' इति यणि मत्याम् इति । नदीसंज्ञाभावे 'शेषो घ्यसखि' इति घिसंज्ञायाम् 'अच्च घेः' इति ङेरौत्वे घेरकारादेशे च कृते 'वृद्धिरेचि' इति वृद्धौ मतौ इति सिद्धम् ।

तिस्रः (ई० ३५)—त्रिशब्दाज्जसि शसि च विभक्तौ 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति तिस्रादेशे 'ऋतो ङि—' इति गुणं प्रबाध्य पूर्वसवर्णदीर्घे प्राप्ते तमपि प्रबाध्य 'अचि र ऋतः' इति रेफादेशे सस्य रुत्वे विसर्गे 'तिस्रः' इति ।

तिसृणाम् (ई० ३६)—त्रिशब्दादामि विभक्तौ 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति त्रिशब्दस्य तिस्रादेशे 'तिसृ आम्' इति स्थिते 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इत्युक्त्या 'अचि र ऋतः' इति प्राप्तं रेफादेशं बाधित्वा 'ह्रस्वनद्यापो नुट्' इति नुटि अनुबन्धलोपे 'नामि' इति दीर्घे प्राप्ते 'न तिसृचतसृ' इति निषेधे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति णत्वे तिसृणाम् इति ।

त्रिशब्दस्य त्रिषु लिङ्गेषु रूपाणि (ई० ३७)—

(त्रिशब्दो नित्यं बहुवचनान्तः)

पुंसि	स्त्रियाम्	नपुंसके
त्रयः	तिस्रः	त्रीणि
त्रीन्	तिस्रः	त्रीणि
त्रिभिः	तिसृभिः	त्रिभिः
त्रिभ्यः	तिसृभ्यः	त्रिभ्यः
त्रयाणाम्	तिसृणाम्	त्रयाणाम्
त्रिषु	तिसृषु	त्रिषु
हे त्रयः	हे तिस्रः	हे त्रीणि

स्त्रीः (ई० ३५)—स्त्रीशब्दात् शसि 'स्त्री-अस्' इति स्थिते 'वाऽम्शसोः' इति इयङि सस्य रुत्वे विसर्गे स्त्रियः इति । पक्षे पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे स्त्रीः इति सिद्धम् ।

स्त्रियै (ई० ५४)—स्त्रीशब्दात् ङेविभक्तौ 'यूस्त्र्याख्यौ नदी' इति नदीसंज्ञायाम् 'आण्नद्याः' इत्यादि 'आटश्च' इति वृद्धौ 'स्त्रियाः' इति इयङि अनुबन्धलोपे स्त्रियै इति सिद्धम् ।

हे श्रीः (ई० ३४)—श्रीशब्दात् सम्बुद्धिविवक्षायां सौ सकारस्य रुत्वे विसर्गे

रूपं सिद्धम् । 'यूस्त्र्याख्यौ' इति नदीत्वात् 'अम्बार्थे'ति ह्रस्वत्वं तु न 'नेयङुवङ्-स्थानावस्त्री' इति नदीत्वप्रतिषेधात् । सुलोपस्तु न, अङ्यन्तत्वात् ।

स्त्रीणाम्—स्त्रीशब्दादामि 'यूस्त्र्याख्यौ नदी' इति नदीत्वात् 'ह्रस्वनद्यापो नुट्' इति नुटि अनुबन्धलोपे पर्जन्यवल्लक्षणप्रवृत्त्या 'नामि' इति दीर्घे 'अट्कुप्वाङ्नुम्-व्यवायेऽपि' इति णत्वे स्त्रीणाम् इति ।

श्रियै (ई० ३५)—श्रीशब्दात् ङे विभक्तौ 'यूस्त्र्याख्यौ नदी' इति प्राप्तनदीत्वस्य 'नेयङुवङ्स्थानावस्त्री' इति निषेधे कृते 'ङिति ह्रस्वश्च' इत्यनेन विभाषया नदी-संज्ञायाम् 'आण्नद्याः' इत्याटि 'आटश्च' इति वृद्धौ 'अचि श्नुधातुभ्रुवां य्वोरियङ्-वङौ इति इयङि अनुबन्धलोपे श्रियै इति । नदीत्वाऽभावे इयङि श्रिये इति ।

श्रीणाम् (ई० ४९)—श्रीशब्दादामि विभक्तौ 'वाऽमि' इति नदीसंज्ञायां 'ह्रस्वनद्यापो नुट्' इति नुटि अनुबन्धलोपे पर्जन्यवल्लक्षणप्रवृत्त्या 'नामि' इति दीर्घे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति णत्वे श्रीणाम् इति । नदीत्वाभावे 'अचिश्नुधातु-भ्रुवां य्वोरियङुवङौ' इति इयङि श्रियाम् इति भवति ।

भ्रुवाम् (ई० ३७) भ्रूशब्दात् सप्तम्येकवचने ङिविभक्तौ 'ङिति ह्रस्वश्च' इति विभाषया नदीसंज्ञायां 'ङेराम्नद्याम्नीभ्यः' इति 'ङेरामि 'आण्नद्याः' इति आटि 'आटश्च' इति वृद्धौ 'अचिश्नुधातु' इत्युवङि अनुबन्धलोपे भ्रुवाम इति । नदीत्वा-भावे उवङि 'भ्रुवि' इति । षष्ठीबहुवचने तु 'वामि' इति विकल्पेन नदीसंज्ञायां भ्रूणां, भ्रुवामिति रूपद्वयं भवति ।

क्रोष्ट्री (ई० ३४)—क्रोष्टुशब्दात् स्त्रीत्वविवक्षायां 'स्त्रियां च' इति तृज्व-द्भावे क्रोष्टृ इति जाते 'ऋन्नेभ्यो ङीप्' इति ङीपि यणि 'क्रोष्ट्री' इति । तस्मात् सौ हल्ङ्यादिना सुलोपे उक्तं रूपं सिद्धम् ।

स्वसा (ई० ३७) स्वसृशब्दात् सौ 'ऋन्नेभ्यो ङीप्' इति ङीपि प्राप्ते 'न षट्स्वस्रादिभ्यः' इति तन्निषेधे 'ऋदुशनस्पुरुदंसोऽनेहसां च' इत्यनङि अनुबन्धलोपे 'स्वसन् स' इति जाते 'अप्तृन्तृच्—' इति दीर्घे हल्ङ्यादिलोपे 'नलोपः प्राति-पदिकान्तस्य' इति नलोपे स्वसा इति । इति अजन्तस्त्रीलिङ्गप्रकरणम् ।

अथ अजन्तनपुंसकलिङ्गप्रकरणम्

ज्ञानानि (ई० ४९) ज्ञानशब्दात् प्रातिपदिकात् जसि शसि च विभक्तौ 'जश्शसोः शिः' इति श्यादेशे 'शि सर्वनामस्थानम्' इति शि इत्यस्य सर्वनामस्थान-

संज्ञायां 'नपुंसकस्य झलचः' इत्यनेन नुमि अनुबन्धलोपे 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति दीर्घे ज्ञानानि इति ।

कतरत् (ई० ४७)—कतरशब्दात् सौ 'अतोऽम्' इति सूत्रं प्रबाध्य 'अद्ड्डुतरादिभ्यः पञ्चभ्यः' इति सोरद्डि अनुबन्धलोपे 'कतर अद्' इति दशायां 'यचि भम्' इत्यनेन कतर इत्यस्य भसंज्ञायां 'टेः' इति सूत्रेण टिलोपे 'वाऽवसाने' इति चर्त्वे 'कतरत्' इति । चर्त्वाऽभावे 'कतरद्' इति ।

हे वारे (ई० ४५)—वारिशब्दात् सम्बोधनैकवचने सौ 'स्वमोर्नपुंसकात्' इति सोर्लुकि 'न लुमताङ्गस्य' इत्यस्यानित्यत्वपक्षे 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति प्रत्ययलक्षणेन 'ह्रस्वस्य गुणः' इति सम्बुद्धिनिमित्तके गुणे 'हे वारे' इति । 'न लुमते' त्यस्य नित्यत्वपक्षे तु प्रत्ययलक्षणनिषेधे 'हे वारि' इति । पक्षद्वयस्वीकारादेव 'हे त्रपो हे त्रपु' इति भाष्योदाहरणं संगच्छते ।

ननु 'न लुमते' त्यस्याऽनित्यत्वे किं मानम् ? इति चेच्छृणु—'इकोऽचि विभक्तौ' इत्यत्र अज्ग्रहणं किमर्थम् हलादिषु भ्यामादिषु हि सत्यपि नुमि 'नलोपः प्रातिपदिकान्तस्ये'ति नस्य लोपसम्भवात् । न च सम्बुद्धिव्यावृत्त्यर्थं अज्ग्रहणम्, अन्यथा तत्र नुमि सति 'न ङिसम्बुद्ध्योः' इति निषेधेन नकारश्रवणप्रसंगः इति वाच्यम्, सम्बुद्धेर्लुका लुप्ततया प्रत्ययलक्षणाभावेन तत्र नुमः प्राप्तेरभावात् । 'न लुमते' त्यस्याऽनित्यत्वे तु सम्बुद्धौ प्रत्ययलक्षणेन प्राप्तं नुमं वारयितुम् अज् ग्रहणं 'न लुमते' त्यस्याऽनित्यत्वे लिंगमिति **तत्वविदः** ।

वारिणे (ई० ३२)—वारिशब्दात् चतुर्थ्येकवचने 'वारि ए' इति दशायां 'शेषो घ्यसखि' इति घिसंज्ञायां 'घेर्ङिति' इति गुणे प्राप्ते 'वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन' इति पूर्वविप्रतिषेधस्य प्रबलत्वात् 'इकोऽचि विभक्तौ' इति नुमि 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति णत्वे 'वारिणे' इति जातम् ।

हे **कतरद्** (ई० ४७)—कतरशब्दात् सम्बोधनविवक्षायां सौ तस्य 'अद्ड्डुतरादिभ्य पञ्चभ्यः' इत्यनेन अद्डादेशे डित्वात् 'टेः' इत्यनेन टिलोपे हल्ङ्यादिना सुलोपे 'वावसाने' इत्यनेन चर्त्वे उक्तं रूपं सिद्धम् ।

ननु अद्विधानेनैव पररूपेण इष्टसिद्धेः डित्करणं किमर्थमिति चेन्न, तथा सति पररूपं बाधित्वा पूर्वसवर्णदीर्घापत्तेः । नचैवं पूर्वसवर्णदीर्घाऽभावाय सोर्दकार एव विधी-

यतामिति वाच्यम्, सोर्दकारादेशे सति तस्य स्थानिवत्त्वेन सम्बुद्धित्वात् ह्रस्वान्ताङ्गात्परत्वाच्च 'एङ् ह्रस्वादि'ति सम्बुद्धिलोपः स्यात् ।

अजरम् (ई० ३६)—अविद्यमाना जरा यस्य कुलस्येति विग्रहे 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोप' इत्यनेन विद्यमानपदस्य लोपे 'गोस्त्रियोः' इति ह्रस्वे 'अजर' इति, तस्मादजरशब्दात् सौ तस्य अमादेशे पूर्वरूपे उक्तं रूपं सिद्धम् । जरसादेशस्तु न, सन्निपातपरिभाषाविरोधात् ।

अजरसम् (ई० ५५) 'अजर अम्' इति स्थिते 'स्वमोर्नपुंसकात्' इति लुक्प्राप्तस्तं बाधित्वा तदपवादः 'अतोऽम्' इत्यम्भावः प्राप्तः, तं बाधित्वा 'विप्रतिषेधे परं कार्यम्' इति परत्वाज्जरस् 'अजरसम्' इति । न च लुगपवादस्याम्भावस्य जरसादेशेन बाधितत्वात् 'अपवादे निषिद्धे पुनरुत्सर्गस्य स्थितिः' इति न्यायात् अमो लुक् स्यादिति वाच्यम् ? जरसादेशानन्तरम्-अम्सन्निपातमाश्रित्य प्रवृत्तस्य जरसः अमो लुकि निमित्तत्वाभावान्न लुक् ।

अजरांसि (ई० ५३)—अजरशब्दात् जसि अनुबन्धलोपे 'अजर अस्' इति स्थिते जरसः पूर्वमेव शिभावे कृते तस्य सर्वनामस्थानत्वात् तस्मिन् परे नुम् जरसोः प्राप्तयोः नुमपेक्षया परत्वाज्जरसि ततो झलन्तत्वान्नुमि 'सान्तमहतः संयोगस्य' इति दीर्घे 'नश्चापदान्तस्य झलि' इत्यनुस्वारे 'अजरांसि' इति ।

उदानि (ई० ५६)—उदकशब्दात् शसि विभक्तौ 'जश्शसोः शिः' इत्यनेन शसः शिभावे 'पद्दन्न' इत्यादिसूत्रेण उदन्नादेशे 'सर्वनामस्थाने चे'ति दीर्घे 'उदानि' इति सिद्धम् । 'अल्लोपोऽनः' इत्यनेन अल्लोपस्तु न, शेः सर्वनामस्थानत्वात् ।

हृन्दि (ई० ३५)—हृदयशब्दात् शसि शसः शिभावे "पद्दन्न" इत्यादिसूत्रेण हृदयशब्दस्य हृदादेशे 'नपुंसकस्य झलचः' इति ऋकारात् परतो नुमि 'नश्चापदान्तस्य' इत्यनुस्वारे तस्य परसवर्णे नकारे हृन्दि इति सिद्धम् ।

उद्ना (ई० ३९)—उदकशब्दात् तृतीयैकवचने 'उदक आ' इति स्थिते 'पद्दन्नोमास'—ति सूत्रेण उदकशब्दस्य उदन्नादेशे अल्लोपे 'उद्ना' इति सिद्धम् ।

आसानि (ई० ४१)—आस्यशब्दात् शसि 'जश्शसोः शिः' इति शसः शिभावे 'पद्दन्नोमास' इत्यादिसूत्रेण आस्यशब्दस्य आसन्नादेशे 'शिसर्वनामस्थानमि' ति सूत्रेण सर्वनामस्थानसंज्ञायाम् 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति दीर्घे आसानि इति सिद्धम् ।

आस्ना—(ई० ३७)—आस्यशब्दात् टाविभक्तौ 'पद्दन्न' इति सूत्रेण आस्यशब्दस्य आसन्नादेशे 'अल्लोपोऽनः' इति टिलोपे आस्ना इति ।

श्रीपाय (ई० ५५)—श्रीपाशब्दात् ङौ 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वे ङेर्यादेशे 'सुपि च' इति दीर्घे 'श्रीपाय' इति । सन्निपातपरिभाषा तु 'कष्टाय क्रमणे' इति निर्देशात् न प्रवर्तते ।

नन्वत्र ह्रस्वत्वे कृतेऽपि 'प' इत्यस्य 'एकदेशविकृत' न्यायेन धातुत्वानपायात् दीर्घे कृते आकारान्तत्वाच्च 'आतो धातोः' इत्याल्लोपः स्यात्, यादेशस्य स्वतो यकारादितया स्थानिवत्त्वेन स्वादिप्रत्ययतया च तस्मिन् परे भत्वस्यापि सत्त्वादिति चेन्न, 'सन्निपातपरिभाषा' विरोधात् । तथाहि ह्रस्वत्वमवर्णत्वञ्च समुदितं यादेशस्य उपजीव्यम्, तत्र 'कष्टाय' इति निर्देशात् सन्निपातपरिभाषां बाधित्वा कृतेऽपि दीर्घे ह्रस्वांशस्यैव निवृत्तिः । अवर्णत्वांशस्त्वनुवृत्त एव तस्याल्लोपेन निवृत्तौ उपजीव्यविघातः स्यादेवेति, भवेदेव सन्निपातपरिभाषाविरोधः । वस्तुतस्तु—'आतो धातोः' इत्यत्र 'लक्षणप्रतिपदोक्त' परिभाषया प्रतिपदोक्ताऽऽकारस्य ग्रहणात् प्रकृते आकारस्य लाक्षणिकत्वेन लोपप्रसक्तिरेव नास्तीति दिक् ।

न लुमताङ्गस्यानित्यत्वात् । अयम्भावः—'इकोऽचि विभक्तौ' इति सूत्रेणाजादिविभक्तौ हलादिविभक्तौ च सर्वत्रैव नुमि सति, अजादिषु नुम इष्टत्वात् हलादिषु च स्वादिष्वसर्वनामस्थाने' इति सूत्रेण पदसंज्ञायाम् 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे वारिभ्यामित्यादिप्रयोगे नास्ति किमपि दूषणमिति अज्ग्रहणं व्यर्थं सत् 'न लुमताङ्गस्य' इति सूत्रस्यानित्यत्वं ज्ञापयति । एवञ्च 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति सूत्रेण सम्बुद्धौ सुविभक्तित्वाश्रयणेन नुमि, 'न ङिसम्बुद्धयोः' इति नलोपनिषेधे हे वारिन्नित्यनिष्टं रूपं स्यादिति स्वांशे चारितार्थ्यम् । फलञ्चात्रैव 'हे वारे' इत्यत्र 'ह्रस्वस्य गुण' इति गुणरूपम् ।

वृद्ध्यौत्वेति (ई० ५९)—'अचोञ्णिति' इति वृद्धेः, 'अच्च घः' इति औत्वात्, तृज्वत्क्रोष्टुः, इति तृज्वद्भावात् 'घेर्ङिति' इति गुणात् पूर्वं पूर्वविप्रतिषेधेन नुम् इति वार्तिकस्यार्थः । अतिसखिनी, वारिणी, प्रियक्रोष्टूनि, वारिणे इति क्रमेण उदाहरणानि ।

वारीणाम्—(ई० ४५)—वारिशब्दाद् आम्विभक्तौ 'वारि आम्' इति परत्वात् नुटं बाधित्वा 'इकोऽचि विभक्तौ' इत्यनेन नुमि तं बाधित्वा—'नुमचिरे' ति

नुटि 'नामि' इति दीर्घे 'अट्कुप्वाङ्' इति णत्वे वारीणाम् इति । नुमि कृ
'नामि' इति दीर्घो न स्यात्, सन्निपातपरिभाषाविरोधात् ।

अतिदध्ना (ई० ४९)—दधि अतिक्रान्तं कुलमतिदधि, तस्य तृतीयैक
'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इत्यनेन विधीयमानस्यानङादेशस्य अङ्गाधि
स्थत्वेन 'पदाङ्गाधिकारे' इति परिभाषया तदन्तस्यातिदधिशब्दस्यानङि अल्
उक्तं रूपं सिद्धम् ।

स्नूनि (ई० ५४)—सानुशब्दस्य द्वितीयाबहुवचने शसि 'मांसपृतनासा
मांस्पृत्स्नवो वाच्याः शसादौ वा' इति वार्तिकेन 'स्नु' आदेशे 'जश्शसोः शिः'
श्यादेशे 'इकोऽचि विभक्तौ' इति नुमि उपधादीर्घे 'स्नूनि' इति । शसादौ वेत्यु
त्वात् पक्षे 'सानूनि' इति च भवति ।

प्रियक्रोष्टूनि (ई० ४४)—प्रियक्रोष्टुशब्दाज्जसि विभक्तौ जसः शिभावे प्रि
क्रोष्टु इ इति स्थिते 'तृज्वत्क्रोष्टुः' इत्यनेन प्राप्तं तृज्वद्भावं बाधित्वा पूर्वविप्र
षेधेन नुमि 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्यनेन दीर्घे उक्तं रूपं सिद्धम् ।

प्रियक्रोष्टुने (ई० ४६)—प्रियक्रोष्टुशब्दात् चतुर्थ्येकवचने तृतीयादि
पुंवत्त्वाभावपक्षे 'वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम्पूर्वविप्रतिषेधेन' इति वार्ति
तृज्वद्भावात् पूर्वप्रतिषेधेन नुमि उक्तं रूपं सिद्धम् ।

सुलुना (ई० ४२)—सुष्ठु लुनाति-छिनत्तीति सुलु । तस्य तृतीयैकव
'सुल्वा-' 'सुलुना' इति भवति । तत्र हि—शोभनलवनकर्तृत्वस्य पुन्नपुंसकयोरे
मेव प्रवृत्तिनिमित्तमिति भाषितपुंस्कत्वात् 'तृतीयादिष्वि' ति पुंवत्त्वपक्षे 'ओः सु
इत्यनेन यण् । नाभावस्तु न, पुंवत्त्वे ह्रस्वाभावेनाऽघित्वात् । पुंवत्त्वाभावपक्षे
ह्रस्वे कृते यणं बाधित्वा नुमि 'सुलुना' इति ।

अनादये (ई० ३४)—न आदिः = अनादिः, तस्मै 'अनादये-अनादिने' इति
अनादिशब्दात् ङेविभक्तौ 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इति विभा
पुंस्त्वे 'इकोऽचि विभक्तौ' इति नुमोऽप्रवृत्तेः 'शेषो घ्यसखि' घिसंज्ञायां 'घेङि
इति गुणे अयादेशे 'अनादये' इति । पुंवत्त्वाऽभावपक्षे—नुमि 'अनादिने' इति ।

ननु अनादिशब्दस्य कथं भाषितपुंस्कत्वमिति चेच्छृणु—भाषितः पुमान्
प्रवृत्तिनिमित्तेन तत् भाषितपुंस्कम् अर्थात् नपुंसकत्वे लिङ्गान्तरे च यस्य एक
वाच्यतावच्छेदकं तत् शब्दस्वरूपं भाषितपुंस्कशब्देन विवक्षितम् । अनादिशब्

उत्पत्त्यभावात्मकमनादित्वं पुरस्कृत्य स्त्रीपुन्नपुंसकतत्तद्व्यक्तिप्रत्यायकः इति भवति तस्य प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कतेति अभियुक्ताः ।

उक्तञ्च—

यन्निमित्तमुपादाय पुंसि शब्दः प्रवर्तते ।
क्लीबवृत्ति तदेव स्यादुक्तपुंस्कं तदुच्यते ॥ इति ॥

अयमर्थः—शब्दः पुंस्त्वे यमर्थं भजते यच्च शब्दस्वरूपं भजते, तमेवार्थं प्रधानीकृत्य शब्दस्वरूपमपि पुंवदेव भवेच्चेत् स शब्दः भाषितपुंस्कसंज्ञां लभत इति ।

दध्ना (ई० ५७)—दधिशब्दाद् विभक्तौ 'दधि आ' इति स्थिते 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इत्यनङि अनुबन्धलोपे 'यचि भम्' इति भसंज्ञायाम् 'अल्लोपोनः' इत्यनोऽकारस्य लोपे 'दध्ना' इति ।

दध्ने (ई० ३४)—दधिशब्दाद् ङे विभक्तौ 'अस्थिदधि' इत्यनङि भत्वाद् 'अल्लोपोनः' इत्यल्लोपे दध्ने इति ।

दध्नि—दधिशब्दात् ङिविभक्तौ 'अस्थिदधि' इत्यन् 'विभाषा ङिश्योः' इति अनोऽकारस्य विकल्पेन लोपे 'दध्नि' इति । पक्षे 'दधनि' इति ।

पीलुने (ई० ३०)—पीलुर्वृक्षः तत्फलं पीलु, तस्मै पीलुने इति 'इकोऽचि विभक्तौ' इति नुम् । अत्र 'तृतीयादिष्वि'ति न पुंवत्त्वं, प्रवृत्तिनिमित्तभेदात् । तथा हि—वृक्षत्वव्याप्यजातिविशेषात्मकं पीलुत्वं वृक्षविशेषे वाच्ये प्रवृत्तिनिमित्तम्, फलविशेषे वाच्ये तु फलत्वव्याप्यजातिविशेषात्मकं पीलुत्वं प्रवृत्तिनिमित्तम्, इति प्रवृत्तिनिमित्तभेदेन भाषितपुंस्कत्वाभावान्न पुंवदित्युक्तिः संगतेति । तदुक्तं—

पीलुर्वृक्षः फलं पीलु, पीलुने न तु पीलवे ।
वृक्षे निमित्तं पीलुत्वं तज्जत्वं तत्फले पुनः ॥इति॥

प्रराणाम् (ई० ५२)—प्रकृष्टः राः = धनं यस्य इति बहुव्रीहौ प्ररैशब्दः । तस्य नपुंसकह्रस्वत्वे 'प्ररि' इति, तस्मादामि 'ह्रस्वनद्यापो नुट्' इति नुटि, 'इकोऽचि विभक्तौ' इति नुमि च प्राप्ते 'नुमचिरतृज्वद्भावगुणेभ्यो नुट् पूर्वविप्रतिषेधेन' इति पूर्वविप्रतिषेधान्नुमं बाधित्वा नुटि 'रायो हलि' इत्यात्वे णत्वे 'प्रराणाम्' इति **माधवः** ।

वस्तुतस्तु—ह्रस्वान्तमुपजीव्य प्रवृत्तस्य नुटस्तद्विघातकत्वं प्रति निमित्तत्वा-

सम्भवात् नुटि कृते आत्वं न भवतीति 'प्ररीणाम्' इत्येव साधु ।

प्रराभ्याम् (ई० ३३, ५२)—प्रकृष्टो रा धनं यस्येति विग्रहे निष्पन्नात् प्र शब्दात् भ्यामि 'ह्रस्वो नपुंसके—' इत्यनेन 'एच इग्घ्रस्वादेशे' इति नियमेन ए रूपस्य ऐकारस्य इकारे ह्रस्वे कृते एकदेशविकृतन्यायेन 'रायो हलि' इत्यात्वे 'प्र भ्याम्' इति निष्पन्नम् ।

सुनूनि (ई० ४१)—सु = शोभना नौर्यस्य तत् 'सुनु' । सुनौशब्दात् श 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वे 'जशसोः शिः' इति शिभावे ' सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति नुमि 'सर्वनाम स्थाने चाऽसम्बुद्धौ' इति दीर्घे सुनूनि इति सिद्धम् ।

सुधिया (ई० ४१) 'सुष्ठु ध्यायति' इति विग्रहे निष्पन्नात् सुधीशब्दात् तृती कवचने 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इति पुवद्भावे सति 'अ श्नुधातु—' इतीयङि अनुबन्धलोपे 'सुधिया' इति पुंवद्भावाभावपक्षे 'ह्रस्वो न सके—' इति ह्रस्वे 'इकोऽचि विभक्तौ' इति नुमि सुधिना इति । अत्र सुध्यातृत्वस शोभनज्ञानवत्त्वस्य वा प्रवृत्तिनिमित्तस्य पुंसि नपुंसके च सत्त्वात् भाषितपुंस्कत मुपपन्नमिति ध्येयम् ।

इति अजन्तनपुंसकलिङ्गप्रकरणम्

—: ० :—

।। अथ हलन्तपुलिङ्गप्रकरणम् ।।

लिट्त्सु (ई० ५५) लिह्शब्दात् प्रातिपदिकात् सुप्यनुबन्धलोपे 'होढः' इति सूत्रेण हस्य ढत्वे तस्य 'झलां जशोऽन्ते' इति जश्त्वेन डकारे 'डःसि धुट्' इति धुटि 'खरि च' इति धकारस्य चर्त्वेन तकारे पुनः डकारस्य चर्त्वेन टकारे लिट्त्सु इति रूपम् । धुडभावपक्षे डकारस्य चर्त्वेन टकारे लिट्सु इति रूपद्वयं निष्पन्नम् ।

चर्त्वस्यासिद्धत्वाट्टकारस्य लिट्स्वित्यत्र, तकारस्य लिट्त्स्वित्यत्र च 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्' इति वार्तिकेन ठत्वं थत्वं वा न भवति। सकारस्य तकारस्य च 'न पदान्ताट्टोरनाम्' इति निषेधात् ष्टुत्वमपि न भवति। 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति परिभाषया 'तस्मादित्युत्तरस्य' इति सूत्रप्रवृत्या धुटः सकारस्यावयवत्वेन डकारात्पूर्वो न भवति ।

ननु टकारस्येण् प्रत्याहारान्तर्गतत्वात् तस्यापीण्त्वात् 'आदेशप्रत्यययोः' इति

सकारस्य षत्वं कुतो नेति चेन्न, तस्येण्प्रत्याहारान्तर्गतत्वेऽपि अनुनासिक इत्यादि-निर्देशेन प्रत्याहारे अग्रहणात्, तस्येत्संज्ञकत्वात् । 'होढः' इत्यनेन डकारो न विधीयते लेढीत्याद्यसिद्ध्यापत्तेः ।

उपदेशे किम् (ई० ५५) ननु 'दादेर्धातोर्घः' इति सूत्रे उपदेशग्रहणाभावेऽपि दादेर्धातोर्हस्य घो भवतीत्यर्थेनैव धुक्, धुगित्यादि सिद्धौ सूत्रे उपदेशग्रहणं किमर्थमिति चेन्न, उपदेशग्रहणाभावे प्रपूरणार्थकदुहधातोर्लुङि कृते लावस्थायामेवाडिति मतेऽटि कृते 'आगमसमभिव्याहारे आगमविशिष्टस्येति' नियमानुसारेण अड्विशिष्टस्य धातुत्वाद्दादित्वाभावात् अधोगित्यत्र घत्वन्न स्यादिति भविष्यत्यव्याप्तिः । दामलिहमात्मन इच्छति दामलिह्यति ततः क्विप् दामलिट् इत्यत्र च दादिधातुत्वेन घत्वं स्यादित्यतिव्याप्तिः स्यात् । तद्वारणाय सूत्रे उपदेशग्रहणमावश्यकमेव, कृते तूपदेशग्रहणे उपदेशसमये अधोगित्यौपदेशिकदादित्वस्य सत्वेन घत्वं सिद्ध्यति । दामलिड्त्यत्र चौपदेशिकदादित्वस्याभावात् धत्वन्न भवति किन्तु होढ इति ढत्वमेव भवति

एकाच इति—ननु 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' सूत्रे एकाच इत्यस्य 'सम्भवति सामानाधिकरण्ये वैयधिकरण्यमन्याय्यामिति' परिभाषया धातोरेव विशेषणत्वेन तत्रैवान्वये एकाज्रूपो यो धातुर्झषन्तस्तदवयवस्य बशो भषित्यर्थ एव सम्पद्यते न तु धातोरवयवो य एकाच् झषन्तस्तदयवस्य बशो भषित्यर्थ इति चेन्न, तत्र सम्भवति-पदोपादानेन क्वचिल्लक्ष्यानुरोधाद्वैयधिकरण्येनापि क्रियतेऽन्वयोऽतो गर्धबित्यादेः सिद्धिर्भवति । धुगित्यादौ च धातुरेवैकाच् न तु तदवयव इति तत्र व्यपदेशिवद्भावेन भवति एकाच्त्वमाश्रित्य भष्भावः ।

गर्धप् (ई० ४९) गर्दभमाचष्टे इति विग्रहे 'तत्करोति तदाचष्टे' इत्यनेन णिचि ततः कर्तरि क्विपि सर्वापहारिलोपे 'णेर्ननिटि' इति टिलोपे गर्दभ् शब्दात् प्रातिपदिकात् सौ 'हल्ङ्यादि' सूत्रेण सुलोपे 'एकाचो बशो भषो झषन्तस्य स्ध्वोः' इति भष्भावेन दकारस्य धकारे, यकारस्य जश्त्वे चर्त्वे च कृते गर्धप् इति सिद्ध्यति । न चात्र सम्भवति सामानाधिकरण्ये वैयधिकरण्यमन्याय्यमिति परिभाषया 'एकाचो बशो-' इति सूत्रस्य एकाज्रूपो यो धातुर्झषन्तस्तदवयवस्य बशो भष् भवति, इत्यर्थकत्वेनात्र चैकाचो धातोरभावेन तत्सूत्राप्रवृत्त्या भष्भावो न भविष्यतीति वाच्यम्, भवति क्वचिल्लक्ष्यानुरोधेन वैयधिकरण्येनाप्यन्वयोऽतः सम्पद्यमाने धातो-

रवयवी य एकाच् झषन्तस्तदवयवस्य बशो भष् भवतीत्यर्थे, गर्धबित्यत्र भवति भष्भाव इति दिक् ।

धुक् (ई० ३८) प्रपूरणार्थक दुह् धातोः कर्त्तरि क्विपि सर्वापहारिलोपे दुह् शब्दात् प्रातिपदिकात् सौ सुलोपे 'दादेर्धातोर्घः' इति हस्य घकारे कृते 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति भष्भावेन दकारस्य धकारे घकारस्य जश्त्वे चर्त्वे च कृते धुगिति सिद्धयति ।

न च दुह इत्यस्य प्रातिपदिकत्वे तत्र धातुत्वाभावात् 'दादेर्धातोर्घः' इत्यनेन च धातोर्विधानात् दस्य घत्वं भष्भावश्च न स्यादिति वाच्यम्, दुह् इत्यस्य क्विबन्तत्वात् 'क्विबन्ता धातुत्वन्न जहति' इति नियमात्तत्रापि धातुत्वस्य विद्यमानत्वात् । 'अत्वसन्तस्य चाऽधातोः' इति सूत्रेऽधातोरिति पर्युदासेन अप्रधानक्रियावाचकस्यापि धातुत्वबोधनात् । दुह इत्यस्यैवैकाच्त्वेन तदवयवस्यैकाच्त्वाभावेऽपि व्यपदेशिवद्भावेन राहोश्शिर इतिवत्तदवयवे भवत्येकाच्त्वव्यवहारः ।

विश्वौहः (ई० ४८) विश्वं वाहयतीति विग्रहे णिजन्ताद् वह्धातोर्विचि णिलोके विश्ववाह् शब्दात् प्रातिपदिकाच्छसि कृतेऽनुबन्धलोपे 'यचि भम्' इति सूत्रेण भसंज्ञायां 'इग्यणः सम्प्रसारणम्' इति सूत्रेण सम्प्रसारणसंज्ञायाञ्च 'वाह ऊठ्' इति वकारस्य सम्प्रसारणं ऊठि 'सम्प्रसारणाच्च' इति पूर्वरूपे 'एत्येधत्यूठ्सु' इति वृद्धौ सकारस्य रुत्वे विसर्गे च कृते उक्तं रूपं सिद्धम् ।

ननु विश्वरूपे कर्मपुण्यपपदे वह् धातोर्ण्वौ कृते विश्ववाह् शब्दनिष्पित्तेर्णिजन्ताद् विचः करणमयुक्तमिति चेन्न, 'वहश्च' इति सूत्रेणैव ण्वेर्विधानात्तस्य च च्छन्दोमात्रविषयकत्वात् ।

ननु 'वाह उठ्' इति सूत्रेण यत्सम्प्रसारणं विधीयते तदलोन्त्यस्येति सूत्रबलाद्धकारस्थाने भवितव्यमिति चेन्न, 'इग्यणः सम्प्रसारणम्' इति सूत्रेण यणएव सम्प्रसारणनिष्ठादेशतानिरूपितस्थानितावत्त्वस्य ज्ञापितत्वेनालोन्त्यस्याप्रवृत्तेः ।

अनड्वान् (ई० ५२) अनडुह् शब्दात् प्रातिपदिकात् सौ 'सुडनपुंसकस्य' इति सर्वनामस्थानसंज्ञायां 'चतुरनडुहोरामुदात्तः' इत्यनेनामि यणादेशे 'सावनडुहः' इति नुम्यनुबन्धलोपे दीर्घे सुलोपे हकारस्य संयोगान्तलोपेऽनड्वान् इति सिद्धम् । संयोगान्तलोपस्यासिद्धत्वात् नलोपो न भवति, नुम् विधानसामर्थ्याच्च 'वसुस्रंसुध्वंस्वनडुहां दः' इति दत्वमपि न भवति ।

नचात्र 'सावनडुहः' इति विशेषविहितेन नुमा आमो बाधः स्यादिति वाच्यम्, 'आच्छीनद्योर्नुम्' इत्यतः आतोऽनुवृत्तेरवर्णात् परो नुम् इत्यर्थेनोपजीव्यविरोधात्। यदि च नुमा आमो बाधः स्यात्तदा आतोऽनुवृत्तिर्निष्फला भविष्यति तत्रावर्णस्यासत्वात्। आमा च नुमपि न बाध्यते किन्तु बह्वनड्वांहीत्यत्र परत्वादामि कृते पुनः प्रसंगविज्ञानात् 'नपुंसकस्य झलचः' इति नुम् भवत्येव।

सावनडुहः। 'आच्छीनद्योर्नुम्' इत्यतः आतोऽनुवृत्तिः 'सावनडुहः' इति सूत्रे क्रियते ततश्चावर्णात्परस्यानडुह् शब्दस्य नुम् स्यात्सौ इति सूत्रार्थो भवति। 'चतुरनडुहोरामुदात्तः' इति सूत्रेण सर्वनामस्थान निमित्तीकृत्य विधीयते आम्, अत एव आमः सर्वनामस्थानं विषयो भवति, 'सावनडुहः' इत्यनेन सु निमित्तीकृत्य विधीयते नुमत एव नुमः सुः एव विषयो भवति। तत्र नुमा विशेषविहितेनाऽपि आम् न बाध्यते, उपजीव्यविरोधात्। उपजीव्यविरोधश्च—यथा पितुः सकाशाज् जायमानः पुत्रः पितरं न हन्यात्' तथैवावर्णनिमित्तकेन नुमा आमपि न बाध्यते, आमा च नुमपि न बाध्यते।

हे अनड्वन् (ई० ४०) अनडुह् शब्दात् प्रातिपदिकात् सम्बोधनविवक्षायां सौ 'चतुरनडुहोरामुदात्तः' इति प्राप्तमामं प्रबाध्य 'अम् सम्बुद्धौ' इति अमि तस्य 'मिदचोऽन्त्यात्परः' इति मित्वादन्त्यादचः परे कृते यणि सुलोपे संयोगान्तलोपे दीर्घाभावे अनड्वन् इति सिद्धम्। अत्रामः केवलं सम्बुद्धौ निमित्तकत्वात् भवत्यामो बाधः।

सान्तेति किम्—ननु वस्वादेः सान्तत्वेन 'सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्' इति नियमेन सान्तस्येति विशेषणमनर्थकमिति चेन्न, तत्र 'वसुस्रंसुध्वंस्वनडुहां दः' इति सूत्रे सान्तविशेषणाभावे विद्वस् शब्दस्य वस्वन्ततया दत्वापत्तिः स्यान्नकारस्य। तद्वारणाय सान्तेति पदमावश्यकम्। कृते सान्तपदग्रहणे तस्य सान्तत्वाभावात् दत्वन्न भवति।

पदान्तेति किम्—ननु 'वसुस्रंसुध्वंस्वनडुहां दः' इति सूत्रे पदान्तग्रहणाभावेऽपि व्यभिचारशून्यत्वेन पदान्तग्रहणं किमर्थमिति चेन्न, पदान्तग्रहणाभावे स्रंसु, ध्वंसु इत्यनयोः क्तप्रत्यये कृते नलोपे च कृते स्रस्तम्, ध्वस्तमित्यत्रापि सकारस्य दत्वं भवेत्, पदान्तग्रहणे सकारस्यातथात्वान्न भवति दत्वम्।

तुराषाट् (ई० ५०, ५३)—तुरं सहते इति विग्रहे 'छन्दसि सहः' इति सूत्रेण

सहधातोः ण्विप्रत्ययेऽनुबन्धलोपे उपधादीर्घे पूर्वपदस्य च 'अन्येषामपि दृश्यते' इति दीर्घे तुरासाह् शब्दात् प्रातिपदिकात् सौ सुलोपे 'हो ढः' इति हस्य ढत्वे तस्य जश्त्वेन डत्वे 'सहे साडः' इति सकारस्य षत्वे 'वाऽवसाने' इति चर्त्वे सिद्धम्। लोके तु 'छन्दसि सहः' इत्यस्याप्रवृत्त्या साहयतेः क्विपि 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घे सिद्ध्यति रूपम् ।

चतुर्ण्णाम्—(ई० ३४, ३९, ५५) चतुर् शब्दात् प्रातिपदिकात्, आमि 'षट्-चतुर्भ्यश्च' इत्यामि नुटि 'रषाभ्यां नो णः समानपदे' णत्वे 'अचो रहाभ्यां द्वे' इति वैकल्पिकद्वित्वे चतुर्ण्णाम् चतुर्णामिति रूपद्वयम् सिद्धम् ।

न च—'पूर्वत्रासिद्धीयमद्विर्वचने' इति परिभाषया द्वित्वे कर्तव्ये 'पूर्वत्रासिद्धम्' इति सूत्राप्रवृत्त्या परत्वात्पूर्वं द्वित्वेन भाव्यं पश्चाण्णत्वेनेति वाच्यम् 'पूर्वत्रासिद्धीयमद्विर्वचने' इत्यस्याः द्वित्वे कर्तव्ये अन्यदसिद्धन्न भवतीत्यर्थकत्वात् तत्सूत्रप्रवृत्त्या द्वित्वस्यासिद्धत्वात् ।

णत्वं द्वित्व चतुर्णाम्—ननु 'पूर्वत्रासिद्धीयमद्विर्वचने' इति परिभाषया द्वित्वे कर्त्तव्ये पूर्वत्रासिद्धम्' इत्यस्याप्रवृत्या पूर्वद्वित्वेन भाव्यं पश्चाण्णत्वेनेति चेन्न, 'पूर्वत्रासिद्धीयमद्विर्वचने' इत्यस्याः द्वित्वे कर्तव्येऽन्यदसिद्धम् न भवतीत्यर्थकत्वात् तत्सूत्रप्रवृत्या द्वित्वस्यासिद्धत्वात् णत्वं द्वित्वं चतुर्ण्णामिति मूलं युक्तमेवेति दिक्।

चतुर्षु—(ई० ४४) चतुर् शब्दात् प्रातिपदिकात् सुप्यनुबन्धलोपे चतुर् सु इत्यवस्थायां 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे प्राप्ते 'रोः सुपि' इति नियमाद् निषेधे नियमश्च-सुपि परे रोरेव विसर्गो नान्यस्य। रेफस्य अत्र च तदभाव एव। रेफस्येण्त्वेन 'आदेशप्रत्यययोः' इति सकारस्य षत्वे 'अचो रहाभ्यां द्वे' इति षकारस्य द्वित्वे प्राप्ते 'शरोऽचि' इति निषेधे सिद्धम् ।

न चोक्तसूत्रेण 'यदि रोर्विसर्गः स्यात्तर्हि सुप्येव' इति विपरीतनियम एव क्रियतामिति वाच्यम्, 'हलोऽनन्तराः संयोगः' इति निर्देशात् यदि स्वीक्रियतेऽयं नियमस्तदात्र विसर्गत्वं दुर्लभमेव स्यादिति ।

प्रियचत्वाः (ई० ३८) प्रियाश्चत्वारो यस्य स इति बहुव्रीहौ प्रियचतुर् शब्दात् प्रातिपदिकात् सौ 'सुडनपुंसकस्य' इति सर्वनामस्थानसंज्ञायाम् आङ्गत्वात्तदन्तस्यापि 'चतुरनडुहोरामुदात्तः' इति आमि यणि 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सुलोपे रेफस्य विसर्गे सिद्धम् । सार्वविभक्तिकत्वञ्चास्य विशेष्यनिघ्नत्वेन बोध्यम् ।

प्रियचतुराम् (ई० ४६) प्रियाश्चत्वारो यस्य सः तेषामिति विग्रहेण बहुव्रीहौ कृते निष्पन्नात् प्रियचतुर् शब्दात् प्रातिपदिकादामि गौणमुख्ययोर्मध्ये मुख्यस्यैव ग्रहणमिति न्यायेन मुख्यस्यैव ग्रहणात् प्रियचतुर्शब्दस्य च गौणत्वात् 'षट्चतुर्भ्यश्च' इति सूत्राप्रवृत्त्या नुडभावात् प्रियचतुरामिति सिद्धयति। गौणत्वञ्च = इतरपदार्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वम्। प्राधान्यञ्चास्य चतुर्भ्य इति बहुवचननिर्देशेन सूच्यते।

केषांचिन्मते तु भाष्यविरोधाभावात् नुड् भवत्येव। बहुवचननिर्देशस्तु 'न षट्स्वस्रादिभ्यः' 'तिसृभ्यो जसः' इत्यादाविव शब्दप्रयोगाभिप्रायेणोपपन्न इति।

अकच्सहितस्यापि—ननु 'किमः कः' इति सूत्रस्य 'स्थाने-इमः अः' इत्येव सूत्र्यताम्। तथा च त्यदादीनामनुवृत्त्या सम्पत्स्यतेऽर्थः किम इमः अः भवति। न च त्यदादौ किमोऽभावात् कथमयमर्थः सम्पत्स्यते इति वाच्यम्, द्विशब्दात् पूर्वं त्यदादौ किमः पाठात्। न च उक्तसूत्रन्यासे 'अलोऽन्यस्य' इति परिभाषाप्रवृत्तौ सिद्धयेदनिष्टं रूपमिति वाच्यम्, 'नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे' इति परिभाषया निषेधात्, इमोऽनर्थकत्वाद् इति चेन्न, ककारोच्चारणेन ज्ञायते यत् साकच्कस्याप्ययमादेश इति। यदि न्यस्यते 'इमः अः' इति तदा 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इति किम् शब्दादकचि कृते ककिमित्यस्य कक इति रूपं स्यात् 'किमः कः' इति न्यासे तु 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति बलात् किम्शब्दत्वात् कादेशे क इति सिद्धयतीष्टं रूपम्। सर्वदोषपरिहारश्च कुतिहोरित्यत्र उतिहोरिति न्यासेन भविष्यति।

आभ्याम् (ई० ५२, ५६, ५७) इदम्शब्दात् प्रातिपदिकाद् भ्यामि 'त्यदादीनामः' इति मकारस्यात्वे 'अतो गुणे' इति पररूपे इद भ्यामिति जाते 'हलि लोपः' इत्यनेन 'नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे' इति परिभाषया निषेधात् 'अलोऽन्त्यस्य' इत्यस्याप्रवृत्तौ इदः इद्भागस्य लोपे 'आद्यन्तवदेकस्मिन्' इति सूत्रेणान्तवद्भावेनादन्तं मत्वा 'सुपि चे'ति दीर्घे सिद्धम्।

न चात्र परत्वात्पूर्वं 'सुपि च' इति दीर्घे कृते आभ्यामिति सिद्धे किमर्थमाद्यन्तवदेकस्मिन्निति सूत्रोपन्यास इति वाच्यम्, नित्यत्वात् 'हलि लोपः' इत्यस्य दीर्घात्पूर्वं प्रवृत्त्या तदसिद्धयापत्तेः।

एभिः (ई० ४२, ४९) इदम् शब्दात् प्रातिपदिकात् भिस् विभक्तौ 'त्यदा-

दीनामः' इति मकारस्यात्वे 'अतो गुणे' इति पररूपे 'हलि लोपः' इति इदो लोपे 'बहुवचने झल्येत्' इति अकारस्यैत्वे सकारस्य रुत्वे विसर्गे च कृते सिद्धयति ।

न चात्र 'अतो भिस ऐस्' इति सूत्रेण भिस ऐस् स्यादिति वाच्यम्, 'नेदमदसोरकोः' इति निषेधात् ।

यत्तु 'नेदमदसोरकोः' इति सूत्रमपनीय 'इदमदसोः कात्' इति न्यस्य 'इदमदसोः कादेव भिस ऐस्' इति नियम्यात्र भिस ऐस् परिहृतं तन्न युक्तम्, 'कादि्भस ऐस् इदमदसोरेवेति' विपरीतनियमस्यापि सम्भवेन पाचकैरित्याद्यसिद्धयापत्तेः ।

इदम् शब्दस्य त्रिषु लिङ्गेषु रूपाणि (ई० ३३)

पुँल्लिङ्गे

अयम्	इमौ	इमे
इमम् (एनम्)	इमौ (एनौ)	इमान् (एनान्)
अनेन (एनेन)	आभ्याम्	एभिः
अस्मै	आभ्याम्	एभ्यः
अस्मात्-द्	आभ्याम्	एभ्यः
अस्य	अनयोः (एनयोः)	एषाम्
अस्मिन्	,, ,,	एषु

स्त्रीलिङ्गे

इयम्	इमे	इमाः
इमाम् (एनाम्)	इमे (एने)	इमाः (एनाः)
अनया (एनया)	आभ्याम्	आभिः
अस्यै	आभ्याम्	आभ्यः
अस्याः	,,	,,
,,	अनयोः (एनयोः)	आसाम्
अस्यां	,, ,,	आसु

नपुंसकलिङ्गे

इदम्	इमे	इमानि
इदम् (एनत्, द्)	इमे (एने)	इमानि (एनानि)

अनेन	आभ्याम्	एभिः
अस्मै	,,	एभ्यः
अस्मात्-द्	,,	,,
अस्य	अनयोः (एनयोः)	एषाम्
अस्मिन्	,, ,,	एषु

(त्यदादेः सम्बोधनन्नास्ति)

अश् वचनं साकच्कार्यम्—ननु 'इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ' इति सूत्रेणानुदात्तमात्रविधावपि हलि लोपेन आभ्यामित्यादि समीहितं रूपं सिद्धयति, एनेन एनयोरित्यत्र तु विशिष्यैनादेशो विहितः किमनेनाश्वचनेनेति चेन्न, साकचि हलि लोप इत्यस्याप्राप्त्या तत्राभ्यामिति सिद्धये अश्विधानस्यावश्यकत्वात् ।

नच—अकारस्याकारविधानसामर्थ्यादेव सर्वादेशसिद्धेः शित्करणं व्यर्थमिति वाच्यम्, अनुदात्तत्वार्थमेवाकारविधानमित्याशंक्यमाने कस्मिंश्चित् तदभावे सर्वादेशानापत्तेः ।

आकरकृत्तु अ अ इति प्रश्लिष्य निर्देशेऽनेकाल्त्वादेव सर्वादेशसिद्धे शिद्ग्रहणं शक्यमकर्त्तुम् ।

राज्ञः (ई० ५६) राजन्शब्दात् प्रातिपदिकात् शसि 'लशक्वतद्धिते' इति शलोपे 'यचि भम्' इति भसंज्ञायां 'अल्लोपोऽनः' इति अकारलोपे 'स्तोः श्चुना श्चुः' इति सूत्रेण श्चुत्वेन नकारस्य ञकारे वर्णसम्मेलने सकारस्य रुत्वे विसर्गे च कृते राज्ञः इति सिद्धयति ।

न चात्र पञ्चमीसमासपक्षे 'अचः परस्मिन् पूर्वविधौ' इति सूत्रेणाकारस्य स्थानिवद्भावात् श्चुत्वन्न स्यादिति वाच्यम्, पूर्वत्रासिद्धे तन्निषेधात् ।

नचाल्लोपस्य शस्विभक्तिनिमित्तकतया बहिरङ्गत्वेन 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषाप्रवृत्तौ अकारस्यासिद्धत्वेन श्चुत्वन्न स्यादिति वाच्यम्, उक्तपरिभाषायाः 'वाह ऊठ्' इति षाष्ठेन सूत्रेण ज्ञापितत्वात् यथोद्देशपक्षे तद्दृष्टौ श्चुत्वविधायकशास्त्रस्याऽसिद्धत्वादन्तरङ्गशास्त्राभावेन प्रतिपाद्याभावात्परिभाषाऽप्रवृत्तेः । न च यथोद्देशपक्षे दोषाभावेऽपि कार्यकालपक्षे तत्प्रवृत्तेः दोषस्तदवस्थ इति वाच्यम्, एकतरपक्षेण लक्ष्यसिद्धौ पक्षान्तरेण दोषदानस्य भाष्ये क्वाप्यनाश्रयणात् ।

राजभ्याम् (इ० ४१, ४७) राजन्शब्दात् प्रातिपदिकात् भ्यामि 'स्वादि-ष्वसर्वनामस्थाने' इति पदसंज्ञायां 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे 'सुपि च' इति दीर्घे प्राप्ते 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति नलोपस्यासिद्धत्वे दीर्घाभावे सिद्धम् ।

प्रतिदीव्नः (ई० ४५, ५५) प्रतिदिवन् शब्दात् प्रातिपदिकाच्छसि 'लश-क्वतद्धिते' इति शलोपे 'यचि भम्' इति भसंज्ञायां 'अल्लोपोऽनः' इति अकारलोपे 'हलि च' इति दीर्घे सकारस्य रुत्वे विसर्गे च कृते प्रतिदीव्नः सिद्ध्यति ।

नचात्र 'अचः परस्मिन् पूर्वविधौ' इति अकारस्य स्थानिवत्त्वेन वकारान्त-त्वाभावात् 'हलि च' इति सूत्राप्रवृत्तौ कथं दीर्घ इति वाच्यम्, दीर्घे कर्त्तव्ये 'न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु' इति निषेधात् ।

न च 'यसिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषयाऽल्लोपस्य बहिरङ्गत्वात् कृतेऽसिद्धत्वे दीर्घो न सम्भवतीति वाच्यम्, यथोद्देशपक्षे पाष्ठीं परिभाषां प्रति त्रैपा-दिकस्य 'हलि च' इत्यस्यासिद्धत्वादन्तरङ्गाभावात् प्रतिपाद्यस्याऽसत्त्वेन परिभाषाया अप्रवृत्तेः । कार्यकालपक्षे तु दोषदानमेव न युक्तं पक्षान्तरेण सिद्धत्वात् ।

वृत्रहा (ई० ३६) वृत्रं हतवानिति विग्रहेण निष्पन्नात् क्विबन्तात् प्रातिपदि-कात् वृत्रहन् शब्दात् सौ 'इन्हन्पूषार्य्यम्णां शौ' इति नियमेन 'सर्वनामस्थाने चा-सम्बुद्धौ' इति दीर्घप्राप्ते 'सौ च' इति दीर्घे सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे सिद्धम् ।

वृत्रघ्नः (ई० ३७) वृत्रं हतवानिति विग्रहेण निष्पन्नात् क्विबन्तात् वृत्रहन् शब्दात् प्रातिपदिकात् शसि 'यचि भम्' इति भसंज्ञायां 'अल्लोपोऽनः' इत्यल्लोपे 'हो हन्तेर्ञ्णिन्नेषु' इति हकारस्य कुत्वेनान्तरतम्यात् घकारे सकारस्य रुत्वे विसर्गे च कृते सिद्धम् ।

नचात्र 'अचः परस्मिन् पूर्वविधौ' इति अल्लोपस्य स्थानित्वेन 'एकाजुत्तरपदे णः' इति सूत्रेण णत्वं कुतो न कृतमथवा तत्स्थानित्वाभावेऽपि 'प्रातिपदिकान्तनुम्-विभक्तिषु च, कुमति च' इत्याभ्यां कथं न कृतं णत्वमिति वाच्यम् 'अत्पूर्वस्य' इति नियमेन हन्तेर्नकारस्य णत्वं भवति तर्हि अत्पूर्वस्यैव इति नियमेन अत्पूर्वत्वाभावात् ।

न च 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति न्यायेन अत्पूर्वस्य इति

सूत्रेण यन्नियम्यते तेन हन्तेरेव बाधो भविष्यति नान्यस्य पुनश्च णत्वं तेन सम्भवत्येवेति वाच्यम्, योगविभागसामर्थ्यात् तन्न्यायस्याप्रवृत्तेः। अन्यथा 'हन्तेरत्पूर्वस्य' इत्येक एव योगः क्रियेत।

वृत्रघ्नः (ई० ५२) वृत्रं हतवान् इति वृत्रहन्शब्दात् प्रातिपदिकात् शसि 'यचि भम्' इति भसंज्ञायां, 'अल्लोपोऽनः' इति अकारलोपे 'हो हन्तेर्ञ्णिन्नेषु' इति कुत्वेन हकारस्य स्थाने आन्तरतम्यात् घकारे सकारे सकारस्य रुत्वे विसर्गे च सिद्धम्।

यत्तु माधवेन प्रयोगेऽस्मिन् णत्वविकल्प उक्तः तन्न समीचीनम्, महर्षिद्वयविरोधात्। विरोधश्चैवम् वृत्रघ्न इत्यत्र णत्ववारणाय 'कुव्यवाये हादेशेषु णत्वप्रतिषेधो वक्तव्यः' इति वार्तिककृता वार्तिकं पठितम्। वृत्रघ्नः, स्रुघ्नः, प्राघानि इत्यादिषु णत्ववारणाय भाष्यकारः 'अत्पूर्वस्य' इति योगं विभज्य तत् प्रत्याचख्यौ। तदेव प्रत्याख्यानं विरोधोऽस्ति।

मघवान् (ई० ५६) मघवन्शब्दात् प्रातिपदिकात् सौ 'मघवा बहुलम्' इति त्रन्तादेशेऽनुबन्धलोपे 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुम्यनुबन्धलोपे 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सुलोपे 'संयोगान्तस्य लोपः' इति तकारलोपे 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति दीर्घे संयोगान्तलोपस्याऽसिद्धत्वात् नलोपाभावे मघवान् इति सिद्धम्, पक्षे मघवेति।

मच संयोगान्तलोपस्याऽसिद्धत्वात् 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति दीर्घो न सम्भवति इति वाच्यम्, 'मघवा बहुलम्' इति सूत्रे बहुलग्रहणेन संयोगान्तलोपस्याऽसिद्धत्वाभावकल्पनेनादोषात्।

न च बहुलग्रहणेन विपरीतकल्पनस्यापि सम्भवेनाऽस्मिन् कल्पने किम्मानमिति वाच्यम्, भाष्यकारेण मह् धातोः 'श्वन्नुक्षन्' इति सूत्रेण कनि प्रत्यये, हकारस्य घकारे वुगागमे मघवन्शब्दात् सौ स्वादिकार्ये मघवा इति रूपम्। मघशब्दाच्च मतुपि नुमि 'अत्वसन्तस्य चाऽधातोः' इति दीर्घे मघवानिति रूपद्वयं निष्पाद्य 'मघवा बहुलम्' इति सूत्रं प्रत्याख्यातम्। यदि च बहुलग्रहणात्तत्कल्पनं न स्वीक्रियते तदा सूत्रारम्भे दीर्घाभावात् मघव इति रूपं। प्रत्याख्यानपक्षे च मघवानिति मघवा इति रूपं च सिद्ध्यतः। तथा च फलभेदात् प्रत्याख्यानस्यायुक्तत्वं स्यात् 'फलैक्ये प्रत्याख्यानन्न तु फलभेदे' इति नियमात्।

मघोनः (ई० ४२, ४४) मघवन् शब्दात् प्रातिपदिकात् शसि 'लशक्वतद्धिते' इति शलोपे 'यचि भम्' इति भसंज्ञायां 'श्वयुवमघोनामतद्धिते' इति वकारस्य सम्प्रसारणेन उकारे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'आद्गुणः' इति गुणे सकारस्य रुत्वे विसर्गे च कृते सिद्धम् । मघवन् शब्दात् 'श्वन्नुक्षन्' इत्यादि सूत्रेण निपातनात्कनि हकारस्य घकारे वुगागमे नुमि च कृते सिद्धयति ।

यूनः (ई० ४३) युवन् शब्दात् प्रातिपदिकाच्छसि 'यचि भम्' इतिं भसंज्ञायां 'श्वयुवमघोनामतद्धिते' इति वकारस्य सम्प्रसारणेन उकारे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'अकः सवर्णे दीर्घः' इति दीर्घे सकारस्य रुत्वे विसर्गे च कृते सिद्धम् ।

नचात्र यकारस्यापि सम्प्रसारणं कुतो नेति वाच्यम्, 'अचः परस्मिन् पूर्वविधौ' इति सूत्रेण स्थानिवत्त्वेन उकारस्य स्थाने वकारसत्वेन 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधात् । न च 'न सम्प्रसारणे सम्प्रसारणम्' इति सूत्रे सप्तमीं दृष्ट्वा 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति सूत्रप्रवृत्त्याऽव्यवहितपूर्वस्यैव लाभात् युवन् इत्यत्र चोकारस्य व्यवधानात् सम्प्रसारणनिषेधः कथं स्यादिति वाच्यम्, 'न सम्प्रसारणे सम्प्रसारणम्' इति सूत्रस्य वैयर्थ्यापत्तेस्तस्या अत्राप्रवृत्तेः ।

न च पूर्वं यकारस्यैव सम्प्रसारणं क्रियतां न पुनर्वकारस्येति वाच्यम्, तत्सूत्रवैयर्थ्यापत्तेः ।

अर्वतः (ई० ५३) अर्वन्शब्दात् प्रातिपदिकात् शसि 'लशक्वतद्धिते' इति शलोपे 'अर्वणस्त्रसावनञः' इति त्रन्तादेशेऽनुबन्धलोपे सरकारस्य रुत्वे विसर्गे च कृते सिद्धम् ।

अत्र नुम् तु सर्वनामस्थानाभावान्न भवति ।।

मघवन्शब्दस्य रूपाणि (ई० ३३)

तृत्वपक्षे

मघवान्	मघवन्तौ	मघवन्तः
मघवन्तं	,,	मघवतः
मघवता	मघवद्भ्यां	मघवद्भिः
मघवते	,,	मघवद्भ्यः
मघवतः	,,	,,

,,	मघवतोः	मघवताम्
मघवति	,,	मघवत्सु
हे मघवन्	हे मघवन्तौ	हे मघवन्तः

तृत्वाभावपक्षे

मघवा	मघवानौ	मघवानः
मघवानं	,,	मघोनः
मघोना	मघवभ्यां	मघवभिः
मघोने	,,	मघवभ्यः
मघोनः	,,	,,
,,	मघोनोः	मघोनाम्
मघोनि	मघोनोः	मघवसु
हे मघवन्	हे मघवानौ	हे मघवानः

पन्थाः (ई० ४०) पथिन्शब्दात् प्रातिपदिकात् सौ 'पथिमथ्यृभुक्षामात्' इति नकारस्याकारे 'इतोऽत्सर्वनामस्थाने' इति पथिवर्तिन इकारस्याकारे 'थोन्थः' इति न्थादेशे 'अकः सवर्णे दीर्घः' इति दीर्घे सकारस्य रुत्वे विसर्गे च कृते सिद्धम् ।

नच 'अस्थिदधिसक्थ्यक्षि' इति सूत्रे उदात्ततया पठितेऽप्यनङीष्टसिद्धौ 'अनङ्-दात्तः' इति उदात्तग्रहणेन 'गुणा अभेदकाः' इति पक्षस्य ज्ञापितत्वेन सूत्रेऽननुनासिकोच्चारणेपि आन्तरतम्यादनुनासिकाकारः स्यादिति वाच्यम्, आ आदिति प्रश्लेषेण शुद्धाया एव व्यक्तेर्विधानेनानुनासिकाभावात् ।

सुपथि (ई० ४४) शोभनः पन्थाः यस्य तदिति बहुव्रीहौ सुपथिम् शब्दात् प्रातिपदिकात्सौ 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे सुपथि सिद्धम् ।

न चात्र 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति प्रत्ययलक्षणतया सावागते 'पथिमथ्यृभुक्षामात्' इति सूत्रेण आत्वं कुतो नेति वाच्यम् 'न लुमताङ्गस्य' इति निषेधात् ।

सुपन्थानि (ई० ३६) शोभनः पन्था एषां तानीति विग्रहे कृते सुपथिन् शब्दात् प्रातिपदिकात् शसि अनुबन्धलोपे 'जश्शसोः शिः' इति श्यादेशे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'इतोऽत् सर्वनामस्थाने' इत्यकारे 'थोन्थः' इति न्थादेशे 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति दीर्घे सुपन्थानि रूपं सिद्धम् ।

शतानि (ई० ३४) शतञ्च शतञ्च शतञ्चेति विग्रहे एकशेषे शतशब्दात् प्रातिपदिकात् जसि शत जस् इति जाते 'शश्शसोः शिः' इति श्यादेशे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति सूत्रेण नुमि 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति दीर्घे सिद्धम् ।

न च शतन् इ इत्यवस्थायां तस्य नान्तत्वात् 'ष्णान्ता षट्' इति षट्संज्ञायां कृताया 'षड्भ्यो लुक्' इति जसो लुक् स्यादिति वाच्यम्, सन्निपातपरिभाषाविरोधात् । यथा पितुः जायमानपुत्रः पितरं न हन्यात् तथैव जस्प्रत्ययं निमित्तीकृत्य विहितो नुमपि जसो विघातं न कुर्यात् इत्यर्थः ।

अष्टौ (ई० ४३, ५७) अष्टन्शब्दात् प्रातिपदिकात् जसि शसि वा विभक्तौ अनुबन्धलोपे 'अष्टन आ विभक्तौ' इति नकारस्यात्वे सवर्णदीर्घे 'अष्टाभ्य औशिति' जश्शसोः औशि 'वृद्धिरेचि' इति वृद्धौ सिद्धम् ।

'अष्टनो दीर्घात्' इति सूत्रे दीर्घग्रहणाज्ज्ञापकादात्वस्य वैकल्पिकत्वात् आत्वाभावे अष्ट इति रूपम् । यदि दीर्घविकल्पो न स्यात्तदा सर्वत्रैव दीर्घत्वात् तत्र दीर्घग्रहणं व्यर्थं स्यात् ।

न च 'अष्टन आ विभक्तौ' इति सूत्रेण हलादावेव आत्वविधानादत्र च हलाद्यभावात् कथमात्वं क्रियते इति वाच्यम्, एकमात्रालाघवेन 'अष्टाभ्य औश्' इति सूत्रस्य स्थाने 'अष्टभ्य औश्' इति वक्तव्ये दीर्घपाठो ज्ञापयति यत्क्वचिदजादावपि भवत्यात्वन्तेनादोषात् ।

न च 'आदेः परस्य' इति सूत्रप्रवृत्त्या औशादेशो जश्शसोरकारस्यैव भविष्यतीति वाच्यम्, औशादेशस्य शित्वादनेकाल्त्वाच्च 'अनेकाल् शित् सर्वस्य' इति प्रवृत्तौ सम्पूर्णस्यैव सम्भवात् । अनेकाल्त्वञ्चास्य शकारमादाय बोद्धव्यम् ।

न च 'नानुबन्धकृतमनेकाल्त्वम्' इति परिभाषया शकारान्तस्यानेकाल्त्वन्न सम्भवतीति वाच्यम्, 'जश्शसोः शिः' इति सूत्रेण जश्शसोः स्थाने श्यादेशविधानात्, तस्य चानुबन्धमुत्सृज्यानेकाल्त्वाभावात् ।

न च तत्र शेः शित्वात्, पूर्वोक्तसूत्रेण तदेव निमित्तीकृत्य सम्पूर्णस्य स्थाने विधीयते आदेश इति वाच्यम्, आदेशविधानात्पूर्वं तस्य शित्वाभावात् । 'लशक्वतद्धिते' इति सूत्रस्य आदेशात् पश्चात्प्रवृत्तेः ।

अष्टानाम् (ई० ३२) अष्टन्शब्दात् प्रातिपदिकादामि 'ष्णान्ता षट्' इति षट्संज्ञायां 'षट्चतुर्भ्यश्च' इति नुटि 'अष्टन आ विभक्तौ' इति नस्य आत्वे 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे अष्टानामिति। आत्वाभावपक्षेऽपि अष्टन् नामित्यवस्थायां 'नोपधायाः' इति दीर्घे 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे अष्टानामित्येव रूपम्।

प्रियाष्ट्नः (ई० ५६) प्रिया अष्टौ येषामिति विग्रहे समासे प्रियाष्टन्शब्दात् प्रातिपदिकात् शसि 'लशक्वतद्धिते' इति शकारलोपे 'यचि भम्' इति भसंज्ञायां 'अल्लोपोऽनः' इति अकारलोपे सकारस्य रुत्वे विसर्गे च कृते सिद्धम्।

न च 'ष्टुना ष्टुः' इति सूत्रेण नकारस्य ष्टुत्वेन णकारः कुतो नेति वाच्यम्, 'अचः परस्मिन् पूर्वविधौ' इति अल्लोपस्य स्थानिवद्भावेनाकारव्यवधानात् तत्संयोगाभावात्। न च 'पूर्वत्रासिद्धीये न स्थानिवत्', इति निषेधेनाकारस्य स्थानिवद्भावाभावात् ष्टुत्वं स्यादेवेति वाच्यम् 'तस्य दोषः संयोगादिलोपलत्वणत्वेषु' इति तन्निषेधात्।

न च 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति परिभाषया तत्र प्रतिपदोक्तस्यैव णत्वस्य ग्रहणात्, अत्र च ष्टुत्वनिष्पन्नात् तदप्रवृत्तेः स्थानिवद्भावनिषेधः स्यादेवेति वाच्यम् 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया अल्लोपस्य बहिरङ्गत्वेनासिद्धत्वात्।

न च राज्ञ इत्यादाविव यथोद्देशपक्षे तस्या अप्रवृत्तिः स्यादिति वाच्यम्, एकपक्षेण सिद्धौ अपरपक्षेण दोषदानस्यानुचितत्वात्।

युङ् (ई० ३९) युजिर् योगे इत्यस्माद्धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च' इति क्विनि 'हलन्त्यम्' इति नस्य 'लशक्वतद्धिते' इति शस्य, इत्संज्ञायां 'तस्य लोपः' इति लोपे इकारस्योच्चारणार्थत्वेनापहारे 'अपृक्त एकाल् प्रत्ययः' इति वकारस्यापृक्तसंज्ञाया 'वेरपृक्तस्य' इति वलोपे 'कृदतिङ्' इति कृत्संज्ञायां कृदन्तत्वेन 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वेन सौ 'युजेरसमासे' इति नुमि सुलोपे 'संयोगान्तस्य लोपः' इति जलोपे नकारस्य 'क्विन्-प्रत्ययस्य कुः' इति कुत्वेन ङकारे युङ् इति रूपम्।

विश्वाराट् (ई० ३४) क्विबन्तात् विश्वराज्शब्दात् प्रातिपदिकात् सौ 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति षत्वे तस्य 'झलां जशोऽन्ते' इति जश्त्वेन डकारे 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सुलोपे 'वाऽवसाने' इति

वैकल्पिकचर्त्वे 'विश्वस्य वसुराटोः' इति दीर्घे विश्वाराट् इति चर्त्वाभावे विश्वाराड् इति रूपद्वयम् ।

युक् (ई० ५१) युज् धातोः 'क्विप् च' इति क्विपि 'कृदतिङ्' इति कृत्संज्ञायां 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वात् सौ सुलोपे 'चोः कुः' इति नकारस्य कुत्वेन गकारे 'वाऽवसाने' इति वैकल्पिके चर्त्वे युक् युग् इति रूपद्वयम् ।

न च 'युजेरसमासे' इति सूत्रेणात्र नुमा भवितव्यमिति वाच्यम्, तत्र रेफविशिष्टस्यैव ग्रहणात् । व्याख्यानाच्चेदं बोध्यम् ।

ऋत्विक् (ई० ३१) ऋतुपूर्वात् यज्धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च' इति क्विनि 'हलन्त्यम्' इति सूत्रेण नकारस्येत्संज्ञायां 'लशक्वतद्धिते' इति ककारस्येत्संज्ञायामिकारस्य उच्चारणार्थत्वादपहारे 'अपृक्त एकाल्प्रत्ययः' इति वकारस्यापृक्तसंज्ञायां 'वेरपृक्तस्य' इति वलोपे यकारस्य सम्प्रसारणे पूर्वरूपे च यणि 'कृदतिङ्' इति कृत्त्वेन 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वेन सौ ऋत्विज् सु इति स्थिते हल्ङ्यादिना सुलोपे 'क्विन् प्रत्ययस्य कुः' इति कुत्वेन जकारस्य गकारे 'वाऽवसाने' इति वैकल्पिकचर्त्वे ऋत्विक् ऋत्विगिति रूपद्वयम् । विग्रहश्चास्य ऋतौ ऋतुं वा यजति । 'वसन्ताय कपिञ्जलानालभेत' इत्यादौ ऋतूनामपि देवतात्वदर्शनात् ।

द्विपर्यन्तानामित्येव । ननु 'तदोः स. सावनन्त्योः' इति सूत्रेण, युष्मद् शब्दस्यापि त्यदादावन्तर्भावात् तकारस्य सत्वं कुतो नेति चेन्न 'तदोः सः सावनन्त्ययोः' इति सूत्रे 'त्यदादीनामः' इति सूत्रस्यानुवर्तनात् तत्र च त्यदादिपदेन द्विपर्यन्तानामेव ग्रहणात् ।

न च 'त्वाहौ सौ' इति सूत्रे तकारोच्चारणेनैवात्र सत्वन्न स्यादिति वाच्यम्, अतित्वमित्यत्र गौणे तकारोच्चारणस्य सफलत्वात् । तत्र चात्वसत्वे न भवतः, यतः सर्वेषां नाम सर्वनामेत्यन्वर्थसंज्ञाबलेन यत्र सर्वादीनां प्राधान्यं स्यात्तत्रैव सर्वनामसंज्ञा भवति । गौणे च सर्वादीनां प्रधानता न विद्यतेऽतः सर्वनामसंज्ञा न भवति । एवञ्च सर्वनामसंज्ञानिमित्तकं सर्वाद्यन्तर्गणकार्यञ्च प्रधानतायामेव न तु गौणतायाम् इति दिक् ।

त्वं स्त्री । ननु त्वं स्त्रीत्यत्र 'त्वाहौ सौ' इति सूत्रेण त्वादेशे 'शेषे लोपः' इति लोपे 'ङेप्रथमयोरम्' इति सोरमादेशे च त्व अम् इति दशायां 'अमि पूर्वः' इति परमपि पूर्वरूपं 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया बाधित्वा टाप् स्यादिति

चेन्न, 'अलिङ्गे युष्मदस्मदी' इति वचनेन तयोः स्त्रीत्वाभावात् ।

'शेषे लोपः' इति सूत्रे शेषे इति षष्ठ्यर्थे सप्तमी ततश्च शेषस्य 'अद्' इत्यस्य लोपः इत्यर्थेन त्व अद् इति स्थिते 'अतो गुणे' इति पररूपे पुनश्च 'अन्तादिवच्च' इति परादिभावेन अद्भागस्य लोपे अदन्तत्वाभावादेव टाप् न भवतीत्यपि बोध्यम् । पूर्वसमाधानारुचिवीजं तु 'शिऽशी लुग्नुम्बिधिभ्यो युष्मदस्मदोर्विभक्त्यादेशाः पूर्वविप्रतिषेधेन' इति वार्तिकप्रामाण्येन तयोः लिङ्गवत्त्वप्रतीतिरेव ।

वस्तुतस्तु अन्त्यलोप एव सिद्धान्तः । अतएव नचादेशो हलादिरस्तीति 'युष्मदस्मदोरनादेशे' इति सूत्रस्थभाष्योक्तिः संगच्छत इति दिक् ।

मपर्यन्तस्य किम् (ई० ५०) ननु युष्मच्छब्दादस्मच्छब्दाच्च, प्रथमाद्वितीययोर्द्विवचने औ तस्य 'ङे प्रथमयोरम्' इति अमादेशे 'युवाऽऽवौ द्विवचने' इति क्रमेण युवावादेशौ युवामावामित्यनयोः मपर्यन्ताधिकारं विनापि सिद्धौ व्यर्थमेवाधिकारसूत्रमिति चेन्न, 'मपर्यन्तस्य' इति सूत्राऽभावे अकज्विशिष्टस्यापि आदेशसम्भवेन युवकाम् आवकामित्यनयोरसिद्धेः ।

न च 'ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्, अन्यत्र तु सुबन्तस्य टेः प्रागकच्' इत्यस्य त्वयका मयका इत्यादिसिद्धये आवश्यकत्वेन, इहापि अकचः प्रागादेशे कृते पश्चात् सुबन्तस्य टेरकचि कृते प्रयोगद्वयस्य सिद्धौ तद्व्यर्थमेवेति वाच्यम्, 'मपर्यन्तस्य' इति अधिकारसूत्राभावे समुदायस्यादेशे 'त्व+आ' 'म+आ' इति जाते 'योऽचि' इत्यनेनाकारस्य यत्वे त्व्या म्या इत्यनिष्टरूपापत्तेः । अतोऽधिकारसूत्रमावश्यकमेवेति दिक् ।

आवाम् (ई० ३०) अस्मच्छब्दात् प्रातिपदिकात् 'प्रथमाया द्विवचने औ ङे प्रथमयोरम्' इति औकारस्यामादेशे 'मपर्यन्तस्य' इत्यधिकारात् 'युवावौ द्विवचने भाषायाम्' इति मपर्यन्तस्यावादेशे 'अतो गुणे' इति पररूपे 'प्रथमायाश्च द्विवचने भाषायाम्' इति दकारस्यात्वे अकः सवर्णे दीर्घे 'अमि पूर्वः' इति पूर्वरूपे आवामिति सिद्धम् ।

यूयम् (ई० ४५) युष्मच्छब्दाज्जसि 'ङे प्रथमयोरम्' इति जसोऽमि 'यूयवयौ जसि' इति यूयादेशे 'शेषे लोपः' इति अन्त्यलोपे 'अमि पूर्वः' इति पूर्वरूपे यूयमिति सिद्धम् ।

नचात्र यूय + अम् इत्यवस्थायां स्थानिवद्भावेन अमि जस्त्वारोपेण अदन्तसर्व-

नाम्नः परतया 'जसः शी' इति श्यादेशः स्यादिति वाच्यम्, 'अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्' इति परिभाषया यूयादेशस्याङ्गकार्यस्य प्रवृत्त्यनन्तरं श्यादेशस्याप्रवृत्तेः।

टिलोपपक्षे तु 'ङे प्रथमयोरम्' इति सूत्रे मकारान्तं प्रश्लिष्य मान्त एवादेशो भवतीति व्याख्यानान्न दोषः ॥

वस्तुतस्तु प्रश्लेषेणापि न निर्वाहस्तस्य भाष्येऽदर्शनात् किन्तु सन्निपातपरिभाषयैवोक्तापत्तेर्वारणमिति दिक् ।

युष्मान् (ई० ३१) युष्मच्छब्दात् प्रातिपदिकाच्छसि 'लशक्वतद्धिते' इति शलोपे 'द्वितीयायाञ्च' इति अन्त्यस्य दमात्रस्यात्वे 'अकः सवर्णे दीर्घः' इति दीर्घे 'शसो न' इति सूत्रेण 'आदेः परस्य' इति सूत्रसहकारेण शसोऽकारस्य नकारादेशे सकारस्य 'संयोगान्तस्य लोपः' इति लोपे युष्मानिति सिद्धम् ।

अस्माभिः—अस्मच्छब्दात् प्रातिपदिकात् भिस्‌विभक्तौ 'युष्मदस्मदोरनादेशे' इति दमात्रस्य आत्वे 'अकः सवर्णे दीर्घः' इति दीर्घे सकारस्य रुत्वे विसर्गे च कृते सिद्धम् ।

युष्मभ्यम् (ई० ३४) युष्मच्छब्दात् प्रातिपदिकात् भ्यसि 'भ्यसो भ्यम्' इति भ्यसः भ्यमादेशे 'शेषे लोपः' इत्यन्तस्य लोपे युष्मभ्यमिति सिद्धम् ।

न च अत्र 'शेषे लोपः' इति दकारमात्रस्य लोपे युष्मशब्दस्यादन्तत्वात् 'बहुवचने झल्येत्' इति सूत्रेण एत्वं कथन्नेति वाच्यम्, 'अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्' इति परिभाषया तन्निषेधात् ।

यद्वा 'भ्यसोभ्यम्' इति सूत्रस्य भ्यसोऽभ्यम् आदेशो भवतीति अर्थकरणेन 'शेषे लोपः' इति टिलोपे तस्यादन्तत्वाभावात् तच्छङ्कैव नास्तीति । अन्त्यलोपपक्षे च 'अतो गुणे' इति पररूपेणेष्टसिद्धेरिति । न चाकारोच्चारणसामर्थ्यात् पररूपं बाधित्वा सवर्णदीर्घापत्तिरिति वाच्यम्, अकारोच्चारणस्यैत्वनिवर्तकत्वेन चारितार्थ्यात् सामर्थ्यविरहेण तदसम्भवात् ।

मत् (ई० ४६) अस्मच्छब्दात् प्रातिपदिकात् ङसि विभक्तौ 'त्वमावेकवचने' इति मपर्यन्तस्य मादेशे 'एकवचनस्य च' इति ङसेरदादेशे 'अतो गुणे' इत्यनेन पूर्वाकारस्य पररूपे 'शेषे लोपः' इति टिलोपे सिद्धम् । अन्त्यस्यैव लोप इति पक्षे तु पर्यायेण त्रयाणामकाराणां पररूपं बोध्यम् ।

युष्मत् (ई० ३२)युष्मच्छब्दात् प्रातिपदिकाद् भ्यसि 'पञ्चम्या अत्' इत्यदा-

देशे 'शेषे लोपः' इति दकारस्य लोपे 'अतो गुणे' इति पररूपे सिद्धम् ।

युष्माकम् (ई० ५२, ५६, ५७) युष्मच्छब्दात् प्रातिपदिकात् आमि 'साम आकम्' इति आमि सामत्वारोपेणाकमादेशे 'शेषे लोपः' इति दमात्रस्य लोपे 'अकः सवर्णे दीर्घः' इति दीर्घे युष्माकमिति सिद्धम् ।

ननु युष्मत् आमित्यवस्थायां 'आमि सर्वनाम्नः सुट्' इति सूत्रेण विहितस्य सुटः अवर्णान्ते आमि विधानेनात्रावर्णान्तत्वाभावात् सुटोऽप्राप्त्या ससुट्कनिर्देशो न युक्त इति चेन्न, दलोपे कृतेऽदन्तत्वस्य सत्वात् ।

न च आकमादेशात् प्राक् तत्रानादेशतया 'योऽचि' इति सूत्रप्रवृत्त्या तदप्रसक्तेस्तन्न युक्तमिति वाच्यम्, आकमि कृते 'शेषे लोपः' इति दलोपे च कृते प्राप्तस्य सुटो निवृत्त्यर्थं तस्यावश्यकत्वात् ।

समस्यमाने (ई० ५८) ननु 'युवावौ द्विवचने' इति 'त्वमावेकवचने' इति द्वयोरेकवचनद्विवचनयोरर्थपरत्वं प्रत्ययपरत्वं वेति चेदुच्यते, तत्र तयोरर्थपरत्वमेव ।

तथा च यत्र समासे लौकिकविग्रहवाक्ये युष्मदस्मच्छब्दौ द्वित्वस्य वाचकौ स्तः, तत्र सुजस् ङे ङस् इति चतस्रः विभक्तीः विहाय अन्यविभक्तौ सर्वत्रैव युवावौ स्याताम् ।

यत्र च समासे लौकिकविग्रहवाक्ये युष्मदस्मद्शब्दौ एकत्वस्य वाचकौ स्तः, तत्र सर्वत्रैव त्वमौ स्याताम् । यत्र च युष्मदस्मद्शब्दौ बहुत्वस्य वाचकौ स्तस्तत्र युवावौ, त्वमौ चादेशौ न भवतः ।

इत्थञ्च त्वां मां वाऽतिक्रान्त इति विग्रहे सर्वत्र त्वमौ भविष्यतः । रूपञ्चातित्वमत्यहमित्यादि । यत्र च युवामावां वाऽतिक्रान्त इति विग्रहो भविष्यति तत्र सर्वत्र युवावौ आदेशौ भविष्यतः । रूपञ्चातियुवामत्यावामित्यादि । औ अम् औट्सु । यत्र च युष्मानस्मान् वाऽतिक्रान्त इति विग्रहः स्यात्तत्र युवावौ त्वमौ आदेशौ न भविष्यतः । रूपञ्चातियुष्मान् अत्यस्मानित्यादि । सु जस् ङे ङस्सु प्राग्वद्रूपं भविष्यति । इदञ्च औ अम् औट्सु ।

श्रीशस्त्वावतु०—इह संसारे, श्रीशः नारायणः, त्वा-त्वाम्, मा माम्, अपि-च, शर्म-कल्याणम् अवतु-रक्षतु । स हरिः पूर्वोक्तः नारायणः, ते-तुभ्यम् मे मह्यम् अपि-च, स्वामी-दत्तात् ददातु । स हरिः—पूर्वोक्तः नारायणः, ते तव, मे-मम, अपि-च, स्वामी-प्रभुः अस्तीति । स विभुः व्यापको नारायणः वां-युवाम्, नौ-आवाम् पातु रक्षतु

स ईश व्यापको हरिः, वां-युवाभ्याम्, नौ-आवाभ्याम्, सुखं-कल्याणम् ददातु दत्तात्। स हरिः व्यापको नारायणः, वां-युवयोः, नौ-आवयोः पतिः स्वामी-रक्षकोऽस्ति। सः-हरिः, वः युष्मान्, नः अस्मान्, अव्यात्-रक्षेत्। स हरिः, वः-युष्मभ्यम् नः अस्मभ्यम्, शिवं-कल्याणम् दद्यात् अत्र-इह लोके हरिः, वः युष्माकम्, नः-अस्माकम् सेव्यः आराध्योऽस्ति।

देवास्मान् पाहि (ई० ४३) अत्र बहुवचनान्तस्य सम्बोधनस्य 'देवा' इत्यस्य 'सामन्त्रितम्' इत्यनेनामन्त्रितसंज्ञायां 'आमन्त्रितं पूर्वमविद्यमानवत्' इत्यनेनाऽविद्यमानवद्भावे 'बहुवचनस्य वस्नसौ' इत्यनेनास्मत् शब्दस्य पदपरत्वाभावात् नसादेशो न भवति।

प्राचः—(ई० ५२) प्रपूर्वाञ्च धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च' इत्यनेन क्विनि सर्वापहारिलोपे क्विनः कित्वात् 'अनिदितां हल उपधायाः क्ङिति' इत्यनेनोपधायां विद्यमानस्य नस्य लोपे 'प्र अच्' इति स्थिते 'कृदतिङ्' इति कृत्वेन 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वेन. शसि 'यचि भम्' इति भसंज्ञायां 'अच.' इति अकारलोपे 'चौ' इति दीर्घे सकारस्य रुत्वे विसर्गे च कृते प्राचः इति सिद्धम्।

प्रतीचः (ई० ३९) प्रतिपूर्वादञ्चधातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च' इत्यनेन क्विनि 'लशक्वतद्धिते' इति ककारस्य 'हलन्त्यम्' इति नकारस्य लोपे इकारस्योच्चारणार्थत्वेनापगते 'अपृक्त एकाल्प्रत्ययः' इति वकारस्यापृक्तसंज्ञायां 'वेरपृक्तस्य' इति वलोपे क्विनः कित्वात् 'अनिदितां हल उपधायाः क्ङिति' इत्यनेनोपधानकारस्य लोपे 'कृदतिङ्' इति कृत्वेन 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वेन शस्यनुबन्धलोपे 'यचि भम्' इति भसंज्ञायां 'अचः' इति अकारलोपे 'चौ' इति दीर्घे सकारस्य रुत्वे विसर्गे च सिद्धम्।

न चात्र 'अच' इति लोपात् प्रागेवान्तरङ्गत्वात् यण् भविष्यतीति वाच्यम्, 'अकृतव्यूहाः पाणिनीयाः' इति परिभाषयाऽन्तरङ्गस्यापि यणोऽप्रवृत्तेः।

अतित्वाम् (ई० ३७) 'त्वमावेकवचने' इति सूत्रे एकवचनशब्दस्यार्थपरतया त्वामतिक्रान्त इति विग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इत्यनेन समासे लोपादिकार्ये अतियुष्मद् शब्दात् प्रातिपदिकात् षष्ठीबहुवचने आमि 'त्वमावेकवचने' इति

त्वमादेशे 'शेषे लोपः' इति अन्त्यलोपे 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे सिद्धम् ।

अतिमाम् (ई० ३५) 'त्वमावेकवचने' इति सूत्रे एकवचनशब्दस्यार्थपरतया मामतिक्रान्त इति विग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासे अत्यस्मद्-शब्दादौ विभक्तौ अत्यस्मत् शब्दस्यैकत्वसंख्याभिधायकत्वेऽपि पूर्वविप्रतिषेधात् 'त्व-मावेकवचने' इति मादेशे 'प्रथमायाः द्विवचने भाषायाम्' इति सूत्रेणाकारे 'ङेप्रथम-योरम्' इत्यौकारस्यामादेशे 'अमि पूर्वः' इति पूर्णरूपेऽतिमामिति सिद्ध्यति ।

अतियुवया (ई० ३८) 'युवावौ द्विवचने' इति सूत्रे द्विवचनशब्दस्यार्थपरत्वेन युवामतिक्रान्त इति विग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासे अतियुष्मद् शब्दात् तृतीयैकवचने टाविभक्तौ अत्वे पररूपत्वे 'युवावौ द्विवचने' इति युवादेशे 'योऽचि' इत्यनेन यकारादेशे अतियुवया इति सिद्धम् ।

अतित्वाकम् (ई० ४३, ४८, ५१) त्वामतिक्रान्त इति विग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासे अतियुष्मद् शब्दात् प्रातिपदिकादामि 'त्वमावेक-वचने' इति त्वमादेशे 'शेषे लोपः' इति अन्त्यलोपे 'साम आकम्' इत्याकमादेशे सवर्णदीर्घे अतित्वाकमिति सिद्धम् ।

नन्विह अतियुष्मद्शब्दघटकस्य 'युष्मद्' शब्दस्योपसर्गत्वेन सर्वादित्वविरहात् तदन्तस्य सर्वनामत्वाभावेन, सर्वनाम्नो विहितस्यैवामः सुटो विधानात् प्रकृते सुट्-सम्भावनाया अपि नितरामनुपलम्भात् 'साम आकम्' इत्यस्य प्रवृत्तिः कथमिति चेन्न, अतित्वाकमिति प्रयोगस्य भाष्यकृता प्रदर्शितत्वेन यत्र सुटः सम्भवः तदर्थं ससुट्क-निर्देशात्, यत्र च न सम्भवः तत्र च केवलस्यामः आकमादेशस्य ससुट्कनिर्देशेन कल्पनादिति ।

अग्ने तव (ई० ४०) अग्ने तव इत्यत्र 'सामन्त्रितम्' इत्यनेन 'अग्ने' इत्य-स्यामन्त्रितसंज्ञायां 'आमन्त्रितं पूर्वमविद्यमानवत्' इत्यनेनाविद्यमानवद्भावेन 'तव' इत्यस्य पदपरत्वाभावात् ते आदेशो न भवति ।

युष्मानतिक्रान्त इति (ई० ४६) द्व्येकसंख्यः समासार्थो बह्वर्थे युष्मदस्मदी । तयोरद्व्येकतार्थत्वान्न युवावौ त्वमौ च न ॥ इति श्लोके यदा तदा शब्दमध्याहार्य 'यदा युष्मान् अस्मान् वातिक्रान्तौ अतिक्रान्ता इति वा विग्रहे समासे सति द्वित्वेक-त्वविशिष्टसमासार्थः समासस्य मुख्यविशेष्यभूतः, युष्मदस्मदी तु बह्वर्थकः, तदा युवावौ

त्वमौ चादेशौ न भवतः तयोर्द्वित्वैकत्वविशिष्टार्थत्वाभावात् । अत्र युष्मच्छब्दस्य एकद्व्यर्थवाचित्वाभावात् सुजसङेङस्भ्योऽन्यत्र मपर्यन्तस्य क्विपि न त्वमौ न च युवावौ स्तः । 'ङे प्रथमयोरम्' इत्यादयस्तु भवन्त्येव सुजसङेङस्सु तु 'त्वाहौ, यूय-वयौ, तुभ्यमह्यौ, तवममौ' इत्येते आदेशाः भवन्त्येव तेषां एकद्व्यर्थनिबन्धनाभावा-दिति बोध्यम् ।

अमुमञ्चतीति (ई० ४१) अमुमञ्चतीति विग्रहे क्विबन्तत्वात् प्रातिपदिकात् सौ 'अनिदितां हल उपधायाः क्ङिति' इति नलोपे 'उगिचां सर्वनामस्थानेऽधातोः' इति नुमि सुलोपे 'संयोगान्तस्य लोपः' इति च लोपे 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन नका-रस्य ङकारे 'विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये' इत्यनेनाद्र्यादेशे 'इको यणचि' इति यणि 'अदसोऽद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत्' इति बलात् 'अदसोऽसेर्दा-दुदोमः' इति उत्वमत्वे 'अमुमुयङ्' इति सिद्धम् । असेरिति निर्देशेन यत्र सकार-स्याकारो भवति तत्रैव मुत्वं भवतीति पक्षे अदद्र्यङ् इति रूपं भवति ।

अदसोऽसेरिति (ई० ४९) अदसः, असेः दात्, उः, दः इति पदच्छेदः । अर्थश्च सम्पद्यते यत् 'अदसोऽसान्तस्य दात्परस्य उदूतौ स्तः दस्य च मो भवति ।

न च सूत्रे उत्वस्यैव सत्वादुदूतौ इति न सम्भवतः इति चेदुच्यते, उश्च ऊश्च इति विग्रहे समाहारद्वन्द्वे सुब्लुकि सवर्णदीर्घे 'स नपुंसकम्' इति नपुंसकत्वे 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे 'स्वमोर्नपुंसकात्' इति सोर्लुकि कृते निष्पन्नस्य 'उ' इत्यस्य उदूतावित्यर्थस्य सुलभत्वात् । उदाहरणञ्च ह्रस्वाकारस्य 'अमुम्' । अत्र अदस् अम् इति स्थिते अत्वे 'अतो गुणे' इति पररूपे 'अमि पूर्वः' इति पूर्वरूपे च कृते दात्परस्याकारस्योत्वं दकारस्य मत्वं च भवति ।

दीर्घोकारस्योदाहरणञ्च 'अमू' इति अत्र अदस् औ इति स्थितेऽत्वे पररूपे 'वृद्धिरेचि' इति वृद्धौ दात् परस्योकारस्य दीर्घे ऊकारे दकारस्य मत्वञ्च सम्पद्यते ।

अमुमुयङ् (ई० ३७) अमुमञ्चतीति विग्रहे समासे सुब्लुकि 'अदस् अञ्च' इत्यवस्थाया 'विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये' इत्यद्र्यादेशे अदद्रि अञ्च इति स्थिते 'अनिदितां हल उपधायाः क्ङिति' इति नलोपे यणि ततः प्रातिपदिकत्वात् सौ तस्य 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति लोपे 'अदसोऽसेर्दादुदो मः' इति दकारद्वयस्य मत्वे, अकाररेफयोश्चोकारे कृते 'अमुमुयङ्' इति रूपम् ।

अलोऽन्त्यस्य' इति सूत्रेण इकारस्योत्वं प्राप्नोति दकारोच्चारणाच्च रेफस्योत्वं

प्राप्नोति तत्र दकारोच्चारणसामर्थ्याद्रेफस्यैवोत्वं स्यादिति पक्षे 'अन्त्यबाधेऽन्त्य-सदेशस्य' इति परिभाषया परस्यैव मकारे उकारे च कृते अमुमुयङ् इति रूपम् ।

असेरिति निर्देशेन यत्र सकारस्याकारो भवति तत्रैव मुत्वं भवतीति पक्षे मुत्वा-प्राप्तेः अदद्र्यङ् इति रूपम् ।

इति पक्षत्रयमपि भाष्यसम्मतमत उक्तम्—

अदसोऽद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत् ।
केचिदन्त्यसदेशस्य नेत्येकेसेर्हि दृश्यते ॥

अमुमुईचः (ई० ५१) अमुमञ्चतीति विग्रहे क्विनि समासादिकार्ये 'विष्व-ग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये' इत्यनेनाद्र्यादेशे 'अदद्रि अञ्च्' इति स्थिते 'अनिदितां हल उपधायाः क्ङिति' इति नलोपे प्रातिपदिकत्वात् शस्यनुबन्धलोपे 'अदसोऽसेर्दादु दो मः' इति दकारद्वयस्य मत्वेऽकारस्य रेफस्य चोत्वे 'अमुमु इ अच्' इति स्थिते 'अचः' इति अकारलोपे 'चौ' इति दीर्घे सकारस्य रुत्वे विसर्गे च कृते सिद्धम् ।

न चात्र 'अमुमु इ अच्' इत्यावस्थायां 'इको यणचि' इत्यनेन यण् कुतो नेति वाच्यम्, 'अकृतव्यूहाः पाणिनीयाः' इति परिभाषयाऽन्तरङ्गोऽपि यण् 'अचः' इति लोपविषये न प्रवर्तते इति सिद्धान्तात् । अथवा 'चौ' इति सूत्रारम्भसामर्थ्यात् यदि पूर्वं यण् सम्पत्स्यते तदाऽञ्चतौ परेऽणोऽभावात् तदप्रवृत्तिः स्यादेवञ्च व्यर्थं स्यात् ।

अदद्र्यङ् (ई० ४९) अमुमञ्चतीति विग्रहे समासे सुब्लुकि 'ऋत्विग् दधृक्-स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च' इति सूत्रेण क्विनि सर्वापहारिलोपे 'विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये' इति टेरद्र्यादेशे 'अनिदितां हल उपधायाः क्ङिति' इत्यनेन नलोपे 'इको यणचि' इति यणि 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमि 'कृदति-ङ्' इति कृत्वेन प्रातिपदिकत्वात् सौ सुलोपे 'संयोगान्तस्य लोपः' इति चलोपे 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन नकारस्य ङकारे असेरिति निर्देशेन मुत्वाभावे 'अद-द्र्यङ्' इति सिद्धम् । 'अदसोऽसेर्दादु दो मः' इति सूत्रेण 'चलीक्लुप्यते' इत्यत्र 'कृपो रोलः' इति लत्ववत् दकारद्वयस्य मत्वेऽकारस्य रेफस्योत्वे कृते 'अमुमुयङ्' इति रूपम् ।

'अलोऽन्त्यस्य' इत्यनेन इकारस्योत्वं प्राप्नोति, दकारोच्चारणाच्च रेफस्योत्वं प्राप्नोति, तत्र दकारोच्चारणसामर्थ्यात् रेफस्यैवोत्वं स्यात् पक्षेऽस्मिन् 'अन्त्यबाधे-ऽन्त्यसदेशस्य' इति परिभाषया परस्यैव मुत्वे कृते 'अदमुयङ्' इति रूपत्रयम् । अयं पक्षः भाष्ये प्रतिपादितोऽस्ति—

अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छन्ति लत्ववत् ।
केचिदन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते ॥

अप्रत्ययग्रहणमिति । ननु 'विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये' इति सूत्रेऽप्रत्ययग्रहणाभावे उत्तरपदाधिकारत्वात् अञ्चुधातूत्तरपदे परे विष्वग्देवयोः सर्वनाम्नश्च टेरद्र्यादेशो भवतीति अर्थेन यत्र लुप्तप्रत्ययान्तं केवलाञ्चुधातूत्तरपदं यथाऽमुमुयङित्यादि तत्रैव प्रवृत्तेः, विष्वगञ्चनमित्यादौ चाञ्चनमित्युत्तरपदस्याञ्चुधातुरूपत्वाभावेन तस्याप्रवृत्तेः सर्वत्राऽदोषात् तत्राप्रत्ययग्रहणं किमर्थमिति चेदुच्यते, तत्राप्रत्ययग्रहणं धातुग्रहणे तदादिविध्यर्थम् । तेन 'अयस्कारः' इत्यत्र 'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य' इति सूत्रेण सत्वं भवति । विष्वगञ्चनमित्यादौ द्र्यादेशापत्तिवारणत्वेन स्वांशे चारितार्थ्यमपि सिद्ध्यति ।

उदीचः (ई० ४७) उत् पूर्वादञ्चधातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च' इत्यनेन नकारस्य 'लशक्वतद्धिते' इत्यनेन च ककारस्य इत्संज्ञात्वेन 'तस्य लोपः' इत्यनेन लोपे इकारस्योच्चारणार्थत्वेनापहारे 'अपृक्त एकाल् प्रत्ययः' इत्यनेन नकारस्यापृक्तसंज्ञायां 'वेरपृक्तस्य' इत्यनेन वलोपे 'अनिदितां हल उपधायाः क्ङिति' इत्यनेनोपधाभूतस्य नस्य लोपे 'कृदतिङ्' इति कृत्त्वेन 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वात् शस्यनुबन्धलोपे 'यचि भम्' इत्यनेन भत्वात् 'अचः' इत्यनेनाकारलोपं प्रबाध्य 'उद ईत्' इतीत्वे सकारस्य रुत्वे विसर्गे च कृते सिद्धम् ।

समीचः (ई० ४२) सम्पूर्वादञ्चधातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च' इत्यनेन क्विनि 'हलन्त्यम्' इति नकारस्य इत्संज्ञायां 'लशक्वतद्धिते' इति ककारस्य इत्संज्ञायां 'तस्य लोपः' इति लोपे इकारस्याप्युच्चारणार्थत्वेन निवृत्तौ 'अपृक्त एकाल् प्रत्ययः' इत्यनेन वकारस्यापृक्तसंज्ञायां 'वेरपृक्तस्य' इति वलोपे 'अनिदितां हल उपधायाः क्ङिति' इत्यनेनोपधायां विद्यमानस्य नकारस्य लोपे 'कृदतिङ्' इति कृत्त्वेन 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वात् शस्यनुबन्धलोपे 'सम् अच् अस्' इति स्थिते 'समः समि' इत्यनेन समुपसर्गस्य सम्यादेशे 'यचि भम्' इति भत्वेन 'अचः' इति सूत्रेणाकारलोपे 'चौ' इति दीर्घे सकारस्य रुत्वे विसर्गे च कृते सिद्धम् ।

तिरश्चः (ई० ३४) तिरस् पूर्वादञ्चधातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च' इति क्विनि सर्वापहारिलोपे 'अनिदितां हल उपधायाः क्ङिति' इति

नलोपे 'कृदतिङ्' इति कृत्त्वेन 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वात् शस्यनुबन्धलोपे 'यचि भम्' इति भत्वेन 'अचः' इति अकारलोपे 'तिरसस्तिर्यलोपे' इत्यस्यालुप्ताकारे एव प्रवृत्तित्वात् प्रयोगे च अलोपत्वात् तदप्रवृत्तेः 'स्तोः श्चुना श्चुः' इति श्चुत्वेन सकारस्य शकारे सकारस्य रुत्वे विसर्गे च कृते सिद्धम् ।

न चात्र अल्लोपस्य स्थानिवत्त्वेन व्यवधानात् श्चुत्वन्न स्यादिति वाच्यम्, पूर्वत्रासिद्धीये तन्निषेधात् पदान्तविधौ तदप्रवृत्तेश्च ।

उगिदचामिति । ननु 'उगिदचां सर्वनामस्थानेऽधातोः' इति सूत्र उगिदित्येनैवाञ्चुधातोरपि सिद्धौ सूत्रेऽज्ग्रहणं किमर्थमिति चेदुच्यते, 'सिद्धे सति आरम्यमाणो विधिर्नियमाय भवति' इति न्यायेनऽज् ग्रहणेन नियम्यते यत् 'धातोश्चेदुगित्कार्यं तर्हि नलोपिनोऽञ्चतेरेव' इति । तेनाञ्चुधात्वतिरिक्तानां 'स्रत्, ध्वत्' इत्यादीनां नुम न भवति । 'उखास्रत् ब्राह्मणी' इत्यादौ च ङीप्न भवति । 'नलोपिनोऽञ्चतेरेवे'ति नियमेन 'प्राङ् ब्राह्मणी' इत्यत्र ङीन्न भवति तस्यालुप्तनकारत्वात् ।

नचात्र अञ्चुग्रहणज्ञापितेनोक्तनियमेनैव अञ्चुधात्वतिरिक्तानां वारणसम्भवे सूत्रे धातोरिति ग्रहणं व्यर्थमिति चेन्न, तत्राधातोरिति ग्रहणेन अधातुपूर्वस्यापि नुम्भवति इति ज्ञापनेनादोषात् ।

तेन क्यजन्तप्रकृतिकगोमच् शब्दात् क्विबन्तात् नुम् सिद्धयति एवञ्च गोमान् इत्यस्य निष्पत्तिर्भवति ।

न चाञ्चतिग्रहणेनौपदेशिकधातोश्चेदुगित्कार्यं तर्हि अञ्चतेरेवेति नियमेन कुत्रापदोपादधातुग्रहणं त्यज्यतामिति वाच्यम्, अञ्चुग्रहणज्ञापितस्य तस्य नियमस्य नुम्मात्रविषयकत्वाभावात् 'गोमान्' इत्यादौ 'उगितश्च' इति ङीबापत्तेः तस्यौपदेशिकत्वाभावात् ।

गोमान् (ई० ५२) गोमन्तमात्मन इच्छतीति विग्रहे 'सुप आत्मनः क्यच्' इति क्यचि पुनः तदन्तात् 'क्विप् च' इति क्विप्यनुबन्धलोपे अल्लोपे 'लोपो व्योर्वलि' इति यलोपे गोमच्छब्दो निष्पद्यते। तस्मात् प्रातिपदिकात् सौ 'अत्वसन्तस्य चाऽधातोः' इति दीर्घे 'उगिदचां सर्वनामस्थानेऽधातोः' इत्यनेन नुमि 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सलोपे 'संयोगान्तस्य लोपः' इति तलोपे संयोगान्तलोपस्याऽसिद्धत्वान्नलोपो न भवति ततश्च सिद्धयति गोमानिति रूपम् ।

न च 'क्विबन्ता धातुत्वम्न जहति' इति नियमेन गोमच्छब्दे धातुत्वस्य विद्यमानत्वात् तस्माद् धातुप्रयुक्तं लकारादिकार्यं कुतो न भवतीति वाच्यम्; लकारादीनां व्यासज्यवृत्तिधर्मानवच्छिन्नधातुत्वधर्मावच्छिन्नधातोरेव विधानात् अत्र च प्रातिपदिकत्व-धातुत्वरूपव्यासज्यवृत्तिधर्मेण गोमच्छब्दस्वावच्छिन्नत्वात् लकारादीनामप्रसक्तेः।

न चात्र 'उगिदचां सर्वनामस्थानेऽधातोः' इत्यनेन तत्राधातोरिति प्रतिषेधेन नुम् न भविष्यतीति वाच्यम्, सूत्रेऽजग्रहणज्ञापितेन 'धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेव' इति नियमेनैव अञ्चुधात्वतिरिक्तानां धातूनां वारणसम्भवे तत्राधातुग्रहणं व्यर्थीभूय ज्ञापयति यत् अधातुभूतपूर्वस्यापि नुम् भवतीति। तेन सम्प्रति धातुत्वाऽभावेऽपि पूर्वं धातोरभावेन तत्सिद्धेः।

तादृक् (ई० ४) तद्पूर्वकदृश्धातोः 'त्यदादिषु दृशोऽनालोचने कञ्च' इति सूत्रेण क्विनि तत्र 'हलन्त्यम्' इत्यनेम नकारस्य 'लशक्वतद्धिते' ईति ककारस्य इत्संज्ञायां 'तस्य लोपः' इति लोपे इकारस्याप्युच्चारणार्थत्वेनापहारे 'अपृक्त एकाल् प्रत्ययः' इति अपृक्तसंज्ञायां वकारस्य, 'वेरपृक्तस्य' ईति लोपे 'आ सर्वनाम्नः' इति तच्छब्दस्याकारान्तादेशे सवर्णदीर्घे तादृश् शब्दात् प्रातिपदिकात् सौ "क्विन् प्रत्ययस्य कुः' इत्यस्यासिद्धत्वात् 'व्रश्चभ्रस्जसमृजयजराजभ्राजच्छशां षः' इत्यनेन शकारस्य षकारे तस्य जश्त्वेन डकारे तस्य कुत्वेन गकारे तस्य 'वाऽवसाने' इति वैकल्पिकेन चर्त्वेन ककारे रूपद्वयं तादृक् तादृगिति सिद्धयति।

कैय्यटादिमते तु—षत्वापवादत्वात् शकारस्य कुत्वेन खकारे तस्य चर्त्वेन ककारे सिद्धयति रूपम्।

न च चर्त्वाभावपक्षे जश्त्वं प्रति कुत्वस्यासिद्धत्वात् तादृग् इति द्वितीयं रूपं न सिद्धयेदिति वाच्यम् 'दिगादिभ्यो यत्' इति निर्देशेनाऽदोषात्। तस्यासिद्धत्वाभावकल्पनात्।

कुत्वस्यासिद्धत्वादिति। स इवायं पश्यतीति विग्रहे उपपदसमासे तद्पूर्वाद् दृश् धातोः 'त्यदादिषु दृशोऽनालोचने कञ्च' इति क्विनि सर्वापहारिलोपे प्रातिपादिकत्वात् सौ 'व्रश्चभ्रस्ज—' इत्यादिना शकारस्य षकारे तस्य जश्त्वेन डकारे तस्य कुत्वेन गकारे तस्य चर्त्वेन ककारे तादृक् इति दीक्षिताशयः। कैयटाद्याशयस्तु 'क्विन्

प्रत्ययस्य कुः' इत्यत्र कुः क्विन्यत इति न्यासेनैव सिद्धे प्रत्ययग्रहणं वीप्सागर्भ-बहुव्रीहिलाभार्थं तेन षत्वापवादत्वात्कुत्वेन खकारे चर्त्वे त्वादृक् इति । चर्त्वाभाव-पक्षे च जश्त्वं प्रति कुत्वस्यासिद्धत्वात् खकार एव न गकारः । अथवा 'दिगादिभ्यो यत्' इति निर्देशेन नाऽसिद्धत्वमिति बोध्यम् ।

घृतस्पृक् (ई० ४०) घृतं स्पृशतीति विग्रहे उपपदसमासे समासत्वात् सुब्लुकि 'स्पृशोनुदके क्विन्' इति क्विनि सर्वापहारिलोपे घृतस्पृश् शब्दात् प्रातिपदिकात् 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इत्यनेन षत्वे तस्य 'झलां जशोऽन्ते' इति जश्त्वेन डकारे तस्य 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन गकारे 'वाऽवसाने' इति वैकल्पिकचर्त्वे घृतस्पृक्, घृतस्पृग्, इति रूपद्वयं निष्पन्नम् ।

स्पृक् (ई० ४१) स्पृशतीति विग्रहे 'क्विन् च' इत्यनेन क्विप्यनुबन्धलोपे स्पृश् शब्दात् प्रातिपदिकात् सौ तस्य हल्ङ्यादिना लोपे शकारस्य 'व्रश्चभ्रस्जसृज-मृजयजराजभ्राजच्छशां षः' इत्यनेन षकारे तस्य 'झलां जशोऽन्ते' इति जश्त्वेन डकारे तस्य 'क्विन्प्रत्ययस्य कुः' इत्यनेन कुत्वेन गकारे तस्य 'वाऽसाने' इति चर्त्वेन ककारे स्पृक्, स्पृग् इति रूपद्वयस्य निष्पत्तिः ।

न चात्र क्विन् प्रत्ययस्याभावात् 'क्विन्प्रत्ययस्य कुः' इत्यस्याप्रवृत्तेः कथं कुत्व-मिति वाच्यम्, 'क्विनः कुः' इति न्यासेनैव सिद्धे प्रत्ययग्रहणं ज्ञापयति यत् क्विन् प्रत्ययो यस्मादिति बहुव्रीहिः तस्मात् निरुपसर्गात् स्पृशेः क्विपि कृतेऽपि कुत्वं भव-त्येवेति उदाहरणस्य तत्र सत्त्वात् ।

षण्णाम् (ई० ५२) षष् शब्दात् प्रातिपदिकात् आमि 'षट्चतुर्भ्यश्च' इति नुटि 'झलां जशोऽन्ते' इति जश्त्वेन षकारस्य डकारे 'ष्टुना ष्टुः' इति ष्टुत्वेन नका-रस्य णकारे 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रं बाधित्वा 'प्रत्यये भाषायां नित्यम्' इत्यनेन डकारस्य णत्वे षण्णाम् इति सिद्धम् । नचात्र 'नपदान्ताट्टोरनाम्' इति ष्टुत्वनिषेधः स्यादिति वाच्यम्, अनामिति पर्युदासात् ।

प्राचीनैः 'षड्णाम्' इति यदुदाहृतं तन्न युक्तम्, 'प्रत्यये भाषायां नित्यम्' इत्यत्र नित्यपदोपादानात् नित्यानुनासिकस्यैव तत्र सम्भवात् ।

पिपठीः (ई० ४१) पठितुमिच्छतीति विवक्षायां निष्पन्नात् पिपठिष् शब्दात् प्रातिपदिकात् सौ तस्य 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति लोपे रुत्वे

कर्त्तव्ये षकारस्य 'पूर्वत्राऽसिद्धम्' इत्यनेनाऽसिद्धत्वात् 'ससजुषो रुः' इत्यनेन रुत्वेऽनुबन्धलोपे 'र्वोरुपधाया दीर्घ इकः' इति दीर्घे 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे पिपठीः सिद्धम् ।

नुम्विसर्जनीय० । ननु 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति सूत्रे नुम् ग्रहणं व्यर्थं नुमः शर्षु पाठादिति चेन्न, शर्षु पाठात्तद्ग्रहणसम्भवेऽपि सूत्रे तत्पाठेन कल्प्यते 'यदि षत्वमनुस्वारव्यवहितस्य स्यात्तर्हि नुम्स्थानिकेनैव' इति । तेन निंसु, पुंसु, इत्यादौ षत्वन्न भवति इत्यदोषात् । सुहृन् सु इत्यत्रापि षत्ववारणप्रयोजनात् ।

पिपठीष्षु (ई० ३७) पठितुमिच्छति इत्यर्थे निष्पन्नात् पिपठिस्शब्दात् प्रातिपदिकात् सुप्यनुबन्धलोपे 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात् रुत्वकर्त्तव्यतायां षत्वस्याऽसिद्धत्वात् 'ससजुषो रुः' इत्यनेन सकारस्य रुत्वेऽनुबन्धलोपे 'र्वोरुपधाया दीर्घ इकः' इत्यनेनोपधाया इकः दीर्घे रेफस्य 'खरवसानयोर्विसर्जनीयः' इति विसर्गे तस्य 'वा शरि' इत्यनेन पाक्षिके विसर्गे 'नुम्विसर्जनीयशर्व्यवायेऽपि' इत्यनेन विसर्गव्यवधानस्य सुपः सकारस्य षत्वे 'पिपठीःषु' इति रूपम् । 'विसर्जनीयस्य सः' इति विसर्गस्य सत्वपक्षे सुपः सकारस्य 'नुम्विसर्जनीय' इत्यनेन षत्वे विसर्जनीयसकारस्य च 'ष्टुना: ष्टुः' इति ष्टुत्वेन षत्वे 'पिपठीष्षु' इति रूपद्वयम् । अयोगवाहानामट्सु पाठात् 'आदेशप्रत्यययोः' इत्यनेन षत्वन्न शंक्यम् अपदान्तस्येति निषेधात् ।

चिकीर्षुः (ई० ५३) कर्तुमिच्छतीति विवक्षायां निष्पन्नात् चिकीर्षु शब्दात् प्रातिपदिकात् सुप्यनुबन्धलोपे 'पूर्वत्रासिद्धम्' इत्यनेन षत्वस्यासिद्धत्वात् 'रात्सस्य' इति नियमेन सकारस्य 'संयोगान्तस्य लोपः' इति लोपे 'आदेशप्रत्यययोः' इति सुपः सकारस्य षत्वे चिकीर्षुः इति सिद्धम् । 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गत्वन्न शङ्क्यम् 'रोऽसुपि' इति नियमेन तदवृत्तेः ।

न चात्र 'अचो रहाभ्यां द्वे' इति सूत्रेण षकारस्य द्वित्वं स्यादिति वाच्यम् 'शरोऽचि' इति तन्निषेधात् ।

विविट् (ई० ४५) वेष्टुमिच्छतीति विग्रहे विशेः 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इत्यनेन सन्यनुबन्धलोपे 'सन्यङोः' इति द्वित्वे अभ्यासादिकार्ये 'व्रश्चभ्रस्ज' इत्यादिना शकारस्य षत्वे तस्य 'षढोः कः सि' इति कत्वे 'आदेशप्रत्यययोः' इति सनः सकारस्य षत्वे कषयोः संयोगेन क्षत्वे 'सनाद्यन्ता धातवः' इति

धातुत्वात् 'क्विप् च' इति क्विप्यनुबन्धलोपे 'अतो लोपः' इत्यकारलोपेन निष्पन्नात् विविक्ष् शब्दात् प्रातिपदिकात् सौ तस्य हल्ङ्यादिना लोपे 'संयोगान्तस्य लोपः' इति सकारलोपे 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति नियमेन षकारभूतस्य सकारस्य निवृत्तौ कत्वस्यासिद्धत्वात् व्रश्चेति षत्वस्य सत्वात् षकारस्य 'झलां जशोऽन्ते' इति जश्त्वेन डकारे तस्य 'वाऽवसाने' इति वैकल्पिकचर्त्वेन टकारे विविट् विविड् इति रूपद्वयं निष्पद्यते ।

नचात्र 'विविक्ष' इति दशायामेव संयोगान्तलोपात्पूर्वं 'स्कोः संयोगाद्योरन्ते च' इति कलोपः कुतो नेति वाच्यम्, तत्कर्त्तव्यतायां 'षढो कः सि' इत्यस्यासिद्धत्वेन ककारस्यैव तत्रा विद्यमानत्वात् ।

तट् (ई० ५०) तक्षति इत्यर्थे तक्ष धातोः 'क्विप् च' इति क्विप्यनुबन्धलोपे प्रातिपदिकत्वात् सौ तस्य 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति लोपे ककारस्य 'स्कोः संयोगाद्योरन्ते च' इति लोपे षकारस्य 'जलां जशोऽन्ते' इति जश्त्वेन डकारे 'वावसाने' इति वैकल्पिकचर्त्वे तट् तडिति रूपद्वयं निष्पन्नम् ।

तक् (ई० ५१, ५२, ५५) णिजन्तात्तक्ष्धातोः क्विप्यनुबन्धलोपे 'णेरनिटि' इति णिलोपे तक्ष्शब्दात् प्रातिपदिकात् सौ तस्य हल्ङ्यादिना लोपे षकारस्य 'संलोगान्तस्य लोपः' इति लोपे जश्त्वे चर्त्वे तक् तगिति रूपद्वयम् । नचात्र संयोगान्तलोपात्पूर्वं 'स्कोः संयोगाद्योरन्ते च' इति कलोपः स्यादिति वाच्यम्, णिलोपस्य स्थानिवद्भावेन तदप्रवृत्तेः ।

न च 'पूर्वत्रासिद्धीये न स्थानिवत्' इति परिभाषया णिलोपस्य स्थानिवद्भावाभावात् कलोपः स्यादेवेति वाच्यम् 'तस्य दोषः संयोगादिलोपलत्वणत्वेषु' इति निषेधात् ।

विद्वान् (ई० ३५) वेत्तीति विग्रहे विदेः 'लटः शतृशानचावप्रथमासमनाधिकरणे' इत्यनेन शतृप्रत्यये तस्य 'विदेः शतुर्वसुः' इति वस्वादेशेऽनुबन्धलोपे विद्वस् शब्दो निष्पद्यते । ततः विद्वस् शब्दात् प्रातिपदिकात् सौ अनुबन्धलोपे 'सुडनपुंसकस्य' इत्यनेन सर्वनामस्थानसंज्ञायां 'उगिदचां सर्वनामस्थानेऽधातोः' इत्यनेन नुमि 'सान्तमहतः संयोगस्य' इति दीर्घे हल्ङ्यादिना सलोपे सकारस्य 'संयोगान्तस्य लोपः' इति लोपे विद्वान् इति सिद्धम् । संयोगान्तलोपस्याऽसिद्धत्वात् नलोपो न भवति ।

सेदुषः (ई० ४३-५२) गत्यर्थकसद्धातोः 'भाषायां सदवसश्रुवः' इति लिटि क्वस्वादेशेऽनुबन्धलोपे द्वित्वेऽभ्यासादिकार्ये 'अत एकहल्मध्येऽनादेशादेर्लिटि' इत्यनेनैत्वेऽभ्यासलोपे च कृते 'वस्वेकाजाद्घसां' इतीटि सेदिवस्शब्दात् प्रातिपदिकात् शसि विभक्तौ 'यचि भम्' इति भसंज्ञायां 'वसोः सम्प्रसारणम्' इति सम्प्रसारणात् पूर्वमेव 'अकृतव्यूहाः पाणिनीयाः' इति परिभाषया निमित्तस्य विनाशोन्मुखत्वात् इटो लोपे ततः सम्प्रसारणे 'सम्प्रसरणाच्च' इति पूर्वरूपे सकारस्य षत्वेऽन्तिमस्य सकारस्य रुत्वे विसर्गे च कृते सेदुष इति सिद्धम् ।

न च 'एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य ग्रहणम्' इति परिभाषया 'वसोः सम्प्रसारणम्' इत्यनेन शतुर्वसोरेव सम्प्रसारणं क्रियते न तु क्वसोः पुनरत्र सम्प्रसारणम् कथमिति वाच्यम्, वसोरुकारानुबन्धस्य सामान्यग्रहणार्थत्वेन तस्यापि ग्रहणात् ।

पुमान् (ई० ३५) पुंस्शब्दात् प्रातिपदिकात् सौ 'पुंसोऽसुङ्' इत्यसुङि अनुबन्धलोपे 'सुडनपुंसकस्य' इत्यनेन सर्वनामस्थानत्वात् 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुम्यनुबन्धलोपे 'सान्तमहतः संयोगस्य' इति दीर्घे 'हल्ङ्याभ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सुलोपे सकारस्य 'संयोगान्तस्य लोपः' इति लोपे सिद्धम् । नलोपस्तु संयोगान्तलोपस्याऽसिद्धत्वात् न भवति ।

न च 'पुंसोऽसुङ्' इति सूत्रेण यदसुङ् क्रियते तत्सर्वस्य स्थाने स्यात् 'अनेकाल् शित्सर्वस्य' इति सूत्रादिति वाच्यम्, 'ङिच्च' इत्यनेन तस्य बाधात् ।

पुंसु (ई० ४४) पुंस्शब्दात् प्रातिपदिकात् सुप्यनुबन्धलोपे 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात् 'संयोगान्तस्य लोपः' इति सकारलोपे 'निमित्तापाये-नैमित्तिकस्याप्यपायः' इति परिभाषया सलोपे कृतेऽनुस्वारस्यापि निवृत्तौ 'मोऽनुस्वारः' इति पुनरनुस्वारे सिद्धम् ।

न चात्र 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति षत्वं स्यादिति वाच्यम्, तत्र नुम्ग्रहणेन नुम्स्थानिकस्यैवाऽनुस्वारस्य ग्रहणात् ।

हे उशनन् (ई० ४६) उशनस्शब्दात् प्रातिपदिकात् सम्बुद्धिविवक्षायां सावनुबन्धलोपे 'अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः' इति वार्तिकेन वैकल्पिकेनाऽनङि उशनन् स् इति जाते सकारस्य 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति लोपे 'नलोपः प्रातिपदिकान्तस्य' इति नित्यलोपं बाधित्वोक्तवार्तिकेनैव वैक-

ल्पिके नलोपे हे उशन ईति, नलोपाभावपक्षे हे उशनन् इति । यत्रानङेव न कृतस्तत्र सकारस्य रुत्वे विसर्गे च कृते हे उशनः इति रूपत्रयं निष्पन्नम् ।

असकौ (ई० ५१) अदस् शब्दात् 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इत्यकचि अदकस् इति तस्मात् प्रातिपदिकात् सौ 'अदस औ सुलोपश्च' इति सूत्रेण 'तन्मध्य-पतितस्तद्ग्रहणेन गृह्यते' इति न्यायेन अदस् शब्देन अदकस् शब्दस्य ग्रहणात् नित्य-मौत्वे प्राप्ते 'औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वञ्च' इति वार्तिकेन तन्निषेधे 'तदोः सः सावनन्त्ययोः' इति दकारस्य सत्वेऽकारस्य 'सादुत्वञ्च' इत्युत्वे अन्त्यसकारस्य 'त्यदादीनामः' इत्यत्वे पररूपत्वे च कृते सोः रुत्वे विसर्गे च कृते-ऽसुकः इति, वा ग्रहणादौत्वप्रतिषेधाभावे सकारस्यौत्वे सुलोपे असकौ इति रूपं सिद्धम्।

सादुत्वस्य प्रतिषेधसन्नियोगशिष्टत्वात् औत्वाभावे न प्रवर्तते ।

अमुम् (ई० ५३) अदस्शब्दात् प्रातिपदिकात् अम्विभक्तौ 'त्यदादीनामः' इत्यत्वे 'अतो गुणे' इति पररूपे च कृते 'अमि पूर्वः' इति पूर्वरूपे 'अदसोऽसेर्दादु दो मः' इति मुत्वे अमुम् इति सिद्धम् ।

अमुना (ई० ५५, ५६) अदस् शब्दात् प्रातिपदिकात् टाविभक्तौ 'त्यदादी-नामः' इति अत्वे 'अतो गुणे' इति पररूपे अद आ इति स्थिते 'अदसोऽसेर्दादु दो मः' इति मुत्वे 'शेषो घ्यसखि' इति घिसंज्ञायां 'आङो नाऽस्त्रियाम्' इति आङः नाभावेऽमुना इति सिद्धम् ।

नचात्र मुत्वस्याऽसिद्धत्वात् कथन्नाभाव इति वाच्यम्, 'नमुने' इति तन्निषेधात् । न च कृतेपि नाभावे दीर्घं प्रति मुत्वस्याऽसिद्धत्वात् 'सुपि च' इत्यनेन दीर्घः कुतो नेति वाच्यम् 'नमुने' इत्यनेन कृते च नाभावे मुत्वस्य नासिद्धत्वमित्यस्य विधानात् ।

अमीषाम् (ई० ३४) अदस्शब्दात् प्रातिपदिकात् आमि 'त्यदादीनामः' इत्यत्वे 'अतो गुणे' इति पररूपे 'सर्वादीनि सर्वनामानि' इति सर्वनामसंज्ञायां 'आमि सर्वनाम्नः सुट्' इति सुट्यनुबन्धलोपे 'बहुवचने झल्येत्' इति अदोत्तरवर्त्तिनः अकारस्यैत्वे 'आदेशप्रत्यययोः' इति षत्वे 'एत ईद्बहुवचने' इति एकारस्य ईत्वे दकारस्य मत्वे अमीषामिति सिद्धम् ।

अदस् शब्दस्य त्रिषु लिङ्गेषु रूपाणि—

पुँल्लिङ्गे

असौ	अमू	अमी

अमुम्	,,	अमून्
अमुना	अमूभ्याम्	अमीभिः
अमुष्मै	,,	अमीभ्यः
अमुष्मात्, द्	,,	,,
अमुष्य	अमुयोः	अमीषाम्
अमुष्मिन्	,,	अमीषु

स्त्रीलिङ्गे

असौ	अमू	अमूः
अमूम्	,,	,,
अमुया	अमूभ्याम्	अमूभिः
अमुष्यै	,,	अमूभ्यः
अमुष्याः	,,	,,
,,	अमुयोः	अमूषाम्
अमुष्याम्	,,	अमूषु

नपुंसकलिङ्गे

अदः	अमू	अमूनि
अदः	अमू	अमूनि

(शेषं पुँल्लिङ्गवत्)

इति हलन्तपुँलिङ्गप्रकरणम् ।

॥ अथ हलन्तस्त्रीलिंगप्रकरणम् ॥

उपानत् (ई० ४७) उपपूर्वात् 'णह्' धातोः क्विपि सर्वापहारिलोपे 'णो नः' इति णकारस्य नकारे 'नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ' इति पूर्वपदस्य दीर्घे उपानह् शब्दात् प्रातिपदिकात् सौ तस्य हल्ङ्यादिना लोपे 'नहो धः' इति हस्य धत्वे 'झलां जशोऽन्ते' इति जश्त्वेन धकारस्य दकारे तस्य 'वाऽवसाने' इति वैकल्पिकचर्त्वेन तकारे द्वे रूपे निष्पन्ने ।

उष्णिक् (ई० ५५) उत्पूर्वात् 'उष्णिह्' प्रीतावित्यस्मात् 'ऋत्विग्दधृक्स्रग्दि-

गुष्णिगञ्चुयुजिक्रुञ्चाञ्च' इति क्विनि तस्य सर्वापहारिलोपे निपातनात् दलोपे पत्वे च कृते उष्णिह्शब्दात् प्रातिपदिकात् सुप्यनुबन्धलोपे आन्तरतम्यात् हकारस्य स्थाने 'क्विन् प्रत्ययस्य कुः' इति कुत्वेन घकारे 'खरि च' इति चर्त्वेन ककारे 'आदेशप्रत्ययोः' इति सुपः सकारस्य षत्वे कषसंयोगेन क्षत्वे उष्णिक्षु इति रूपं सिद्धम् ।

चतसृणाम् (ई० ३१) चतुर् शब्दात् प्रातिपदिकात् आमि 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति चतस्रादेशे 'अचिर ऋतः' इति रेफादेशे प्राप्ते तम्बाधित्वा 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इति वार्तिकनियमात् 'ह्रस्वनद्यापो नुट्' इति नुटचनुबन्धलोपे 'नामि' इति दीर्घे प्राप्ते 'न तिसृचतसृ' इति निषेधे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति वार्तिकेन नकारस्य णकारे चतसृणामिति सिद्धम् ।

चतुर् शब्दस्य त्रिषु लिङ्गेषु रूपाणि (ई० ३२) पुंलिङ्गे—चत्वारः, चतुरः, चतुर्भिः, चतुर्भ्यः, चतुर्भ्यः, चतुर्णाम्, चतुर्षु । हे चत्वारः ।

स्त्रीलिङ्गे—चतस्रः, चतस्रः, चतसृभिः, चतसृभ्यः, चतसृभ्यः, चतसृणाम्, चतसृषु, हे चतस्रः ।

नपुंसके—चत्वारि, चत्वारि, चतुर्भिः चतुर्भ्यः, चतुर्भ्यः, चतुर्णाम्, चतुर्षु । हे चत्वारि ।

इयम्—(ई० ३७) इदम्शब्दात् प्रातिपदिकात् सौ 'त्यदादीनामः' इति अत्वं बाधित्वा 'इदमो मः' इति मत्वे 'यः सौ' इति दकारस्य यत्वे हल्ङ्याबिना सुलोपे सिद्धम् ।

अनया (ई० ५२) इदम्शब्दात् प्रातिपदिकोत् टाविभक्तौ 'त्यदादीनामः' इति अत्वे 'अतो गुणे' इति पररूपे स्त्रीत्वविवक्षायां 'अजाद्यतष्टाप्' इति टापि सवर्णदीर्घे इदा आ इति जाते 'अनाप्यकः' इति इद्भागस्यानादेशे 'आङि चापः' इत्याबन्तस्यैकारे 'एचोऽयवायावः' इति सूत्रेण अयादेशे अनया इति सिद्धम् ।

अस्यै (ई० ४६) इदम्शब्दात् प्रातिपदिकात् ङे विभक्तौ 'त्यदादीनामः' इत्यत्वे 'अतो गुणे' इति पररूपे स्त्रीत्वविवक्षाया टापि सवर्णदीर्घे इदा ए इत्यवस्थायां 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमे आपो ह्रस्वे च कृते 'हलि लोपः' इति इद्भागस्य लोपे वृद्धौ अस्यै इति सिद्धम् ।

अस्याः (ई० ३०) इदम्शब्दात् प्रातिपदिकात् ङसि अनुबन्धलोपे 'त्यदादी-

नामः' इत्यत्वे 'अतो गुणे' इति पररूपे स्त्रीत्वविवक्षायां टाप्यनुबन्धलोपे 'अकः सवर्णे दीर्घः' 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमे आपो ह्रस्वे च कृते 'हलि लोपः' इति इद्भागस्य लोपे सवर्णदीर्घे सकारस्य रुत्वे विसर्गे च कृते सिद्धम् ।

अद्भिः (ई० ४०, ४६, ५३) अप् शब्दात् प्रातिपदिकात् भिसि विभक्तौ 'अपोभि' इत्यनेन तकारान्तादेशे 'झलां जशोऽन्ते' इति जश्त्वेन दकारे सकारस्य रुत्वे विसर्गे च कृते सिद्धम् ।

दिक्षु (ई ४४) दिश् शब्दात् प्रातिपदिकात् सुप्यनुबन्धलोपे 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति षत्वे तस्य 'षढोः कः सि' इति कत्वे 'आदेशप्रत्यययोः' इति सुपः सकारस्य षत्वे कषयोः संयोगेन क्षत्वे दिक्षु इति सिद्धम् ।

दृक् (ई० ४९) दृश् शब्दात् प्रातिपदिकात् सौ तस्य 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति लोपे शकारस्य 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशा षः' इति षत्वे तस्य 'झलां जशोऽन्ते' इति जश्त्वेन डकारे 'त्यदादिषु दृशोऽनालोचने कञ् च' इति सूत्रेण दृशेः क्विन्विधानात् क्विन् प्रत्ययाभावेऽपि 'क्विन् प्रत्ययस्य कुः' इति कुत्वेन डकारस्य गकारे 'वाऽवसाने' इति वैकल्पिकचर्त्वे दृक् दृग् इति रूपद्वयं निष्पन्नम् ।

अमूः (ई० ४७) अदस् शब्दात् प्रातिपदिकात् जसि अनुबन्धलोपे 'त्यदादीनामः' इत्यत्वे 'अतो गुणे' इति पररूपे 'अजाद्यतष्टाप्' इति टाप्यनुबन्धलोपे 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे पुनः 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे 'अदसोऽसेर्दादुदो मः' इति मूत्वे सकारस्य रुत्वे विसर्गे च कृते सिद्धम् ।

अमूभ्याम् (ई० ३०) अदस् शब्दात् प्रातिपदिकाद् भ्याम्विभक्तौ 'त्यदादीनामः' इत्यत्वे 'अतो गुणे' इति पररूपे 'अजाद्यतष्टाप्' इति टाप्यनुबन्धलोपे सवर्णदीर्घे 'अदसोऽसेर्दादुदो मः' इति मूत्वे सिद्धम् ।

अमुष्यै (ई० ४४) अदस् शब्दात् प्रातिपदिकात् ङे विभक्तौ अनुबन्धलोपे 'त्यदादीनामः' इत्यत्वे 'अतो गुणे' इति पररूपे टापि सवर्णदीर्घे 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमे आपो ह्रस्वे च कृते 'वृद्धिरेचि' इति वृद्धौ 'अदसोऽसेर्दादुदो मः' इति मुत्वे 'आदेशप्रत्यययोः' इति षत्वे सिद्धम् ।

इति हलन्तस्त्रीलिङ्गप्रकरणम् ।

●

।। अथ हलन्तनपुंसकलिङ्गप्रकरणम् ।।

विमलदिवी (ई० ३७, ४७, ५२) विमला द्यौः यस्य इति बहुव्रीहौ समासत्वात् सुब्लुकि विमलदिव् शब्दात् प्रातिपदिकात् औङ् तस्य 'नपुंसकाच्च' इति शीभावेऽनुबन्धलोपे विमलदिवीति सिद्धम् ।

ननु यथा 'राजपुरुषः' इत्यत्र पूर्वपदस्यान्तर्वर्तिनीं विभक्तिमाश्रित्य पदसंज्ञायां सत्यां नलोपो भवति, तथैवात्रापि 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति प्रत्ययलक्षणेन दिव्शब्दस्य पदसंज्ञायां सत्यां 'दिव उत्' इति उत्वं स्यादिति चेन्न, 'उत्तरपदत्वे चापदादिविधौ प्रतिषेधः' इति वार्तिकेन प्रत्ययलक्षणनिषेधात् ।

वार्तिकार्थस्तु—उत्तरस्य=उत्तरपदस्य, पदत्वे=पदसंज्ञायां कर्त्तव्यायां प्रत्ययलक्षणन्न भवति ।

अन्तर्वर्त्तिनीमिति (ई० ४४) विमला द्यौः यस्मिन्नहनि इत्यर्थे बहुव्रीहौ समासत्वात् सुब्लुकि विमलदिव्शब्दात् औ 'नपुंसकाच्च' इति श्यादेशेऽनुबन्धलोपे सिद्धम् ।

अत्र राजपुरुषवत् अन्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदत्वात् 'दिव उत्' इति उत्वन्न भवति 'उत्तरपदत्वे चाऽपदादिविधौ प्रतिषेधः' इति निषेधात् ।

अहोभ्याम् (ई० ५६) अहन् शब्दात् प्रातिपदिकाद् भ्यामि विभक्तौ 'अहन्' इति नकारस्य रुत्वे 'हशि च' इति उत्वे गुणे सिद्धम् ।

नच अहः अहोभ्यामित्यादौ रुत्वरुत्वयोरसिद्धत्वान्न लोपः स्यादिति वाच्यम्, 'रूपरात्रिरथन्तरेष्वह्नो रुत्वं वाच्यम्' इति वार्तिकारम्भसामर्थ्यात् अहन्शब्दमावर्त्य नलोपाभावं निपात्य द्वितीयेन रोर्विधानेनादोषात् ।

दीर्घाहा (ई० ४६, ५०) दीर्घानि अह्नानि यस्मिन्नित्यर्थे बहुव्रीहौ समासत्वात् सुब्लुकि सवर्णदीर्घे दीर्घाहन् शब्दात् प्रातिपदिकात् सौ तस्य हल्ङ्यादिना लोपे पुनः 'प्रत्ययलोपे प्रत्ययलक्षणम्' प्रत्ययलक्षणेन 'रोऽसुपि' इत्यत्रासुपि इति निषेधाद्रत्वाभावे 'अहन्' इति नकारस्य रुत्वे तस्यासिद्धत्वान्नान्तत्वात् 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति दीर्घे 'भोभगोअघोअपूर्वस्य योऽशि' इति निदाघशब्दपरतया यत्वे 'हलि सर्वेषाम्' इति यलोपे दीर्घाहा निदाघ इति सिद्धम् ।

न च 'अहन्' इति सूत्रेण केवलमहन्शब्दस्यैव रुत्वविधानेनात्र च दीर्घाहन्

शब्दस्य सत्त्वात्तदप्रवृत्तौ रुत्वन्न स्यादिति वाच्यम्, 'अहन्' इति सूत्रे पदस्याधिकारात् तं प्रति अहन्शब्दस्य विशेषणत्वात् 'येन विधिस्तदन्तस्य' इति तदन्तविधौ अहन् शब्दान्तस्यापि ग्रहणात् ।

न च 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नाऽस्ति' इति परिभाषया तदन्तविधिनिषेधात्कथमत्र तदन्तविधिरिति वाच्यम्, तस्याः प्रत्ययविधिविषयकत्वेनाऽप्रवृत्तेः ।

न च तदन्तविधिस्वीकारे 'दीर्घाहो' इत्यादावपि रुत्वापत्तिः स्यादिति वाच्यम्, उत्तरपदत्वे चाऽपदादिविधौ प्रतिषेधेनादोषात् ।

सृजेः क्विन्विधानादिति (ई० ३९) असृज् शब्दस्य कुत्वं पदान्तविषये भवति। यद्यपीह क्विप् प्रत्ययो न तु क्विन् तथापि कुत्वं भवत्येव, 'क्विन् प्रत्ययस्य कुः' इत्यस्य क्विन् प्रत्ययो यस्माद् दृष्ट इत्यर्थकरणात् । 'ऋत्विग्' इत्यस्य सृजेः क्विनो विधानात्, असृग् इत्यत्र क्विप् प्रत्ययेऽपि कुत्वप्राप्तेः ।

न चैवं विश्वसृडित्यत्रापि कुत्वापत्तिरिति वाच्यम्, 'सृजिदृशोर्झल्यमकिति' इति सूत्रे 'रज्जुसृड्भ्याम्' इति भाष्यप्रयोगात् अव्ययपूर्वपदे कुत्वाभावबोधनेन उक्तप्रयोगे आपत्त्यभावात् ।

ननु षत्वविधायकसूत्रे 'सृजमृजयज' इति विशिष्टग्रहणात् षत्वस्यैव प्राप्तिर्न तु कुत्वस्येति चेदुच्यते, 'व्रश्चभ्रस्ज' इति सूत्रे सृजियज्योः पदान्ते षत्वं विधीयते। षत्वन्तु कुत्वापवादः तेन असृजः क्विप्प्रत्ययान्तस्य षत्वमेवोचितम् । स्रग् इति तु 'ऋत्विगि' त्यादिना निपातनात् कुत्वेन साधु ।

निपातनं नाम—अन्यादृशे प्रयोगे प्राप्तेऽन्यादृशप्रयोगकरणम् । निपातनेन हि अपवादशास्त्राप्रवृत्तिमात्रं बोध्यते । कुत्वन्तु सूत्रेणैव भवति । एवञ्च 'असृग्' इति अस्यतेरौणादिकेन ऋच्प्रत्ययेन साधु ।

असृग्—(ई० ४३, ५१) असृज् शब्दात् प्रातिपदिकात् सौ तस्य 'स्वमोर्नपुंसकात्' इति लोपे जकारस्य 'क्विन् प्रत्ययस्य कुः' इति कुत्वेन गकारे 'वाऽवसाने' इति वैकल्पिकचर्त्वे असृक् असृगिति रूपद्वयं सिद्धम्। कुत्वञ्च 'क्विन् प्रत्ययस्य कुः' इत्यत्र बहुव्रीहिलाभाद् बोध्यम् ।

न चैवं विश्वसृड्भ्यामित्यत्रापि कुत्वं स्यादिति वाच्यम्, 'सृजिदृशोर्झल्यमकिति' इति सूत्रे 'रज्जुसृड्भ्याम्' इति भाष्यप्रयोगात् न भवति ।

न चैवं 'उपयट्काम्यति' 'उपसृट्काम्यति' इति भाष्यप्रयोगासङ्गतिरिति वाच्यम्,

व्रश्चादिसूत्रे सृजियज्योः पदान्ते षत्वं कुत्वापवादः स्रक्ऋत्विक्शब्दयोस्तु निपातनादेव कुत्वम् । असृक्शब्दे तु अस्यतेरौणादिके ऋचि प्रत्यये 'चोः कुः' इति कुत्वेन सिद्धिरिति कल्पनेनाऽदोषात् ।

असानि (ई० ५३) असृज्शब्दात् प्रातिपदिकात् शस्विभक्तौ 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' इति वैकल्पिके असन्नादेशे 'जश्शसोः शिः' इति श्यादेशे 'शि' सर्वनामस्थानसंज्ञायां 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति दीर्घे असानि इति रूपम् । असन्नादेशाभावपक्षे झलन्तत्वात् 'नपुंसकस्य झलचः' इति नुमि 'नश्चाऽपदान्तस्य झलि' इत्यनुस्वारे परसवर्णे च कृते असृञ्जि इति रूपद्वयम् ।

बहूर्जि (ई० ५६) बहूर्ज्शब्दात् प्रातिपदिकात् जसि 'जश्शसोः शिः' इति श्यादेशेऽनुबन्धलोपे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति नुमि प्राप्ते 'बहूर्जि नुम् प्रतिषेधः' इति तन्निषेधे वहूर्जि इति रूपम् । 'अन्त्यात्पूर्वो वा नुम्' इति वार्तिकपक्षे तु पूर्वं नुमि कृते 'नश्चाऽपदान्तस्य झलि' इति अनुस्वारे परसवर्णे च कृते बहूर्ञ्जि इति रूपद्वयम् । न च तत्र नकाराभावात् कथमनुस्वार इति वाच्यम्, श्चुत्वस्याऽसिद्धत्वेन तल्लाभात् ।

बेभिदि (ई० ४४, ४७, ४९, ५२) विदारणार्थकभिद्धातोः 'धातोरेकाचो हलादेः क्रियासंमभिहारे यङ्' इति यङि 'सन्यङोः' इति द्वित्वेऽभ्यासादिकार्ये 'गुणो यङ्लुकोः' इति अभ्यासस्य गुणे 'सनाद्यन्ता धातवः' इति धातुत्वात् बेभिद्य इत्यस्मात् क्विपि तस्य सर्वापहारिलोपे क्विप आर्धधातुकत्वात् 'यस्य हलः' इति यलोपे 'अतो लोपः' इत्यल्लोपे बेभिद् शब्दात् प्रातिपदिकात् जसि 'जश्शसोः शिः' इति श्यादेशेऽनुबन्धलोपे बेभिदि इति सिद्धम् ।

न चात्र 'शि सर्वनामस्थानम्' इति सर्वनामस्थानत्वेन 'नपुंसकस्य झलचः' इति झलन्तलक्षणो नुम् कथन्न भवतीति वाच्यम्, 'अचः परस्मिन् पूर्वविधौ' इति अल्लोपस्य स्थानिवदभावेनाकारबुद्धया नुमोऽप्राप्तेः। न चाल्लोपस्य स्थानिवद्भावेन अजन्तलक्षण एव नुम् स्यादिति वाच्यम्, पूर्वस्य विधौ स्थानिवद्भावविधानेन स्वविधौ स्थानिवद्भावाप्रसक्तेः ।

गवाङ् (ई० ४२) गामञ्चतीति विग्रहे उपपदसमासे सुब्लुकि 'ऋत्विग्दधृक्-

स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च' इति क्विन्प्रत्यये तस्य सर्वापहारिलोपे गो अञ्च् इति स्थिते 'अनिदितां हल उपाधायाः क्ङिति' इति उपधानलोपे प्राप्ते 'नाञ्चेः पूजायाम्' इति निषेधे प्रातिपदिकत्वात् सो 'तस्य स्वमोर्नपुंसकात्' इति लोपे 'अवङ् स्फोटायनस्य' इत्यवङि सवर्णदीर्घे चकारस्य संयोगान्तलोपे नकारस्य 'क्विन् प्रत्ययस्य कुः' इति कुत्वेन ङकारे सिद्धम् । 'सर्वत्र विभाषा गोः' इति प्रकृतिभावपक्षे गोअङ् इति रूपम् । 'एङः पदान्तादति' इति पूर्वरूपपक्षे गोऽङ् इति इत्थं रूपत्रयम् ।

गवाक्षु (ई० ५३) गो-पूर्वात् गत्यर्थकादञ्चधातोः 'ऋत्विग्दधृक्—' इत्यादिना क्विनि तस्य सर्वापहारिलोपे 'अनिदितां हल उपधायाः क्ङिति' इति नलोपे 'अवङ् स्फोटायनस्य' इत्यवङि सवर्णदीर्घे गवाच् शब्दात् प्रातिपदिकात् सुप्यनुबन्धलोपे 'चोः कुः' इति चकारस्य कुत्वेन ककारे तस्य 'झलां जशोऽन्ते' इति जश्त्वेन गकारे पुनः 'खरि च' इति चर्त्वेन ककारे 'आदेशप्रत्यययोः' इति सुपः सकारस्य षत्वे संयोगेन क्षत्वे गवाक्षु सिद्धम् । प्रकृतिभावपक्षे गो अक्षु इति, पूर्वरूपपक्षे च गोऽक्षु इति रूपत्रयं निष्पन्नम् ।

न च ककारस्य 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्' इति वार्तिकेन द्वितीयाक्षरस्य खकारस्य विधानेन गोअख्षु गोऽख्षु गवाख्षु इति रूपत्रयस्य वृद्धिः स्यादिति वाच्यम्; चर्त्वस्याऽसिद्धत्वात् गकारेण तस्य द्वितीयाभावात् ।

पूजायान्तु नलोपाभावे 'ङ्णोः कुक्टुक्शरि' इति कुकि, कुकोऽसिद्धत्वेन जश्त्वाभावे 'चयो द्वितीयाः—' इति वार्तिकेन ककारस्य खकारे कृते गवाङ्खषु, गोअङ्ख्षु, गोऽङ्ख्षु इति रूपत्रयस्य वृद्धिर्भविष्यत्येव ।

गोऽक्षु (ई० ३७, ५३) गामञ्चतीति विग्रहे उपपदसमासे 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च' इति क्विनि तस्य सर्वापहारिलोपे गोअञ्च् इत्यत्र गतौ 'अनिदितां हल उपाधायाः क्ङिति' इति न लोपे कृदन्तत्वात् प्रातिपदिकसंज्ञायां सुप्यनुबन्धलोपे 'अवङ् स्फोटायनस्य' इत्यवङि सवर्णदीर्घे 'चोः कुः' इति चकारस्य कुत्वेन ककारे तस्य जश्त्वेन गकारे पुनः चर्त्वेन ककारे 'आदेशप्रत्यययोः' इति सुपः सकारस्य षत्वे वर्णसम्मेलने गवाक्षु इति, 'सर्वत्र विभाषा गोः' इति प्रकृतिभावपक्षे गो अक्षु इति रूपम्, 'एङः पदान्तादति' इति पूर्वरूपपक्षे गोऽक्षु इति रूपत्रयं निष्पन्नम् ।

न च 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्' इति ककारस्य खकारेण षण्णामाधिक्यं शङ्क्यम्, चर्त्वस्यासिद्धत्वात् ।

कुक्पक्षे तु तस्यासिद्धत्वाज्जश्त्वाभावे द्वितीयादेशात् त्रीणि रूपाणि वर्धन्त एव।

चत्वारि (ई० ३४) चतुर् शब्दात् प्रातिपदिकाज्जसि शसि वा विभक्तौ 'जश्शसोः शिः' इति श्यादेशे 'शि सर्वनामस्थानम्' इति सर्वनामस्थान संज्ञायां 'चतुरनडुहोरामुदात्तः' इत्यामि तस्मिंश्च 'मिदचोऽन्त्यात्परः' इति अन्त्यादचः परे कृतेऽनुबन्धलोपे 'इको यणचि' इति यणि चत्वारि इति सिद्धम् ।

एनत् (ई० ४०) इदम् शब्दात् प्रातिपदिकात् सौ तस्य 'स्वमोर्नपुंसकात्' इति लुकि 'अन्वादेशे नपुंसके एनद्वक्तव्यः' इति वार्तिकेस इदम् शब्दस्य एनदादेशे जश्त्वे चर्त्वे च कृते एनत् एनद् इति रूपद्वयम् ।

गोचा (ई० ३०) गामञ्चतीति विग्रहे उपपदसमासे सुब्लुकि 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिकुञ्चाञ्च' इति क्विनि तस्य सर्वापहारिलोपे गतौ 'अनिदितां हल उपाधायाः क्ङिति' इति नलोपे कृदन्तत्वात् प्रातिपदिकत्वात् टा विभक्तावनुबन्धलोपे 'यचि भम्' इति भत्वेन 'अचः' इति सूत्रेणाकारलोपे 'गोचा' इति रूपम् । पूजायान्तु नलोपाभावात् पूर्वरूपपक्षे 'गोऽञ्चा' इति रूपम्, 'अवङ् स्फोटायनस्य' इत्यवङ् पक्षे सवर्णदीर्घे 'गवाञ्चा' इति रूपम्, 'सर्वत्र विभाषा गोः' इति पक्षे 'गोअञ्चा' इति रूपत्रयं सिद्ध्यति ।

गवाक् शब्दस्य रूपाणि (ई० ३२)

प्रथमायाम् गवाक्, गवाग्, गो अक्, गो अग्, गोऽक्, गोऽग्, गवाङ्, गो अङ्, गोऽङ् इति नव रूपाणि सौ ॥

औ विभक्तौ च गोची, गवाञ्ची, गोअञ्ची, गोऽञ्ची, इति चत्वारि रूपाणि ॥

जसि विभक्तौ च गवाञ्चि, गो अञ्चि, गोऽञ्चि, इति त्रीणि ॥

द्वितीयायाञ्च प्रथमावद्रूपाणि ज्ञातव्यानि ।

तृतीयायाम् गोचा, गवाञ्चा, गोऽञ्चा, गोअञ्चा, इति चत्वारि रूपाणि टाविभक्तौ ।

भ्यामि च, गवाग्भ्याम्, गोअग्भ्याम्, गोऽग्भ्याम्, गवाङ्भ्याम्, गोअङ्भ्याम्, गोऽङ्भ्याम् इति षड् रूपाणि ॥

भिसि च गवाग्भिः, गोअग्भिः, गोऽग्भिः, गवाङ्भिः, गोअङ्भिः, गोऽङ्भिः,

इति षड् रूपाणि ॥

चतुर्थ्याम् गोचे, गवाञ्चे, गोअञ्चे, गोऽञ्चे, इति चत्वारि रूपाणि ङे विभक्तौ ज्ञेयानि ॥

भ्यामि तु गवाग्भ्याम्, गोअग्भ्याम्, गोऽग्भ्याम्, गवाङ्भ्याम्, गोअङ्भ्याम्, गोऽङ्भ्याम् इति षड्रूपाणि ॥

भ्यसि च गवाग्भ्यः, गोअग्भ्यः, गोऽग्भ्यः, गवाङ्भ्यः, गोअङ्भ्यः, गोऽङ्भ्यः, इति षड् रूपाणि ॥

पञ्चम्याम्—गोचः, गवाञ्चः, गोअञ्चः, गोऽञ्चः, इति चत्वारि रूपाणि ङसि विभक्तौ ॥

भ्यामि च गवाग्भ्याम्, गोअग्भ्याम्, गोऽग्भ्याम्, गवाङ्भ्याम्, गोअङ्भ्याम् गोऽङ्भ्याम्, इति षड् रूपाणि बोध्यानि ॥

भ्यसि च गवाग्भ्यः, गोअग्भ्यः, गोऽग्भ्यः, गवाङ्भ्यः, गोअङ्भ्यः, गोऽङ्भ्यः, इति षड् रूपाणि ज्ञातव्यानि ॥

षष्ठ्याम्—गोचः, गवाञ्चः, गोअञ्चः, गोऽञ्चः इति चत्वारि रूपाणि ङस् ।
ओसि च गोचोः, गवाञ्चोः, गोऽञ्चोः, गोअञ्चोः, इति चत्वारि रूपाणि ॥
आमि तु गोचाम्, गवाञ्चाम्, गोअञ्चाम्, गोऽञ्चाम्, इति चत्वारि रूपाणि ॥
सप्तम्याम् गोचि, गवाञ्चि, गोअञ्चि, गोऽञ्चि इति चत्वारि रूपाणि ङौ ॥
ओसि च गोचोः, गवाञ्चोः, गोअञ्चोः, गोऽञ्चोः इति चत्वारि रूपाणि ॥
सुपि तु गवाक्षु, गोअक्षु, गोऽक्षु, गवाङ्षु, गोऽङ्षु, गवाङ्क्षु, गोऽङ्क्षु इति ।
सम्मेलितानि च सर्वाणि नवाधिकशतानि (१०९) ज्ञेयानि । अत एवोक्तम् 'गवाक्....' इति ॥

ददन्ति (ई० ३६) ददत् शब्दात् प्रातिपदिकात् जसि विभक्तौ 'जश्शसोः शिः' इति श्यादेशोऽनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति नुमि प्राप्ते 'उभे अभ्यस्तम्' इति अभ्यस्तत्वात् 'नाऽभ्यस्ताच्छतुः' इति निषेधे 'वा नपुंसकस्य' इति वैकल्पिके नुमि अनुस्वारे परसवर्णे ददन्ति, ददति इति रूपद्वयं सिद्धम् ॥

तुदन्ती (ई० ४३, ५०, ५२) तुदत् शब्दात् प्रातिपदिकात् औ विभक्तौ तस्य

'नपुंसकाच्च' इति श्यादेशेऽनुबन्धलोपे 'आच्छीनद्योर्नुम्' इति नुम्यनुबन्धलोपे नकारस्य 'नश्चापदान्तस्य झलि' इति अनुस्वारे परसवर्णे च कृते तुदन्तीति सिद्धम् । यत्र चोक्तसूत्रेण नुम् न क्रियते तत्र तुदतीति रूपं ज्ञेयम् ॥

पचन्ती (ई० ४४, ४७, ५१, ५३) पचत् शब्दात् प्रातिपदिकात् औ विभक्तौ तस्य 'नपुंसकाच्च' इति श्यादेशेऽनुबन्धलोपे 'शप्श्यनोर्नित्यम्' इति नित्यं नुमि कृतेऽनुबन्धलोपे 'नश्चापदान्तस्य झलि' इति नकारस्याऽनुस्वारे परसवर्णे च कृते पचन्तीति सिद्धम् ॥

धनूंषि (ई० ३९) धनुष् शब्दाज्जसि शसि वा विभक्तौ 'जश्शसोः शिः' इति श्यादेशेऽनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायाम् 'नपुंसकस्य झलचः' इति सूत्रेण 'मिदचोऽन्त्यात्परः' इति सूत्रसहकारान्नुमि अनुबन्धलोपे दीर्घे कर्त्तव्ये षकारस्यासिद्धत्वात् 'सान्तमहतः संयोगस्य' इति दीर्घे नकारस्य 'नश्चापदान्तस्य झलि' इति अनुस्वारे 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति षत्वे धनूंषि इति सिद्धम् ।

स्वाम्पि—(ई० ४४, ४९, ५१, ५२, ५८) शोभना आपो यस्मिन् सरसीति विग्रहे 'अनेकमन्यपदार्थे' इति बहुव्रीहिसमासे समासत्वात् सुब्लुकि यणि स्वप् शब्दात् प्रातिपदिकात् जसि 'जश्शसोःशिः' इति श्यादेशेऽनुबन्धलोपे 'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम्' इति दीर्घे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति नुम्यनुबन्धलोपे 'नश्चाऽपदान्तस्य झलि' इति अनुस्वारे परसवर्णे च कृते स्वाम्पि इति साधु ।

न चात्र परत्वात्, नित्यत्वात्पूर्वं 'नपुंसकस्य झलचः' इति नुमि कृते उपधायामकारस्याभावात् 'अप्तृन्—' इति कथं दीर्घ इति वाच्यम्, शीघ्रोपस्थितिकं प्रतिपदोक्तमिति प्रतिपदोक्तलक्षणेन प्रतिपदोक्तत्वात् पूर्वं प्रवृत्तेः । यदि च 'शेषाद्विभाषा' इति सूत्रोक्तभाष्यात् 'निरवकाशत्वं प्रतिपदोक्तत्वम्' इति गृह्यते तदात्र 'अप्तृन्–' इति सूत्रस्य 'आपः' इत्यत्र सावकाशत्वेन परत्वान्नित्यत्वाच्च नुमि कृतेऽनुस्वारे परसवर्णे च 'स्वम्पि' इत्येव रूपम् । सिद्धान्तिनस्तु—'शीघ्रोपस्थितिकं प्रतिपदोक्तमि'त्येव स्वीकुर्वन्ति ।

प्रतिपदोक्तत्वान्नुम् (ई० ४७) अयम्भावः—शीघ्रोपस्थितिकं प्रतिपदोक्तमिति पक्षे परात्, नित्यादपि नुमः पूर्वं 'अप्तृन्–' इति सूत्रेणोपधादीर्घे कृते पश्चान्नुमि

अनुस्वारे परसवर्णे च कृते स्वाम्पि इति रूपं सिद्ध्यति । निरवकाशत्वं प्रतिपदोक्तत्वम् इति पक्षे 'अप्तृन्–' इति सूत्रस्य 'आपः' इत्यत्र चारितार्थ्येन सावकाशत्वात् प्रतिपदोक्तत्वाभावात् परत्वान्नित्यत्वात्पूर्वं नुमि कृते स्वम्पि इति रूपं सिद्ध्यति । तत्र चोपधायामकाराभावान्न भवति दीर्घ इति बोध्यम् ।

पिपठिषि (ई० ४४, ४६, ५२) पठितुमिच्छति इत्यर्थे सनि द्वित्वेऽभ्यासादिकार्ये 'सन्यतः' इत्यभ्यासस्येत्वे इति च कृते 'आदेशप्रत्यययोः' इति सनः सकारस्य षत्वे 'सनाद्यन्ता धातवः' इति धातुत्वात् 'क्विप् च' इति क्विपि सर्वापहारिलोपे 'अतो लोपः' इत्यलोपे 'पिपठिष्' शब्दात् प्रातिपदिकात् जसि शसि वा विभक्तौ 'जश्शसोः शिः' इति श्यादेशेऽनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञाया 'अचः परस्मिन् पूर्वविधौ' इत्यल्लोपस्य स्थानिवद्भावात् झलन्तलक्षणः 'नपुंसकस्य झलचः' इति सूत्रेण नुम्न भवति । स्वविधौ स्थानिवद्भावाभावाच्च अजन्तलक्षणस्यापि नुमोऽभावात् वर्णसम्मेलने 'पिपठिषि' इति रूपं निष्पन्नम् ।

पयांसि (ई० ३५) पयस् शब्दात् प्रातिपदिकाज्जसि 'जश्शसोः शिः' इति श्यादेशेऽनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायाम् 'नपुंसकस्य झलचः' इति नुम्यनुबन्धलोपे 'सान्तमहतः संयोगस्य' इति दीर्घे नकारस्य 'नश्चाऽपदान्तस्य झलि' इत्यनुस्वारे पयांसि रूपं सिद्धम् ।

सुपुंसी (ई० ५३) शोभनाः पुमांसो यस्मिन्निति विग्रहे बहुव्रीहिसमासे सुब्लुकि सुपुंस्शब्दात् प्रातिपदिकात् औ विभक्तौ 'नपुंसकाच्च' इति श्यादेशेऽनुबन्धलोपे वर्णसम्मेलने सुपुंसी इति **सिद्धम्** ।

सुपुमांसि (ई० ३४) शोभनाः पुमांसो यस्मिन्निति विग्रहे बहुव्रीहिसमासे समासत्वात् सुब्लुकि सुपुंस्शब्दात् प्रातिपदिकाज्जसि 'जश्शसोः शिः' इति श्यादेशेऽनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'पुंसोऽसुङ्' इति सूत्रेण 'णिच्च' इति सूत्रबलात् सकारस्यासुङि अनुबन्धलोपे 'सुपुमस् इ' इति जाते 'नपुंसकस्य झलचः' इति नुम्यनुबन्धलोपे 'सान्तमहतः संयोगस्य' इति दीर्घे 'नश्चाऽपदान्तस्य झलि' इत्यनुस्वारे सम्मेलनेन सिद्ध्यति ।

॥ इति हलन्तनपुंसकलिङ्गप्रकरणम् ॥

— :o: —

॥ अथ अव्ययप्रकरणम् ॥

स्वरादिनिपातमव्ययम् (ई० ३६) स्वर् आदिर्यस्य समुदायस्य स स्वरादिः, स च निपातश्चानयोः समाहारः स्वरादिनिपातम्। अव्ययमिति पृथक् पदमस्ति। 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बद्ध्यते' इति वचनात् अव्ययशब्दस्य प्रत्येकं सम्बन्धात् 'स्वरादयो निपाताश्च अव्ययसंज्ञाः स्युः' इत्यर्थो निःसरति। तथा च 'स्वरादीनामव्ययत्वात् अव्ययादाप्सुपः' इति सुपो लुग् भवति। यदि च स्वरादि-सूत्रस्य स्वर् आदिर्येषां ते स्वरादयः इति विग्रहः क्रियते तदा स्वर् शब्दस्याव्ययसंज्ञा न संपत्स्यते।

ननु चादिष्वेव स्वरादीन् पठित्वा प्रकृतसूत्रं परित्यज्य 'तद्धितश्चासर्वविभक्तिः' इत्यादि सूत्रचतुष्टयमपि 'चादयोऽसत्वे' इत्यस्मादूर्ध्वं कृत्वा अव्ययप्रदेशेषु निपात-शब्देनैव व्यवह्रियतामिति चेन्न, स्वस्ति वाचयति, स्वः पश्यति, स्वः पततीत्यादौ कर्मादिकारकयोगेन सत्त्ववाचकत्वात् तेषां निपातसंज्ञाऽऽपत्तेः। चादीनां ह्यसत्त्व-वाचिनामेव निपातसंज्ञा, न तु सत्त्ववाचिनाम्। स्वरादीनान्तु सत्त्ववाचिनामसत्त्व-वाचिनाञ्च अव्ययसंज्ञेष्यत इति व्यवस्थानापत्तेश्च।

स्वरिति (ई० ४०) स्वरिति स्वर्गे परलोके च। अन्तरिति मध्ये। प्रातरिति प्रत्यूषे। पुनरित्यप्रथमे विशेषे च। सनुतरिति अन्तर्धाने। स्वराद्याः पञ्च रेफान्ताः। तेन स्वर्याति प्रातरत्रेत्यादावुत्वन्न भवति। उत्वविधेः रोः इति समुदायाश्रयणात् सान्तत्वे च स्यादेव दोषः।

स्मारं स्मारम् (ई० ३३) स्मृधातोः 'आभीक्ष्ण्ये णमुल्' इति णमुल्यनुबन्धलोपे णित्वात् 'अचोञ्णिति' इति वृद्धौ रपरत्वे 'नित्यवीप्सयोः' इति द्वित्वे प्रातिपदि-कत्वात् सौ 'कृन्मेजन्तः' इति मान्तत्वेनाव्ययसंज्ञायां 'अव्ययादाप्सुपः' इति सुपो लुकि सिद्धम्, अर्थश्चास्य 'स्मृत्वा स्मृत्वा' इति।

जीवसे (ई० ४२) जीवधातोः 'तुमर्थेसेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन् शध्यैशध्यैन्तवैतवेङ्तवेनः' इति सूत्रेण असेप्रत्यये प्रातिपदिपदिकत्वात्, 'कृन्मेजन्तः' इति अव्ययसंज्ञायां 'अव्ययादाप्सुपः इति सुब्लुकि सिद्धम्।

पिबध्यै (ई० ५३) पाधातोः 'तुमर्थेसेसेनसेअसेन्क्सेकसेनध्यैअध्यैनकध्यै कध्यै-न्शध्यैशध्यैन्तवैतवेङ्तवेनः' इत्यनेन शध्यै प्रत्यये तस्य शित्वात् तिङ् शित्सार्व-धातुकम्' इति सार्वधातुकसंज्ञायां 'पाघ्राध्मास्थाम्ना-' इत्यादिना 'पिबादेशे 'पिबध्यै'

इत्यस्य 'कृन्मेजन्तः' इत्यनेनाव्ययसंज्ञायां 'अव्ययादाप्सुपः' इति सुब्लुकि सिद्धम् ।

उदेतोः (ई० ४४, ५४) उत्पूर्वात् गत्यर्थकेण्धातोः 'भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्' इत्यनेन तोसुन्प्रत्ययेऽनुबन्धलोपे गुणे जाते प्रातिपदिकत्वात् सौ 'क्त्वातोसुन्कसुनः' इत्यनेन तोसुन्प्रत्ययान्तत्वेनाव्ययत्वे 'अव्ययादाप्सुपः' इति तस्य लुकि कृते सकारस्य रुत्वे विसर्गे च कृते सिद्धम् ॥

विसृपः (ई० ४०, ५१) विपूर्वात् सृप् इत्यस्माद्धातोः 'सृपितृदोः कसुन्' इत्यनेन कसुनि अनुबन्धलोपे कसुनः कित्त्वेन 'पुगन्तलघूपधस्य च' इत्यनेन प्राप्तस्य गुणस्य 'क्ङिति च' इत्यनेन निषेधे प्रातिपदिकत्वात् सौ 'क्त्वातोसुन्कसुनः' इति अव्ययसंज्ञायां 'अव्ययादाप्सुपः' इत्यनेन तल्लुकि सकारस्य रुत्वे विसर्गे च कृते विसृपः इति ।

तत्र शालायाम् (ई० ४०) तत्रेत्यस्य 'स्वरादिनिपातमव्ययम्' इत्यनेनाऽव्ययत्वात् 'अव्ययादाप्सुपः' इति सुप आपश्च लुकि कृते तत्रशब्दो निष्पद्यते । तस्य स्त्रीलिङ्गत्वबोधनाय सप्तम्याश्चेदं रूपमिति च बोधनाय शालायामिति शब्दो नियुक्तः । यद्यपि अव्ययानामलिङ्गत्वात् तत्रशब्दादापो लुग्विधानन्नोचितम् तथापि सूत्रे आब् ग्रहणसामर्थ्यात् क्रियते । 'अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावात्' इति वार्तिकेन सूत्रे आब्ग्रहणं शक्यमकर्तुम् ॥

अत्युच्चैसौ (ई० ४३, ४८, ५०) उच्चैरतिक्रान्त इति विग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासे सुब्लुकि समासत्वात् प्रातिपदिकत्वात् औ विभक्तौ वर्णसम्मेलने सिद्धम् । न चात्र 'अव्यायादाप्सुपः' इति सूत्रेण उच्चैश्शब्दात् परस्यौकारस्य लुक् कथन्न भवतीति वाच्यम्, औकारस्य उच्चैश्शब्दपरत्वेऽपि तस्माद्विहितत्वाभावात् 'अव्ययादाप्सुपः' इत्यनेन चाव्ययाद्विहितस्यैव लुग्विधानात् । न चोच्चैश्शब्दस्य स्वरादिगणे पठात् 'येन विधिस्तदन्तस्य' इति तदन्तविधिनाऽत्युच्चैश्शब्दस्यापि ग्रहणात् 'स्वरादिनिपातमव्ययम्' इत्यनेनाव्ययत्वात् लुक् स्यादेवेति वाच्यम्, कृतेऽपि तदन्तविधौ 'गौणमुख्ययोर्मुख्य एव कार्यसम्प्रत्ययः' इति परिभाषया मुख्यस्यैव विधानात् । अत्र च तस्य गौणत्वात् । गौणत्वञ्च इतरपदार्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वम् ॥

अव्ययलक्षणम् (ई० २५) सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

त्रिषु लिङ्गेषु = स्त्रीपुन्नपुंसकलिङ्गेषु, सर्वासु विभक्तिषु च म्न् 'अनिदितां वचनेषु च सर्वेषु = त्रिसंख्याकेषु एकप्रकारं तदव्ययमिति । यथा स्वरादि 'अचः' पिधानम् (ई० ३८) अपिधानम्शब्दात् प्रातिपदिकात् सौ 'अपिधान' मित्यव्ययत्वात् 'अव्ययादाप्सुपः' इति लुकि भागुर्याचार्यमतेऽपेरकारलोपे पिधानमिति अन्येषाञ्च मतेऽल्लोपाभावात् 'अपिधानमि'ति रूपद्वयम् ।। इदं मूले उक्तं—

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपञ्चैव हलन्तानां यथा वाचा निशा दिशा ।।

इत्यव्ययप्रकरणम् ।

अथ स्त्रीप्रत्ययप्रकरणम्

अजाद्युक्तिर्ङीषो ङीपश्च बाधनाय । ननु 'अजाद्यतष्टाप्' इत्यत्र 'उगिद्वर्णग्रहणवर्जम्' इत्यनेन तदन्तलाभात् अकारान्तशब्दवाच्ये स्त्रीत्वे द्योत्ये टाप् स्यादित्यर्थेनैव अजादीनामपि टापः सिद्धौ 'अतष्टाप्' इत्येव सूत्रं कर्तव्यम् 'अजादि' ग्रहणं व्यर्थम् । न च क्रुञ्चा, उष्णिहा, देवविशा इत्यादौ हलन्ते टाप्विधानार्थं तदिति वाच्यम्, 'क्रुञ्चानालभेत' इत्यादिप्रयोगदर्शनेन अकारान्तत्वस्वीकारेणादोषात् इति चेन्न; अजाद्युक्तिर्ङीषो ङीपश्च बाधनाय, तेन अजत्वजातिविशिष्टा स्त्री अजा इत्यत्र 'जातेरस्त्रीविषयादयोपधात्' इति न ङीष् । प्रथमवयोविशिष्टा स्त्री बाला इत्यत्र च 'वयसि प्रथमे' इत्यनेन न ङीप् । अन्यथा परत्वात् टापः बाधेन ङीप् ङीष् च स्यात् ।

खट्वा । खट् धातोः स्वन् प्रत्यये खट्वशब्दः अदन्तः निष्पद्यते । ततः स्त्रीत्वविवक्षायां 'अकः सवर्णे दीर्घः' इति दीर्घे स्वादिकार्ये खट्वा इति सिद्धम् ।

न च अचेतनानां खट्व आदिशब्दानां कथं लिंगव्यवस्था इति चेत् श्रूयताम् ? व्याकरणे लोकप्रसिद्धं स्तनाद्यवयवसंस्थानविशेषात्मकं लिङ्गं न आश्रीयते अन्यथा दारान् इत्यादौ नत्वं न स्यात् तस्य पुंसि विधानात् । तटः, तटी, तटम् इत्यादौ यथायथं लिङ्गत्रितयनिबन्धनकार्याणामसिद्धिप्रसङ्गाच्च । अतः पारिभाषिकमेव लिङ्गत्रितयम् गृह्यते व्याकरणे इति दिक् ।

अजादिभिः स्त्रीत्वस्य विशेषणान्नेह पञ्चाजी (ई० ५२, ५५, ५६,) ननु अजाद्यतष्टाप् इति सूत्रे परश्चेत्यस्याधिकारात् दिग्योगलक्षणपञ्चम्या औचित्येन अजादीनां वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यादिति मूलोक्तार्थो न युक्त इति चेन्न,

अजादीत्यस्य लुप्तषष्ठ्यन्तत्वाङ्गीकारेण मूलोक्तार्थस्य युक्तत्वात् । तस्य पञ्चम्यन्तत्वे तु प्रातिपदिकविशेषणत्वेन 'येन विधिस्तदन्तस्ये' ति तदन्तविधौ अजाद्यन्तात् प्रातिपदिकात् टाप् स्यादित्यर्थः स्यात् । तथा च पञ्चानामजानां समाहारः 'पञ्चाजी' इत्यत्र 'द्विगो' रिति ङीषं बाधित्वा टाप् स्यात् । न च 'समासप्रत्ययविधौ प्रतिषेधः' इत्यनेन तदन्तविधिनिषेधात् नायं दोष इति वाच्यम् 'शूद्रा चामहत्पूर्वा जातिरि'ति वार्तिके 'अमहत्पूर्वग्रहणेन' स्त्रीप्रत्यये तदन्तविधेर्ज्ञापनेन दोषतादवस्थ्यात् । ततश्च 'अजाद्यतः' इति षष्ठ्यन्तमेव न पञ्चम्यन्तम् तेन पञ्चाजी इत्यत्र न टाप् ।

शूद्रशब्दस्य स्त्रियां (ई० ३६) 'शूद्रशब्दस्य स्त्रियां शूद्रा शूद्री इति रूपद्वयं भवति । तत्र शूद्रत्वजातिविशिष्टा स्त्री इत्यर्थे 'शूद्रा चामहत्पूर्वा जातिः' इत्यनेन टाप्, शूद्रस्य स्त्री इत्यर्थे पुंयोगे 'पुंयोगादाख्यायाम्' इत्यनेन ङीप् च सिद्ध्यति ।

शूद्रा चामहत्पूर्वा जातिः । अस्यार्थः—शूद्रशब्दष्टापं न लभते जातिश्चेद्वाच्या महत्पूर्वकः शूद्रशब्दष्टापं न लभते जातिश्चेद्वाच्या । ततश्च शूद्रत्वजातिविशिष्टा स्त्री इति विग्रहे शूद्रशब्दात् टापि सवर्णदीर्घे शूद्रा इति । महाशूद्रशब्दे महत्पूर्वकत्वेन टापोऽप्राप्त्या 'पुंयोगादाख्यायाम्' इति ङीषि महाशूद्री इति सिद्ध्यति । 'आभीरी तु महाशूद्री जातिपुंयोगयोः समा' इति कोषबलात् जातौ पुंयोगेऽपि महाशूद्री इत्येव भवति ।

भवन्ती (ई० ५६)—शत्रन्तात् भवत्-शब्दात् 'उगितश्चे'ति ङीपि 'उगिदचाम्—' इति नुमि विभक्तिकार्ये 'भवन्ती' इति सिद्धम् ।

उखास्रत्—उखापूर्वकस्रंसुधातुरुगित्, तस्मात् क्विपि 'अनिदिताम्' इति नलोपे कृदन्तत्वात्प्रातिपदिकसंज्ञायां सुप्रत्यये हल्ङ्यादिलोपे सकारस्य पदान्तत्वात् 'वसुस्रंसु' इति सूत्रेण दत्वे चर्त्वे च कृते उखास्रदिति सिद्धम् ।

न चात्र उगित्वात् स्त्रीत्वविवक्षायाम् 'उगितश्च' इति ङीबापत्तिरिति वाच्यम् । 'उगिदचां सर्वनामस्थानेऽधातोः' इति सूत्रे अञ्चुधातोरुगित्वेन नुमि सिद्धे अञ्चुग्रहणेन 'सिद्धे सति आरभ्यमाणो विधिर्नियमाय भवति' इति सिद्धान्तात् 'धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेवे'ति नियमात् अञ्चुधातवतिरिक्तधातूनामुगित्कार्याभावज्ञापनेन स्रंसुधातावपि तदप्रवृत्तेरिति दिक् ।

प्राची (ई० ४२) प्रपूर्वाद् अञ्चतेः 'ऋत्विक्—' इत्यादिना क्विन् 'अनिदितां हल उपधायाः क्ङिति' इति नलोपे उगित्वात् 'उगितश्च' इत्यनेन ङीपि 'अचः' इत्यकारलोपे 'चौ' इति दीर्घे स्वादिकार्ये प्राची इति सिद्धम् ।

अतिसुत्वरी (ई० ५३) सुत्वानमिक्रान्तेति विग्रहे क्वनिपि 'वनो र च' इति सूत्रे क्वनिपो ग्रहणेन ङीपि रान्तादेशे च कृते 'यस्येति च' इत्यलोपे विभक्तिकार्ये अतिसुत्वरी इति सिद्धम् ।

वनो र च । 'प्रत्ययग्रहणे यस्मात्स बिहितस्तदादेस्तदन्तस्य ग्रहणम्' इति परिभाषया प्रत्ययान्ततदादिरूपार्थः लभ्यते, ततश्च प्रत्ययान्ततदादिविशेषणं, प्रातिपदिकञ्च विशेष्यमिति 'येन विधिस्तदन्तस्य' इति सूत्रेण पुनस्तदन्तविधौ प्रत्ययान्ततदाद्यन्तरूपं यत्प्रातिपादिकमित्यर्थस्य लाभः सिद्धयति ।

इत्थञ्च 'वनो र च' इति सूत्रस्य वन्नन्तान्तात्प्रातिपदिकात् ङीप्, रश्चान्तादेशः ईत्यर्थो भवति । प्रत्ययान्ततदादि सुत्वनिति तदन्तप्रातिपदिकम् अतिसुत्वन इति । ततश्चोक्तप्रयोगे ङीप् रान्तादेशश्च सिद्धयति ।

अतिधीवरी (ई० ५१)—धीवानमतिक्रान्ता-अतीधीवरी । 'अन्येभ्योऽपि दृश्यते' इति क्वनिप्प्रत्यये 'घुमास्थे' तीत्वे 'वनो र च' इति वन्नन्तात् अतिधीवन् शब्दात् स्त्रियां ङीपि रश्चान्तादेशे 'यस्येति च' इत्यल्लोपे विभक्तिकार्ये 'अतिधीवरी' इति ।

शर्वरी (ई० ५४)—शृधातोः 'अन्येभ्योऽपि दृश्यते' इति वनिपि गुणे रपरत्वे 'वनो र च' इति स्त्रियां ङीपि रश्चान्तादेशे भत्वादल्लोपे विभक्तिकार्ये 'शर्वरी' इति।

अवावा (ई० ४१)—ओण्धातोः वनिपि 'विड्वनो' रित्यात्वे अवादेशे ओण् इति धातोर्हलन्ताद्वनः विहितत्वेन 'वनो न हश इति वक्तव्यम्' इति वार्तिकेन 'वनो र च' इति प्राप्तङीब्रत्वयोः प्रतिषेधात् अवावन् शब्दात् प्रातिपदिकात् सौ उपापादीर्घे सुलोपे नलोपे अवावा इति ततष्टापि दीर्घे अवावा ब्राह्मणी इति सिद्धम् ।

बहुधीवरी (ई० ४८, ५५)—बहवो धीवानः यस्याः इति विग्रहे 'बहुव्रीहौ वा' इति वार्तिकेन ङीपि रश्चान्तादेशे भत्वादलोपे विभक्तिकार्ये बहुधीवरी सिद्धम् । ङीप्-रत्वाभावपक्षे 'डाबुभाभ्याम्—' इति डापि 'बहुधीवा' रमावत् सिद्धयति ।

बहुधीवा (ई० ५५)—'वनो र च' इति ङीप्रत्वाऽभावपक्षे रूपमिदम् । अत्र पक्षे 'डाबुभाभ्यामन्यतरस्याम्' इति बहुधीवन् आ इति स्थिते टिलोपे बहुधीवाश-

ब्दात् सोर्हल्ङ्यादिलोपे 'बहुधीवा' इति । ङीप्रत्ययोः डापश्चाभावे 'अनो बहुव्रीहेः' इति ङीप्निषेधात् राजवद् रूपं बोध्यम् ।

द्विपदी (ई० ४४) द्वौ पादौ यस्याः इति विग्रहे समासे 'संख्यासुपूर्वस्य' इत्यनेन पादशब्दान्तस्याकारस्य लोपे 'पादोऽन्यतरस्याम्' इत्यनेन ङीपि भत्वात् 'पादः पत्' इत्यनेन पदादेशे 'द्विपदी' इति, ङीबभावपक्षे 'द्विपात्' इति च सिद्धम् ।

पञ्च (ई० ५२)—पञ्चन् शब्दात् जसि शसि वा षट्संज्ञायां जश्शसोर्लुकि, नलोपे च कृते 'ष्णान्ता षट्' इति षट्संज्ञां प्रति 'नलोपः सुप्स्वर—' इति नलोपस्यासिद्धत्वात् 'न षटस्वस्रादिभ्यः—' इति निषेधान्न टाप् ।

पञ्च चतस्रः—पञ्चन्शब्दात् प्रथमाबहुवचने जसि, शसि वा 'ष्णान्ताः षट्' इति षट्संज्ञायां 'षड्भ्यो लुक्' इति लुकि 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे पञ्चेति ।

नचात्र कार्यकालपक्षे प्रतिकार्यं संज्ञाप्रवृत्तेः सिद्धान्तितया जसः शसो वा लुगर्थं प्रवृत्तया षट्संज्ञया अन्यकार्यसाधनासम्भवेन नलोपोत्तरं 'पञ्च' इत्यत्र षट्संज्ञाया अप्राप्तया 'न षट्स्वस्रादिभ्यः' इत्यस्याप्रवृत्तेरदन्तत्वाद् 'अजाद्यतष्टाप्' इति टाप् स्यादिति वाच्यम् ? नलोपे कृतेऽपि 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति नियमेन षट्संज्ञादृष्ट्या नलोपस्य असिद्धत्वेन नान्तबुद्धया तत्संज्ञाप्रवृत्तौ 'न षट्' इति निषेधेन टापोऽभावात् । न च 'न षड्' इत्यनेन ङीप एव निषेधः स्यादिति वाच्यम्, 'न षट्स्वस्रादिभ्यः' इत्यनेन हि षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च स्त्रियां यद् यत् प्राप्नोति तस्य सर्वस्याऽपि निषेधः क्रियते इति टापोऽपि निषेधकत्वात् । 'चतसृ + जस्' इत्यत्र ऋदन्तलक्षणङीप् न । स्वस्रादिषु चतसृशब्दस्यापि पाठात् ।

बहुराज्ञी (ई० ३४, ४५, ४९)—बहवः राजानः यस्याः इति विग्रहे बहुराजन्–शब्दात् 'अनो बहुव्रीहेः' इति प्राप्तं ङीब्निषेधं प्रबाध्य 'डाबुभाभ्याम्'—इति डापि प्राप्ते तमपि प्रबाध्य 'अन उपधालोपिनोऽन्यतरस्याम्' इति ङीपि विभक्त्यादिकार्ये 'बहुराज्ञी' इति । ङीबभावपक्षे 'डाबुभाभ्यामन्यतरस्याम्' इत्यनेन डापि विभक्त्यादिकार्ये 'बहुराजा' इति । 'अनो बहुव्रीहेः' इति ङीब्निषेधपक्षे तु 'बहुराजा' इति राजन्–शब्दवद्रूपम् ।

कारिका (ई० ५६, ५७)—कारकशब्दात् 'अजाद्यतष्टाप्' इति टापि सवर्ण-दीर्घे 'प्रत्ययस्थात्–' इति कात्पूर्वस्य रेफादुत्तरस्याकारस्य इत्वे विभक्तिकार्ये 'कारिका' इति सिद्धम् ।

पूर्वस्य किम् (ई० ४२, ४८, ५८)—ननु 'प्रत्ययस्थात्कात्' इति सूत्रे पूर्वस्येत्यस्याभावे 'तस्मादित्युत्तरस्य' इति परिभाषया अव्यवहितपरस्येत्यंशस्योपस्थितौ प्रत्ययस्थककाराव्यवहितपरस्याकारस्येत्त्वं स्यादित्यर्थे कटुकेत्यत्रेत्त्वापत्तिः । न च कटुक आ इति दशायाम् 'अकः सवर्णे दीर्घः' इति दीर्घः शंक्य इति वाच्यम् 'वार्णादाङ्गं बलीयः' इति परिभाषया सूत्रस्यापवादत्वाच्च सवर्णदीर्घाप्रवृत्तेरिति चेन्न, पूर्वग्रहणे तत्सामर्थ्यात्परिभाषायाः पूर्वम् अप्रवृत्तौ पूर्वस्याकारस्येत्स्यादिसूत्रार्थो भवति, ततश्च नास्ति दोषः इति दिक् ।

दाक्षिणात्यिका (ई० ५४)—दक्षिणस्यां दिशि भवः इत्यर्थे 'दक्षिणापश्चात् पुरसस्त्यक्' इति त्यकि कित्त्वादादिवृद्धौ 'दाक्षिणात्य' इत्यस्मात् टापि दीर्घे 'दाक्षिणात्या' इति । तस्मात् दाक्षिणात्याशब्दात् स्वार्थे कः 'केऽणः' इति टापो ह्रस्वे पुनष्टापि 'त्यक्त्यपोश्च' इति इत्त्वे सोर्हल्ङ्यादिलोपे दाक्षिणात्यिका इति सिद्धम् ।

अधित्यका (ई० ५३)—'उपाधिभ्यां त्यकन्नासन्नारूढयोः' इति त्यकन् प्रत्ययान्तात् अधित्यकशब्दात् टापि सोर्हल्ङ्यादिलोपे अधित्यका इति सिद्धम् । 'प्रत्ययस्थात्' इति इत्त्वं तु न 'त्यकनश्च निषेधः' इति निषेधात् ।

आर्यिका (ई० ३३, ४६)—आर्याशब्दात् स्वार्थिके कप्रत्यये 'केऽणः' इत्यनेन यकारादाकारस्य ह्रस्वे स्त्रीत्वाट्टापि दीर्घे आर्यका इत्यस्मात् सौ तस्य हल्ङ्यादिलोपे 'उदीचामातः स्थाने यकपूर्वायाः' इत्यनेन यकारादकारस्य आकारस्थानिकत्वात् पाक्षिके इत्वे आर्यिका इति सिद्धम् । इत्वाऽभावे 'आर्यका' इति ।

शुभंयिका-शुभं यातीति शुभंयाः, 'अन्येभ्योऽपि दृश्यते' इति विच् तस्य सर्वापहारे तस्मात् शुभंयाशब्दात् स्वार्थे कः 'केऽणः' इति ह्रस्वे टापि 'प्रत्ययस्थात्—' इति इत्त्वे सोर्हल्ङ्यादिलोपे शुभंयिका इति सिद्धम् । 'उदीचामातः स्थाने—' इति सूत्रार्थे स्त्रीप्रत्यय इत्यनुक्तौ तु अत्रापि इत्त्वविकल्पापत्तेः ।

एषाद्वा एतयोस्तु । अयम्भावः—'भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि' इति सूत्रे भस्त्राशब्दोऽनुपसर्जनः तत्र 'अभाषितपुंस्काच्च' इत्यनेन इत्वम् । उपसर्जने तु—

'भस्त्रैषा' इत्यनेन इत्वम् । तेन 'अनेषका' इत्यादौ इत्वं न सिद्धयति । तथा हि— 'न सु एतत् सु' इत्यलौकिकविग्रहे 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इति परिभाषया त्यदादित्वात् प्राक् सुपो लुकि ततस्त्यदादिसमासरूपप्रातिपदिकाट्टापि सुब्विशिष्टस्य समासत्वे जाते समासघटकसुप्पर एवायं टाप इतीत्वमत्र न भवति, 'असुपः' इति प्रतिषेधात् ।

इह सूत्रे 'उदीचामातः स्थाने' इत्यस्मादातः स्थाने इत्यनुवर्तते । तच्च स्वशब्दाकारस्य विशेषणम् । द्वयेषयोस्तु सर्वनामत्वेन टेः प्रागकचि कृते ककारात् पूर्वं ह्रस्वाकारस्य विद्यमानत्वेन आतः स्थाने अकारस्याऽसम्भवात् । भस्त्रादीनां सर्वत्रैव आतः स्थानिन एव आकारस्य सम्भवेन व्यभिचाराऽभावात् । स्वशब्दस्तु यत्र आत्मीयरूपार्थस्य वाचकः तत्रैव स्त्रीलिङ्गे वर्तते । एवं सति अनुपसर्जनवाचित्वे अकचि आकारस्थाने आकाराभावेन उदाहरणं न भवति । किन्तु यत्र उपसर्जनवाचित्वं स्यात्, तत्र सर्वनामत्वाभावेन कप्रत्यये कृते उदाहरणं सम्भवति । तथा च स्वस्या निष्क्रान्ता इति विग्रहे उपसर्जनह्रस्वे टापि अज्ञाता निःस्वा 'निःस्विका' 'निःस्वका' इति रूपद्वयं सिद्धम् । आत्मीये स्विकेति नित्यमित्वमिति दिक् ।

भस्त्रैषाजाज्ञेति । अत्र सूत्रे 'आतः स्थाने' इत्यनुवृत्तस्य स्वशब्दस्यैव विशेषणमिति संज्ञोपसर्जनाभ्यामन्यत्र आत्मीयायाम् अकचि आतस्थानिकत्वाऽभावात् 'स्विका परमस्विका' इत्यत्र 'प्रत्ययस्थात्—' इति नित्यमेव इत्वं भवति । संज्ञोपसर्जनयोस्तु टापि अज्ञातेऽर्थे के 'केऽणः' इत्यनेन ह्रस्वे पुनष्टापि स्विका, स्वका, निःस्विका निस्वका, इत्यादौ विकल्पेनाऽनेन इत्वमिति दिक् ।

अद्वके (ई० ४६) नञ्समासनिष्पन्नाद् अकज्विशिष्टाद् अद्वकिशब्दात् त्यदाद्यत्वे पररूपत्वे टापि औङः शीभावे 'आद्गुणः' इति गुणे 'अद्वके' इति । अत्र 'भस्त्रैषा' इति इत्वन्तु न अन्तर्वर्तिनीं विभक्तिमाश्रित्य 'असुपः' इति प्रतिषेधात् ।

निर्भस्त्रिका-निर्भस्त्रका (ई० ५०) भस्त्रायाः निष्क्रान्तेति विग्रहे 'निरादयः—' इति समासे गोस्त्रियोः—' इति ह्रस्वत्वे पुनष्टापि समासत्वात् सौ कप्रत्यये 'केऽणः' इति ह्रस्वे निर्भस्त्रकशब्दात् पुनष्टापि सवर्णदीर्घे 'भस्त्रैषा' इति विकल्पेन इत्वे विभक्तिकार्ये निर्भस्त्रिका निर्भस्त्रका सिद्धम् । अत्र केन व्यवधानात् न सुपः परष्टाबिति ।

अजिका-अजका (ई० ४४) अजाशब्दात् कप्रत्यये 'केऽणः' इति ह्रस्वे पुनष्टापि सवर्णदीर्घे 'भस्त्रैषाजाज्ञाद्वा—' इति विभाषया इत्वे विभक्तिकार्ये अजिका-अजका

इति रूपद्वयं सिद्धम् ।

द्विके-द्वके (ई० ४७) अकज्विशिष्टात् द्वकिशब्दात् स्त्रियामौङि त्यदाद्यत्वे पररूपे टापि औङः शीभावे गुणे 'भस्त्रैषाजाज्ञाद्वा' इति विकल्पेन इत्वे द्विके-द्वके सिद्धम् ।

गङ्गाका, गङ्गिका-गङ्गका (ई० ४१, ४५)—गङ्गाशब्दात् कप्रत्यये 'केऽणः' इति ह्रस्वे स्त्रीत्वविवक्षायां पुनष्टापि 'आदाचार्याणाम्' इत्यात्वे विभक्त्यादिकार्ये 'गङ्गाका' इति । पक्षे 'अभाषितपुंस्काच्च' इति विकल्पेन इत्वे विभक्तिकार्ये 'गङ्गिका' इति इत्वाभावे 'गङ्गका' इति ।

अखट्विका (ई० ५१. ५२ ५५)—'न विद्यते खट्वा यस्याः' इत्यर्थे बहुव्रीहिसमासे 'शेषाद्विभाषा' इत्यस्य विकल्पपक्षे 'गोस्त्रियोः—' इति ह्रस्वे स्त्रीत्वविवक्षायां पुनष्टापि विभक्तिकार्ये 'अखट्वा' इति तस्माद् अज्ञाताऽखट्वा इत्यर्थे कप्रत्यये 'केऽणः' इति ह्रस्वे पुनष्टापि बहुव्रीहेर्भाषितपुंस्कत्वात् ततो विहितस्यातःस्थानिकाकारस्य 'अभाषितपुंस्काच्च' इति विकल्पेन इत्वाप्राप्तेः 'प्रत्ययस्थात्—' इति नित्यमित्वे अखट्विका सिद्धम् ।

'शेषाद्विभाषा' इति कपि तु 'गोस्त्रियोः—' इति ह्रस्वाभावे 'केऽणः' इति प्राप्तह्रस्वस्य 'न कपि' इति निषेधे 'आपोऽन्यतरयाम्' इति वैकल्पिकह्रस्वे 'अभाषितपुंस्काच्च' इत्यनेन इत्वविकल्पे विभक्तिकार्ये 'अखट्विका-अखट्वका' इति । ह्रस्वाऽभावपक्षे 'अखट्वाका' इति च भवति ।

शैषिके कपि तु विकल्प एव (ई० ४४)—अयम्भावः—न सु खट्वासु स्थिते 'शेषाद्विभाषा' इति कपि सुब्लुकि प्रत्ययलक्षणेन भागद्वयस्य सुबन्तत्वात् समाससंज्ञायां 'समासान्ताः' इति शास्त्रबलेन कबन्तस्यैव समासत्वात् उपसर्जनस्त्रीप्रत्ययान्तसमासरूपप्रातिपदिकाभावात् 'गोस्त्रियोः' इति ह्रस्वत्वाभावेन 'केऽणः' इति प्राप्तह्रस्वस्य 'न कपि' इति निषेधे 'आपोऽन्यतरस्याम्' इति ह्रस्वे कपः प्राग्वर्तिखट्वशब्दात्परस्य आपः अभाषितपुंस्काद्विहितत्वेन तत्स्थानिकाकारस्य 'अभाषितपुंस्काच्च' इति वैकल्पिके इत्वे विभक्तिकार्ये 'अखट्विका, अखट्वका' इति । ह्रस्वाभावे तु 'अखट्वाका' इति त्रिविधं रूपमत्र सिद्ध्यति ।

अनुपसर्जनाधिकारः बहुकुरुचरा । ननु स्त्रीप्रत्यये 'समासप्रत्ययविधौ प्रतिषेधः' इत्यनेन प्रातिपदिकविशेष्यकतदन्तविधेर्निषेधात् 'टिड्ढेति सूत्रस्य' 'टिदादिरूपं यद-

दन्तं प्रातिपदिकं ततः स्त्रियां ङीष्' इत्यर्थात् कुरुचरा इत्यस्य टित्त्वेऽपि बहुकुरुचरा इत्यस्य टित्त्वाभावात् ङीपोऽप्राप्त्या तद्वारणाय अनुपसर्जनाधिकारो व्यर्थ इति चेन्न, अनुपसर्जनाधिकारेण स्त्रीप्रत्यये तदन्तविधेर्ज्ञापनेन टिदाद्यन्तं यत्प्रातिपदिकं ततः स्त्रियां ङीप् इत्यर्थेन बहुकुरुचरा इत्यत्र प्राप्तस्य ङीपः वारणाय अनुपसर्जनाधिकारस्यावश्यकत्वात् ।

न च 'श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान्' इति पारिभाषया स्त्रियामित्यस्य श्रुतस्य ठितो विशेषणतया स्त्रियां विद्यमानं यट्टिदादि तदन्तं यददन्तं प्रातिपादिकं ततो ङीप् इत्यर्थात् बहुकुरुचरा इत्यत्र टितः कुरुचरा इत्यस्य स्त्रियां विद्यमानत्वाभावात् ङीपोऽप्राप्त्या पुनरपि अनुपसर्जनाधिकारो व्यर्थ इति वाच्यम् । यावता विनानुपन्नं तावत् सर्वं कल्प्यते इति न्यायेन अनुपसर्जनाधिकारेण स्त्रियामिति तदन्यस्य विशेषणमित्यर्थस्यापि ज्ञापनात् ।

नन्वेवमपि प्राधान्यादनुपसर्जनादिति तदन्तस्य विशेषणं ततश्च टिदन्तस्य बहुकुरुचरा इत्यस्य अनुपसर्जनत्वान् ङीप् वारणासम्भव इति पुनरपि अनुपसर्जनाधिकारो व्यर्थ इति चेन्न, यावता विनेति न्यायेन अनुपसर्जनाधिकारेण अनुपसर्जनादिति गृह्यमाणस्य टिदादेरेव विशेषणमित्यर्थस्य ज्ञापनेन अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप् इत्यर्थात् बहुकुरुचरा इत्यत्र ङीब्वारणार्थम् अनुपसर्जनाधिकारस्यावश्यकत्वात् ।

वक्ष्यमाणा (ई० ४२, ४५ ४७, ४९, ५७) व्रू धातोर्लिटि अनुबन्धलोपे तस्य 'लृटः सद्वा' इति शानजादेशे 'आने मुक्' इति मुकि 'चोः कुः' इति कुत्वे 'आदेशप्रत्यययोः' इति षत्वे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति णत्वे 'अजाद्यतष्टाप्' इति टापि 'अकः सवर्णे दीर्घः' इति दीर्घे वक्ष्यमाणा इति सिद्धम् ।

ननु वक्ष्यमाणा इत्यत्र लृड्वृत्ति टित्त्वत्य उगित्त्वस्य वा स्थानिवत्त्वेन शानच्यतिदेशात् टिड्ढेत्यनेन 'उगितश्च' इत्यनेन वा ङीप् स्यात् । न च 'अनल्विधौ' इति स्थानिवद्भावनिषेधः शङ्क्यः 'नल्यपी' ति सूत्रारम्भेण 'अनुबन्धकार्ये अनल्विधौ इति निषेधो न प्रवर्तते' इति ज्ञापनेन प्रकृते तदप्रवृत्तेः । अन्यथा प्रदाय इत्यत्र क्त्वा वृत्तिकित्त्वस्य ल्यप्यसत्वेन घुमास्थेतीत्वस्याप्राप्त्या 'न ल्यपि' इति सूत्रं व्यर्थं स्यादिति चेन्न; लिङ् वृत्ति ङित्वस्य तिप्यतिदेशेन यदागमपरिभाषया यासुटो ङित्व-

स्य सिद्धतया यासुटो ङित्करणेन 'लाश्रयमनुबन्धकार्यं नादेशानाम्' इति ज्ञापनेन लृङ्वृत्तिटित्त्वस्य उगित्त्वस्य वा शानच्यसत्त्वात् वक्ष्यमाणा इत्यत्र दोषाभावात् । यदि तु 'ङिच्च पिन्न पिच्च ङिन्न' इति भाष्यात् युयादित्यत्र वृद्धिवारणाय यासुटो ङित्करणमित्युच्यते तदा श्नः शानचः शित्वेन 'क्वचिदनुबन्धकार्ये अनल्विधाविति निषेधः प्रवर्तते' इति ज्ञापनात् वक्ष्यमाणा इत्यत्र दोषाभाव इति दिक् ।

पञ्चतयी (ई० ४२) पञ्च अवयवाः यस्याः इति विग्रहे 'संख्याया अवयवे तयप्' इति तयपि 'टिड्ढाणञ्—' इति तयप्प्रत्ययान्तत्वात् ङीपि विभक्तिकार्ये 'पञ्चतयी' इति सिद्धम् ।

इत्वरी (ई० ४३, ५६, ५७)—इण्धातोः 'इण्नशजिसर्तिभ्यः क्वरप्' इति क्वरपि, 'ह्रस्वस्य—'इति तुकि निष्पन्नात् इत्वरशब्दात् 'टिड्ढाणञ्—'इति ङीपि 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'इत्वरी' इति सिद्धम् ।

चौरी (ई० ४८)—चुरा शीलमस्या इति विग्रहे 'छत्रादिभ्यो णः' इति इति इति णप्रत्यये, वृद्धौ आकारलोपे 'ताच्छीलिके णेऽपि' इति वचनात् ङीपि चौरीति सिध्यति । अत्र प्रमाणञ्च 'कार्मस्ताच्छील्ये' इति सूत्रम् । अन्यथा शीलार्थेऽण्-प्रत्यये प्रकृतिभावविधायकस्य 'अन्' इति सूत्रस्याप्रवृतौ 'नस्तद्धिते' इति सूत्रेणैव टिलोपे सिद्धे टिलोपनिपातनार्थं 'कार्मस्ताच्छील्ये' इति सूत्रं व्यर्थमेव स्यादिति दिक् ।

दैव्या (ई० ३९)—'क्वरपोऽयञश्च' इति संहितापाठेन अपत्यग्रहणं कर्तव्यम् इति वार्तिकप्रत्याख्यानस्य फलैक्याय वार्तिके अपत्यपदम्—अपत्याधिकार-स्थपरम् इत्यनुमीयते, तेन 'द्वीपे भवा द्वैप्या' इत्यत्र इव देवस्यापत्ये 'दैव्या' इत्य-त्रापि 'यञश्च' इति ङीप् । 'देवाद्यञञौ' इति हि यञ् प्राग्दीव्यतीयो न त्वपत्या-धिकारपठित इति दिक् ।

गार्ग्यायणी (ई० ४०, ४७) यञन्तात् गार्ग्यशब्दात् 'प्राचां ष्फ तद्धिते' इति ष्फप्रत्यये 'षः प्रत्ययस्य' इति षस्येत्संज्ञालोपयोः कृतयोः 'यस्येति च' इत्यलोपे 'आय-नेयी' ति फस्यायन्नादेशे षित्त्वसामर्थ्यात् ष्फेणोक्तेऽपि स्त्रीत्वे 'उक्तार्थानामप्रयोगः' इति न्यायं बाधित्वा 'षिद्गौरादिभ्यश्च' इति ङीषि णत्वे विभक्त्यादिकार्ये 'गार्ग्या-यणी' इति । पक्षे 'यञश्च' इति ङीपि अकारलोपे 'हलस्तद्धितस्य' इति यलोपे विभक्तिकार्ये 'गार्गी' इति च सिद्ध्यति ।

लोहित्यादिः (ई० ४९) लोहित्यादिः गर्गाद्यन्तर्गणः ।

कात्यायनी (ई० ४५) कातस्यापत्यं स्त्री कात्यायनी । गर्गादियञन्तात् कात्यशब्दात् 'सर्वत्र लोहितादिकतन्तेभ्यः' इति नित्यं ष्फप्रत्यये षस्य इत्संज्ञायां लोपे च कृते फस्यायनि 'यस्येति च' इति यकारादकारस्य लोपे षित्वात् ङीषि विभक्तिकार्ये 'कात्यायनी' इति सिद्धम् ।

आसुरायणी (ई० ४८) आसुरस्यापत्यं स्त्री इति विग्रहे आसुरशब्दात् ष्फप्रत्यये षस्येत्संज्ञायां लोपे च विहिते फस्यायन्नादेशे षित्वात् ङीषि णत्वे विभक्तिकार्ये आसुरायणी । 'प्राचां ष्फ तद्धिते' इति सूत्रे तद्धितग्रहणात् क्वचिदन्यतोऽपि भवतीति ज्ञापनेन 'आसुरेरुपसंख्यानम्' इति सिद्धम् ।

त्रिलोकी (ई० ५०)—त्रयाणां लोकानां समाहारः इति विग्रहे समासनिष्पन्नात् त्रिलोकशब्दात् 'द्विगोः' इत्यनेन ङीपि 'यस्येति च' इत्यलोपे विभक्तिकार्ये 'त्रिलोकी' इति ।

पञ्चाश्वा (ई० ५५)—पञ्चभिः अश्वैः क्रीतेति विग्रहे समासेन निष्पन्नात् पञ्चाश्वशब्दात् 'द्विगोः' इति ङीपि प्राप्ते 'अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि' इति निषेधे टापि 'यस्येति च' इत्यल्लोपे विभक्तिकार्ये पञ्चाश्वा इति सिद्धम् ।

द्विकाण्डी(ई० ४०)द्वे काण्डे प्रमाणमस्याः इति विग्रहे 'तद्धितार्थ' इति समासे 'प्रमाणे द्वयसज्' इति विहितस्य मात्रचः 'प्रमाणे लो·द्विगोर्नित्यम्' इति लुकि 'द्विगोः' इति ङीपि द्विकाण्डी रज्जुरिति । 'काण्डान्तात्क्षेत्रे' इति ङीपो निषेधो न भवति, द्विकाण्डशब्दस्य क्षेत्रवृत्तित्वाऽभावात् (षोडशहस्तप्रमाणो दण्डः काण्डमिति ।)

द्विपुरुषी (ई० ५५)—द्वौ पुरुषौ प्रमाणमस्याः इति विग्रहे 'तद्धितार्थ' इति द्विगुसमासे 'प्रमाणे द्वयसज्—' इति विहितस्य मात्रचः 'प्रमाणे लः, द्विगोर्नित्यम्' इति लुकि 'द्विपुरुष' शब्दात् स्त्रीत्वविवक्षायां 'पुरुषात् प्रमाणेऽन्यतरस्याम्' इति विकल्पेन ङीपि अल्लोपे विभक्तिकार्ये 'द्विपुरुषी' इति । पक्षे टापि द्विपुरुषेति सिद्ध्यति ।

अत्यूध्नी (ई० ४१, ५२)—अतिशयितमूधो यस्याः इति विग्रहे बहुव्रीहिसमासे सुब्लुगादिकार्ये यणि 'ऊधसोऽनङ्' इत्यनङि 'संख्याव्यादेर्ङीप्' इत्यनेन ङीपि भत्वादल्लोपे प्रातिपदिककार्ये 'अत्यूध्नी इति । 'संख्याव्ययादेरित्यत्र बहुव्रीहेरित्यनुवर्तनात् ऊधोऽतिक्रान्तेति विग्रहे 'अत्यादयः' इति समासे तु अबहुव्रीहित्वात्—

'अत्यूधाः' इत्येव स्याद् अतः न तत्पुरुषसमासः ।

भेषजी (ई० ४१)—भिषज इयमित्यर्थेऽणि आदिवृद्धि प्रबाध्य 'केवल' इति सूत्रे 'भेषज' इत्युंपादानादेव निपातनादेकारादेशे 'केवलमामकभागधेयपापापरस-मानार्यकृतसुमङ्गलभेषजाच्च' इति सूत्रेण ङीपि यस्येति चेत्यल्लोपे स्वादिकार्ये 'भेषजी' इति सिद्धम् । संज्ञाच्छन्दसोरिति नियमादन्यत्र 'भेषजा' इति ।

मामका इति (ई० ३७)—मामकशब्दस्य स्त्रीलिङ्गे टापि विभक्तिकार्ये 'मामका' इत्येव भवति । तथा हि—ममेयमित्यर्थे 'तस्येदम्' इत्यणि 'तवकममके'-ति ममकादेशे आदिवृद्धौ अणन्तत्वात् 'टिड्ढाणञ्—' इति ङीपि सिद्धे 'केवल-मामक–' इति सूत्रे मामकग्रहणं व्यर्थं सत् नियमयति—'अणन्तान्मामकशब्दाद्यदि ङीप् स्यात्तर्हि संज्ञाच्छन्दसोरेवे'ति । तेन लोकेऽसंज्ञायां च 'मामके'ति । अन्यत्र मामिका इति च सिद्ध्यति ।

अन्तर्वत् (ई० ३७) अन्तरस्त्यस्यां गर्भ इति विग्रहे अन्तःशब्दस्याधिकरण-शक्तिप्रधानतया अस्तिसामानाधिकरण्याभावात् 'तदस्यास्त्यस्मिन्निति मतुप्' इत्यनेन निपातनात् मतुपि 'अन्तर्वत्पतिवतोर्नुक्' इति नुकि 'मादुपधायाश्च' इति मस्य वत्वे च कृते 'ऋन्नेभ्यो ङीप्' इति ङीपि विभक्तिकार्ये अन्तर्वत्नी सिद्धम् ।

दृढपत्नी (ई० ४९)—'विभाषा सपूर्वस्य' इति सूत्रे उत्तरत्रानुवृत्तयेऽनुवृत्तस्य 'अनुपसर्जनात्' इत्यस्य श्रुतत्वेन सपूर्वस्य पत्यन्तस्येति विशेषणात् दृढा पतिर्यस्येति बहुव्रीहावपि नुकि 'ऋन्नेभ्यो ङीप्' इति ङीपि अलोपे विभक्त्यादिकार्ये दृढपत्नी इति सिद्धम् ।

वृषलपत्नी (ई० ४६)—वृषलस्य पतिः स्त्री इति विग्रहः । वृषलस्य यज्ञे अधिकाराभावेन 'पत्युर्नो यज्ञसंयोगे' इत्यस्याप्रवृत्तौ 'विभाषा सपूर्वस्य' इत्यनेनात्र नुकि 'ऋन्नेभ्यो ङीप्' इति ङीपि 'यस्येति' चेति अल्लोपे विभक्तिकार्ये 'वृषलपत्नी' इति । पक्षे 'वृषलपतिः' इति ।

वृषलस्य पत्नीति व्यस्ते । न च वृषलस्य यज्ञेऽधिकाराभावेन 'पत्युर्नो यज्ञसंयोगे' इति सूत्राप्रवृत्तिः । समासाभावेन विद्यमानपूर्वत्वाभावात् 'विभाषा सपूर्वस्य' इत्य-स्यात्राप्रवृत्तिरिति न शङ्कनीयम् इति वाच्यम्, पत्नीव पत्नीति समाधानात् । यथा—पाणिग्रहीती-भार्यायां यज्ञाधिकारस्तथैव लक्षणया अस्या अपि यज्ञाधिकारः

कल्पनीय इति 'पत्युर्नो यज्ञ' इति सूत्रेण सिद्धिः ।

पूतक्रतायी—(ई० ५३)—पूतः क्रतुः येन स पूतक्रतुः, पूतक्रतोः स्त्रीत्यर्थे 'पूतक्रतोरै च' इति सूत्रेण ङीपि तकारादुकारस्यैकारे तस्य आयादेशे भत्वाद् अलोपे विभक्तिकार्ये पूतक्रतायी इति सिद्धम् ।

अग्नायी (ई० ४२)—अग्निशब्दात् 'वृषाकप्यग्निकुसितकुसिदानामुदात्तः' इति सूत्रेण उदात्तैयादेशे ङीपि च कृते आयादेशे भत्वाद् अलोपे विभक्तिकार्ये अग्नायी सिद्धम् ।

रोहिणी (ई० ३३, ४९)—रक्तवर्णपर्यायात् रोहितशब्दात् 'वर्णादनुदात्तात्तोपधात्तो नः' इत्यनेन ङीपि तकारस्य नत्वे च कृते णत्वे 'यस्येति च' इत्यलोपे प्रातिपदिकात् सौ सुलोपे रोहिणी इति सिद्धम् ।

'श्येण्या च शलल्या' इति गृह्यसूत्रम् । ननु 'वर्णादनुदात्तात्–' इति सूत्रे 'अनुपसर्जनात्' इत्यस्य गृह्यमाणविशेषणत्वमेव युक्तम्, न तु तदन्तविधिलभ्यावर्णान्तविशेषणत्वमिति चेन्न, 'श्येण्या च शलल्या' इति गृह्यसूत्रस्यासङ्गत्यापत्तेः । तथा हि—अनुपसर्जनादित्यस्य गृह्यमाणविशेषणत्वे सति त्रीणि एतानि अस्याः इति बहुव्रीहिनिष्पन्न 'न्येत' शब्दघटकस्य 'एत' शब्दस्य वर्णवाचिनः उपसर्जनत्वात् ङीप्नत्वे न स्याताम् । वर्णान्तविशेषणत्वे तु न्येतशब्दस्य अनुपसर्जनत्वान्न दोष इति दिक् ।

जानपदी (ई० ३४)—जनपदे भवः जानपदः । तस्मात् 'जानपद–' इति सूत्रेण ङीपि भत्वादल्लोपे 'विभक्तिकार्ये जानपदी' इति । जानपदी वृत्तिश्चेद्—जीविका गम्या चेदित्यर्थः ।

न च उत्सादित्वादजन्तत्वेन 'टिड्ढाणज्–' इति ङीपि सत्यपि 'जानपदी'ति सिद्धौ ङीष्विधानं किमर्थमिति वाच्यम्, ङीप्याद्युदात्तत्वम्, ङीपि तु प्रत्ययस्वरेणान्तोदात्तत्वमित्युभयोः स्वरे विशेषात् ।

अनड्वाही (ई० ३९)—अनडुद्शब्दस्य गौरादिगणे पाठात् 'षिद्गौरादिभ्यश्च' इति ङीषि 'आमनडुहः स्त्रियां वा' इति वार्तिकेन आमि, यणादेशे विभक्त्यादिकार्ये 'अनड्वाही' आमभावे 'अनडुही' इति च बोध्यम् । अनडुहः = वृषभस्य स्त्री, अनो वहतीति यौगिको वा-अनड्वाहि-अनडुहीति ।

कुण्डी अमत्रं चेत् । ननु जानपदेति सूत्रे अमत्रग्रहणेन कुण्डशब्दादमत्रे एव

ङीष् नान्यत्रेति नियमेन, 'अमृते जारजः कुण्डः' इति कुण्डशब्दाज्जातिलक्षणो ङीष् कथमिति चेन्न, अमत्रेऽनुगतसंस्थानव्यंग्यरूपजातित्वाभावेनाप्राप्तौ नियमत्वासम्भवात् । स्त्रीविषयत्वादिति मूलस्य जातित्वाभावादित्यर्थ इति दिक् ।

नागी स्थूला चेत् (ई० ४३)—ननु नागशब्दस्य जातिवाचकत्वेन जातेरिति ङीषि सिद्धे जानपदेति सूत्रे नागग्रहणं व्यर्थमिति चेन्न, इयं स्त्री नागी (हस्तिनी) स्थौल्यगुणयोगादित्यत्र नागशब्दस्यैकव्यक्तिवृत्तित्वेन जातिवाचकत्वाभावेन सिद्धेः । न चात्र स्थूलग्रहणं व्यर्थमिति वाच्यम्; इयं स्त्री नागा सर्पिणी दैर्घ्यगुणयोगादित्यत्र दोषापत्तेः ।

गोणी (ई० ५६)—ओप्यते निक्षिप्यते अस्मिन्नित्यर्थे आङ्पूर्वकात् वपेर्ल्युटि 'आवपनम्' इति । तस्मिन्नर्थे गोणशब्दात् 'जानपदे' ति ङीपि भत्वादलोपे विभक्तिकार्ये 'गोणी' इति ।

भाजी (ई० ५७)—'यवागूरुष्णिका श्राणा' इत्यमरः । तस्मिन् श्राणार्थे भाजशब्दात् 'जानपदे' ति ङीषि भत्वादल्लोपे विभक्तिकार्ये 'भाजी' इति ।

नीली (ई० ३८)—अनाच्छादने नीलशब्दस्य 'जानपद' इति सूत्रेण ङीष्विधाने नीला कुण्डी इत्यत्रापि ङीष् स्यादित्यत आह—'नीलादोषधौ' 'प्राणिनि च' नीलादनाच्छादनेऽपि भवन् ङीष् ओषधौ प्राणिनि चैव स्यात् न त्वन्यत्रेति वार्त्तिकार्थः । एवञ्च तत्रैव 'संज्ञायां वा' इत्यपि वार्त्तिकम् तस्य संज्ञायामुक्तविषये तदन्यत्रापि ङीष् वा स्यादित्यर्थः । एवञ्च 'नीली-नीला' इति द्वयमपि साधु ।

उतः किं शुचिः (ई० ५२) ननु 'वोतो गुणवचनात्' इति सूत्रे उतः पदाभावेऽपि गुणवाचिनः प्रातिपदिकाद्वा इत्यर्थेन सकलेष्टसिद्धेः । न च उद्ग्रहणाभावे 'अजाद्यतष्टाप्' इत्यतोऽत इत्यस्यानुवृत्त्यापत्तौ अदन्तात् गुणवाचिनः इत्याद्यर्थोपपत्तौ मृद्वी इत्यस्यासिद्ध्यापत्तिः, शुक्ल इत्यादौ ङीषापत्तिश्चेति वाच्यम् तथासति शोणी इत्यादावननेनैव ङीषि सिद्धे 'शोणात्प्राचाम्' इत्यस्य वैय्यर्थ्यापत्त्या 'खरुसंयोगोपधान्न' इति वार्तिकारम्भेण च 'अतः' इत्यस्याननुवृत्तिज्ञापनाद् इति चेन्न ?

एवं सति मृद्वी इत्यस्य सिद्धावपि शुक्ला इत्यादौ ङीषापत्तेस्तादवस्थ्यात् । न च 'खरुसंयोगोपधान्न' इति वार्तिकेन निषेधात् न शुक्ला इत्यत्र ङीषिति वाच्यम् खरुसाहचर्येण उदन्तसंयोगोपधादेव तेन निषेध इत्यर्थस्यापि स्वीकर्तुं शक्यतया

शुक्ला इत्यस्य असिद्धितादवस्थ्यात् साहचर्यानाश्रयणेन शुक्ला इत्यत्र दोषवारणेऽपि श्वेता इत्यादौ दोषाच्च ।

न च 'शोणात्प्राचाम्' इति सूत्रारम्भेण अदन्तगुणवाचिनो न ङीष् इति कल्पनया श्वेत इत्यादौ दोष इति वाच्यम् । एवमपि शुचिः इत्यत्र ङीषो वारणार्थं उद् ग्रहणस्यावश्यकत्वात् ।

न च शुचिशब्दस्य 'शुचेः किदिन्' इति उणादिनिष्पन्नत्वात् उणादीनामव्युत्पन्नत्वात् वा 'कृदिकारादक्तिनः' इत्यनेन 'सर्वतोक्तिन्नर्थादित्येके' इत्यनेन वा वैकल्पिको ङीष् इष्यत एवेति वाच्यम्, तकारान्तहरित्शब्दात् ङीष् वारणाय उद्ग्रहणस्यावश्यकत्वात् ।

रात्रिः (ई० ४७) औणादिकत्रिप्रत्ययान्तात् 'कृदिकारादक्तिनः' इति बह्वाद्यन्तर्गणसूत्रात् विभाषया ङीषि भत्वादिकारलोपे विभक्तिकार्ये 'रात्री' इति । पक्षे 'रात्रिः' इति भवति ।

पद्धतिः (ई० २५) पादाभ्यां हतिः इति विग्रहे तृतीयासमासे सति 'हिमकाषिहतिषु च' इति सूत्रेण पादशब्दस्य पदादेशे पूर्वसवर्णे च कृते पद्धतिशब्दो निष्पन्नः। तस्मात् क्तिन्नन्तात् 'सर्वतोऽक्तिन्नर्थादित्येके' इत्यनेन ङीषि अप्राप्तौ बह्वादिगणे पद्धतिशब्दो पठ्यते । तेनात्र 'बह्वादिभ्यश्च' इति ङीषि भत्वादिलोपे विभक्तिकार्ये 'पद्धती' इति । पक्षे 'पद्धतिः' इति भवति ।

पुंयोगाविति (ई० ४१)—इह पुमिति लुप्तषष्ठीकं पृथक् पदं, तच्चावर्तते । पुंयोगादिति इतो पञ्चमी । आख्यायामिति तु पञ्चम्यर्थे सप्तमी तथा च या पुमाख्या पुंवाचकः शब्दः पुंयोगात् स्त्रियां वर्तते ततो ङीष् स्यादित्यर्थः ।

गोपालिका (ई० ४५)—गाः पालयतीति गोपालः, गोपाल एव गोपालकः, तस्य स्त्री गोपालिका । अत्र 'पुंयोगादाख्यायाम्' इत्यनेन ङीप्प्राप्ते 'पालकान्ताश्न' इति निषेधे टापि 'प्रत्ययस्थात्–' इति इत्वे भत्वादल्लोपे विभक्तिकार्ये उक्तं सिद्धम् ।

सूरी (ई० ४८) सूर्यशब्दात् स्त्रीत्वविवक्षायां 'षिद्गौरादिभ्यश्च' इति गौरादित्वात् ङीपि 'सूर्यतिष्यागस्त्यमत्स्यानां य उपधाया' इत्यनेन यकारस्य 'यस्येति च' इति अकारस्य च लोपे विभक्त्यादिकार्ये उक्तं रूपं सिद्धम् । इयं सूरी = कुन्ती मानुषी न तु देवता । तेन 'सूर्याद्देवतायामि' त्यनेन चाप् न भवति ।

उपाध्याय (ई० ५६)—अत्र 'या तु स्वयमेवाध्यापिका तत्र वा ङीप् वाच्यः' इति वार्तिकेन ङीषि भत्वादलोपे विभक्तिकार्ये 'उपाध्यायी' इति। पक्षे टापि 'उपाध्याया' इति च भवति। 'उपाध्यायस्य स्त्री' इति विग्रहे तु पुंयोगे ङीपि आनुकि च सति, उपाध्यायानी–उपाध्यायी' इति भवति।

ब्रह्माणी—ननु 'इन्द्रवरुण—' इति सूत्रे 'ब्रह्मन्' शब्दस्याग्रहणात् ब्रह्मणः स्त्री ईत्यर्थे—कथं ब्रह्माणीति चेन्न। ब्रह्माणम् आनयति = जीवयति इति विग्रहे ण्यन्तात् 'अन् प्राणने' इत्यस्माद्धातोः 'कर्मण्यण्' इत्यणि 'णेरनिटि' इति णिलोपे 'आन' शब्देन ब्रह्माणमित्यस्य उपपदसमासे सुब्लुकि नलोपे सवर्णदीर्घे ब्रह्मन् शब्दात् 'टिड्ढाणञ्—'इति ङीपि 'यस्येति च' इत्यकारलोपे 'पूर्वपदात् संज्ञायाम्' इति णत्वे विभक्तिकार्ये उक्तं रूपं सिद्धम्।

वस्त्रक्रीती (ई० ५०)—अत्र 'क्रीतात् करणपूर्वात्' इति सूत्रेण ङीषि भत्वादल्लोपे विभक्तिकार्ये 'वस्त्रक्रीती' इति। ननु 'वस्त्रेण क्रीता' इति विग्रहे समासे सति अदन्तत्वाभावात् कथं ङीप् इति चेन्न, 'वस्त्र टा क्रीत' इति स्थिते 'गतिकारके' ति परिभाषया सुबुत्पत्तेः प्रागेव क्रीतशब्देन समासे सुब्लुकि वस्त्रक्रीतेति प्रातिपदिकस्य अदन्तत्वस्य निर्बाधादिति दिक्।

धनक्रीता—ननु 'वस्त्रकीता' इतिवदत्रापि ङीप् कुतो नेति चेन्न, 'कर्तृकरणे कृता बहुलम्' इति सूत्रे बहुलग्रहणेन 'गतिकारकेति' परिभाषाया अनित्यत्वज्ञापनात् सुबन्तेन समासात् पूर्वमेव धनेन क्रीतमित्यर्थे टापि ततः सुपि समासेऽदन्तत्वाऽभावात् 'क्रीतात्करणपूर्वात्' इत्यस्याप्राप्तेः।

अभ्रलिप्ती (ई० ४२)—अभ्रैरल्पैरीषद्वा आच्छन्नेत्यर्थः। अत्र 'क्तादल्पाख्यायाम्' इति ङीषि भत्वादकारलोपे विभक्तिकार्ये उक्तं रूपं सिद्धम्।

ऊरुभिन्नी (ई० ४३, ४४)—भिन्नौ असंयुक्तौ ऊरू यस्याः सेति विग्रहे 'बहुव्रीहेश्चान्तोदात्तात्' इति सूत्रेण ङीषि भत्वादकारलोपे विभक्तिकार्ये उक्तं रूपं सिद्धम्।

अतिकेशी (ई० ५०, ५४)—केशानतिक्रान्ते विग्रहे समासे सुब्लुकि 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति ङीषि टिलोपे विभक्तिकार्ये 'अतिकेशी' इति सिद्धम्।

स्वाङ्गाच्चोपसर्जनात् (ई० ४२, ५१, ५३,)—इति सूत्रे 'स्वाङ्गपदेन स्वस्य = अवयवीभूतस्य अङ्गं स्वाङ्गम् इति कथने 'सुमुखा शाला' इत्यत्राऽपि ङीप्

स्यात् मुखस्य शालाङ्गत्वात् । किञ्च 'सुकेशी रथ्या' इत्यत्र ङीष् न स्यात्-केशानां प्राप्यङ्गत्वाऽभावात् । अतः अत्र सूत्रे अद्रवमित्यादिना त्रिविधं स्वाङ्गं गृह्यते ।

अद्रवं मूर्तिमत्स्वाङ्गं, प्राणिस्थमविकारजम् ।
अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथा युतम् ॥

(१) **'अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम्'** = न विद्यते द्रवो यस्य तद् **अद्रवम्**, अतः सु = शोभनः, स्वेदः = घर्मजः—उदकप्रस्रवो यस्याः सा 'सुस्वेदा' इत्यत्र ङीष् न । **मूर्तिमत्** = स्पर्शवद् द्रव्यपरिमाणं मूर्तिस्तद्वत् । अत एव 'सुज्ञाना' इत्यत्र ङीष् न । **प्राणिस्थम्** = प्राणनि-प्राणवति जन्तौ विद्यमानम् अतः 'सुमुखा शाला' इत्यत्र ङीष् न । **अविकारजम्** = रोगादिविकाराजन्यम् । अतः सु = अधिकः, शोफः = श्वयथुः, यस्याः सा सुशोफा इत्यत्र ङीष् न ।

(२) **अतत्स्थं तत्र दृष्टं च** । अतत्स्थं = सम्प्रति अप्राणिस्थमपि, च = किन्तु, **तत्र** = प्राणिनि, दृष्टं = दृश्यमानं, यत्तदपि स्वाङ्गमित्यर्थः । अतः 'सुकेशी रथ्या' इत्यत्र ङीष् सिद्धः । रथ्याया = वीथ्यां विकीर्णानां केशानां सम्प्रति अप्राणिस्थत्वेऽपि कदाचित् प्राणिस्थत्वादिति भावः ।

(३) **तेन चेत्तत्तथा युतम्** = येनाङ्गेन प्राणिरूपं वस्तु यथा युतं, तेन सत्सदृशेन अङ्गेन सद् = अप्रणिरूपं वस्तु, तथा प्राणिवत्, युतं = युक्तं चेत् = स्यात्, तदपि प्राणिनि दृष्टं स्वाङ्गमित्यर्थः । अत एव 'सुस्तनी प्रतिमा' इत्यत्र ङीष् सिद्धः ।

तुङ्गनासिकी (ई० ४०, ४६)—अत्र 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति सूत्रेण प्राप्तस्य ङीषः 'न क्रोडादिबह्वचः' इत्यनेन निषेधे प्राप्ते तं प्रबाध्य 'नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाच्च' इत्यनेन ङीष्विकल्पे तुङ्गनासिकी, पक्षे तुङ्गनासिका इति च बोध्यम् ।

नन्वेवं बह्वज्लक्षणस्य निरवकाशत्वापत्तिरिति चेन्न, सुजघनेत्यादौ सावकाशत्वात् । नचैवं 'सहनञ्विद्यमानपूर्वाच्च' इति निषेधस्य सकेशा इत्यादौ सावकाशत्वेन 'सहनासिका' 'सहोदरा' इत्यादावप्यनेन ङीष्विकल्पः स्यादिति वाच्यम् । 'पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान्' इति न्यायेन 'न क्रोडादिबह्वचः' इत्यस्यैव बाधसम्भवात् । तुङ्गः = उन्नतः । एवञ्च तुङ्गा उन्नता नासिका यस्याः सेत्यर्थः ।

उपसर्जनात् किम् सुशिखा । नन्वत्र शिखशब्दात् टापि ततः सुशब्देन समासे

अदन्तत्वाभावान्ङीषोऽप्राप्त्या इदमयुक्तमिति चेन्न, शिखा इत्यत्रान्तरङ्गत्वात् टापि सुशिखा इत्यत्र दोषाभावेन उपसर्जनाद् ग्रहणसामर्थ्येन अतः इत्यनुवृत्तेः स्वाचित्क-त्वबोधनात् टापोऽनन्तरमपि ङीब्वारणाय उपसर्जनादित्यस्यावश्यकत्वात्।

सुजघना (ई० ४५, ५६) सु = शोभनं, जघनं यस्याः इति विग्रहे स्त्रीत्व-विवक्षायां 'स्वाङ्गाच्चोपसर्जनाद्' इति सूत्रेण प्राप्तं ङीषं 'न क्रोडादिबह्वचः' इत्य-नेन बह्वच्कत्वान्निषेधे अदन्तत्वाट्टापि विभक्त्यादिकार्ये सुजघना इति सिद्धम्।

जातेरस्त्री (ई० ४२, ५४)—जातेरस्त्रीविषयात् इति सूत्रे जातिपदेन त्रिधा जातिर्गृह्यते। तद् यथा—

आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक्।
सकृदाख्यातनिर्ग्राह्या, गोत्रं च चरणैः सह॥

भाष्योक्तं त्रिविधं जातिलक्षणं प्रपञ्चयति—आकृतिग्रहणेति। गृह्यते इति ग्रहणम् आकृतिः ग्रहणं यस्या साः 'आकृतिग्रहणा जातिः' अनुगतसंस्थानव्यङ्ग्या इत्यर्थः।

उदाहरणं तु तटी, घटी, इत्यादि। जलसमीपप्रदेशः आकृतिविशेषविशिष्टस्तटः अतस्तटत्वमाकृतिव्यङ्ग्यत्वाज्जातिः, तेन तटशब्दस्य जातिवाचकत्वाद् अनियत-स्त्रीलिङ्गत्वाद् अयोपधात्वाच्च 'जातेरस्त्रीति' ङीष्।

नन्वेवं प्रथमलक्षणस्वीकारे वृषलत्वादीनां जातित्वं न स्यात्, तदवयवसन्निवेशस्य ब्राह्मणादिसाधारण्येन वृषलत्वादीनां तद्व्यंगयत्वादित्याशङ्क्य द्वितीयलक्षणमाह— '**लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या**' इति। असर्वलिंगत्वे सति एकस्यां व्यक्तौ कथनाद् व्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिरित्यर्थः। उदाहरणं 'वृषली' इति। एकस्यां व्यक्तौ वृषलत्वे उपदिष्टे सति तदपत्यसोदरादिषु तदुपदेशं विना तस्य सुग्रहत्वात् सकृदाख्यातनिर्ग्राह्यत्वात् इति 'जातेरस्त्री'ति ङीष्।

नन्वेवमपि औपगवी, कठी इत्यादौ औपगवादेरनुगतसंस्थानव्यंगयत्वाभावात्, सर्वलिंगत्वाच्चेत्युभयविधजातित्वात् ङीष् न स्यादिति शङ्कायां तृतीयं लक्षणमाह— '**गोत्रं च चरणैः सह**' इति अत्र लक्षणे गोत्रशब्देन अपत्यं विवक्षितम्, नतु पौत्र-प्रभृतीनि व्याख्यानात्। चरणशब्दस्तु शाखाध्येतरि प्रसिद्धः तथा च अपत्यप्रत्य-यान्तः चकारात् शाखाध्येतृवाची च शब्दो जातिकार्यं लभत इत्यर्थः। तत्र प्रथमं गोत्रोदाहरणम् 'औपगवी' इति। उपगोरपत्यं स्त्रीति विग्रहे तस्यापत्यमित्यणि

वृद्धौ गुणेऽवादेशे 'जातेरस्त्री' ति ङीष् । द्वितीयं चरणोदाहरणं कठेन प्रोक्तमधीयाना 'कठी' इति ।

कुरूः (ई० ३३)—कुरुक्षेत्रस्य राजा कुरुः तस्यापत्यं स्त्रीत्यर्थः । गोत्रं च 'चरणैः सह' इति जातित्वे 'ऊङुतः' इति कुरुशब्दात् ऊङि सवर्णदीर्घे स्वादिकार्ये।

करभोरुः (ई० ३२)—करभाविव ऊरू यस्या इति विग्रहः । करभोरुशब्दस्य 'आकृतिग्रहणे'ति त्रिविधजातित्वाऽभावात् 'ऊङुतः' इत्यस्याप्राप्त्या 'ऊरूत्तरपदादौपम्ये' इति ऊङि सवर्णदीर्घे स्वादिकार्ये सिद्धिः ।

हयी (ई० ४६)–हयशब्दस्य योपधत्वात् 'जातेरस्त्री'ति ङीषोऽप्राप्तया 'योपधप्रतिषेधे 'हयगवय–'इति वार्तिकबलात् ङीषि भत्वादलोपे विभक्तिकार्ये तत्सिद्धिः ।

वृषली (ई० ३४, ४८, ५०)—वृषलशब्दात् स्त्रीत्वविवक्षायां 'जातेरस्त्रीविषयादयोपधात्' इत्यनेन ङीषि जातित्वं चात्र 'लिङ्गानाञ्च न सर्वभाक्' इति। भत्वादलोपे विभक्त्यादिकार्ये वृषली सिद्धम् ।

औपगवी (ई० ३४, ५५, ५६)—उपगोरपत्यं स्त्रीत्यर्थे अपत्यार्थेऽणि वृद्धौ अवादेशे गोत्रप्रत्ययान्तस्यापि जातित्वस्वीकारत् 'जातेरस्त्रीविषयादयोपधात्' इति ङीषि 'यस्येति च' इत्यलोपे औपगवी इति सिद्धम् ।

मुकयी (ई० ४२)—चतुष्पाज्जातिविशेषस्य संज्ञेयम् । अत्र 'अयोपधात्' इति प्रतिषेधात् ङीष्प्राप्तौ 'योपधप्रतिषेधे हयगवय—' इति वार्तिकेन ङीषि भत्वादलोपे विभक्तिकार्ये मुकयी इति सिद्धम् ।

अलाब्वा (ई० ४८)—अलाबूशब्दात् स्त्रीत्वविवक्षायाम् 'अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानम्' इति वार्तिकेन ऊङि सवर्णदीर्घे अलाबूशब्दात् टाविभक्तौ यणादेशे 'अलाब्वा' इति । (अलाबूशब्दस्य दीर्घान्तत्वेऽपि 'नोङ्धात्वो'रिति विभक्त्युदात्तत्वप्रतिषेध ऊङः फलम्) ।

शफोरूः (ई० ४५)—शफौ = खुरौ, ताविव संश्लिष्टौ ऊरू यस्याः इति विग्रहे निष्पन्नात् शफोरुशब्दात् 'संहितशफलक्षणवामादेश्च' इत्यनेन ऊङि सवर्णदीर्घे विभक्त्यादिकार्ये उक्तं रूपं सिद्धम् ।

सहोरूः (ई० ४९) 'सहितसहाभ्यां चेति वक्तव्यम्' इति वार्तिकेन ऊङि सवर्णदीर्घे गुणे प्रतिपदिककार्ये 'सहोरूः' इति । नच सहशब्दस्य विद्यमानत्वे 'सहोरूः'

इत्यस्य सहशब्दप्रयोगो व्यर्थ इत्यत आह कौमुद्यां सहेते(रतिकालिकमर्दनम्) इति सहौ ऊरू यस्याः सा 'सहोरूः' इति। किञ्च विद्यमानवचनत्वेऽपि सहशब्दस्य न वैयर्थ्यम्। ऊर्वतिशयप्रतिपादनाय प्रयोगात्।

बैदी (ई० ई० ४०)—बिदस्यापत्यं स्त्रीत्यर्थे 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' इत्यञि कृते गोत्रत्वेन जातित्वान्ङीषि प्राप्ते 'शार्ङ्गरवाद्यञो ङीन्' इति सूत्रेण ङीनि अल्लोपादिकार्ये बैदी इति सिद्धम्।

नारी (ई० ४३, ४७, ५८)—नृ–नरशब्दयोरुदाहरणं नारीति। तत्र नृशब्दात् 'नृनरयोर्वृद्धिश्च' इति गणसूत्रेण चकारात् ङीन्विधानेन पूर्वं ङीनि वृद्धौ रपरत्वे च 'नारी' इति। एवं नरशब्दात् पूर्वं ङीनि यस्येति लोपे नकारादकारस्य वृद्धौ नारी।

न च यस्येति लोपात् प्रागलोन्त्यपरिभाषया नरशब्दान्ताकारस्य वृद्धिः कुतो नेति वाच्यम्। 'वार्णादाङ्गं बलीयः' इति परिभाषाबलेन अन्त्यस्याकारस्य यस्येति लोपेनापहारात्। अन्येतु नरस्य-अः नरः, ना च नरश्च तयोः नृनरयोः इति प्रश्लेषसामर्थ्यान्नकाराकारस्यैव वृद्धिः स्यादित्याहुः। न च नृशब्दात् पूर्वोक्तप्रकारेण नारीति सिद्धौ नरग्रहणं व्यर्थमिति वाच्यम्, नरत्वजातिवाचिनो नरशब्दात् स्त्रियां जातिलक्षणङीषि नरीति व्यावृत्त्यर्थं तस्यावश्यकत्वात्। वृद्धिविधानार्थं गणसूत्रमेतदिति बोध्यम्। 'नारी सीमन्तिनी वधूः' इत्यमरः।

कारीषगन्ध्या (ई० ४१, ४३, ४८)—करीषस्य(गवादिपशुपुरीषस्य) गन्ध इव गन्धो यस्य स करिषगन्धिः। करोषगन्धेः गोत्रापत्यं स्त्रीत्यर्थे अणि तस्य 'अणिञोरनार्षयोः' इति ष्यङादेशे 'यस्येति च' इतीकारलोपे 'यङश्चाप्' इति चापि भत्वादकारलोपे विभक्तिकार्ये कारीषगन्ध्या इति सिद्धम्।

बहुयुवा(ई० ४९)-बहवो युवानो यस्यामिति विग्रहे निष्पन्नस्य बहुयुवन्छब्दस्य उपसर्जनत्वेन 'यूनस्तिः' इत्यनेन तिप्रत्ययाभावे 'डाबुभाभ्याम्' इति डापि विभक्त्यादिकार्ये बहुयुवा सिद्धम्। नान्तलक्षणङीप् तु न, 'अनो बहुव्रीहेः' इति निषेधात्।

टिड्ढाणञ्—अत्र सूत्रे प्रातिपदिकस्य टित्वन्तु क्वचित् प्रत्ययकृतं, क्वचिच्च प्रकृतिकृतम्। तत्राद्यस्योदाहरणं 'कुरुचरी' इति। द्वितीयस्योदाहरणं नदट्-नदी। देवट् देवी इति। पचादिषु 'नदट्-देवट्' शब्दयोः पाठात् स्वत एव टित्वमिति ताभ्यां ङीपि 'यस्येति च' इत्यलोपे विभक्तिकार्ये 'नदी' 'देवी' इत्युभयं सिद्धं भवति

घेटष्टित्वात् ङीपि 'स्तनन्धयी' इत्युदाहरणान्तरं मृग्यम् ।

सौपर्णेयी (ई० ३१)—सुपर्ण्या अपत्यं स्त्री इति विग्रहे सुपर्णीशब्दात् 'स्त्रीभ्यो ढक्' इति ढकि ढस्य एयादेशे 'यस्येति च' इति टिलोपे 'किति च' इति वृद्धौ सौपर्णेयशब्दात् 'टिड्ढाणञ्—'इति ङीपि 'यस्येति च' इति टिलोपे विभक्तिकार्ये 'सौपर्णेयी' ।

ऐन्द्री (ई० ३४)—इन्द्रो देवताऽस्येति विग्रहे 'साऽस्य देवता' इत्यणि वृद्धौ 'टिड्ढाणञ्—' इति ङीपि भत्वादलोपे विभक्तिकार्ये 'ऐन्द्री' इति ।

गार्गी (ई० ५५)—गर्गस्याऽपत्यं स्त्रीति विग्रहे 'गर्गादिभ्यो यञ्' इति गर्गशब्दात् यञि आदिवृद्धौ भत्वादलोपे 'गार्ग्य' शब्दात् स्त्रीत्वविवक्षायां 'यञश्च' इति ङीपि भत्वादल्लोपे 'हलस्तद्धितस्य' इति यलोपे विभक्त्यादिकार्ये तत्सिद्धिः ।

कुमारी (ई० ५६)—बाल्यवाचकात् कुमारशब्दात् स्त्रीत्वविवक्षायां 'वयसि प्रथमे' इति ङीपि अनुबन्धलोपे भसंज्ञायां 'यस्येति च' इत्यलोपे प्रातिपदिकत्वात् सौ 'हल्ङ्याब्भ्यः' इति सुलोपे तत्सिद्धिः ।

एनी (ई० ३०)—एतशब्दः श्वेतपर्यायः, तस्मात् स्त्रीत्वविवक्षायां 'वर्णादनुदात्तात्तोपधात्तो नः' इति ङीपि तकारस्य नकारे च कृते भत्वाद् 'यस्येति च' इत्यलोपे विभक्तिकार्ये 'एनी' इति । पक्षे अदन्तत्वाट्टापि 'एता' इत्येव । ङीबभावे नत्वमपि न भवति, ङीपा सन्नियोगशिष्टत्वादिति दिक् ।

इन्द्राणी (ई० ५६)—इन्द्रस्य स्त्रीति विग्रहे पुंयोगलक्षणे ङीषि सिद्धेऽपि 'इन्द्रवरुण—' इत्यादिसूत्रेण ङीप्सन्नियोगेन आनुगागमे च जाते उकारस्योच्चारणार्थत्वेन अदर्शने ककारस्येत्संज्ञायां लोपे कृते सवर्णदीर्घे णत्वे विभक्तिकार्थे तत्सिद्धम् ।

हिमानी—महद्धिममिति विग्रहे हिमशब्दात् 'हिमारण्ययोर्महत्त्वे' इति वार्तिकेन ङीषि आनुगागमे च जाते अनुबन्धलोपे सवर्णदीर्घे विभक्तिकार्ये हिमानी इति सिद्धम् ।

अर्याणी (ई० ३८)—अर्यशब्दात् स्त्रीत्वविवक्षायाम् 'अर्यक्षत्रियाभ्यां वा स्वार्थे' इति वार्तिकेन ङीषि आनुकि च कृते भत्वादल्लोपे णत्वे विभक्तिकार्ये 'अर्याणी' इति । पक्षे टापि 'अर्या' इति । स्वामिनी वैश्या वेत्यर्थः । पुंयोगे तु अर्यस्य स्त्री 'अर्यी' इति भवति ।

द्विबिस्ता (ई० ४४, ५४) द्वौ बिस्तौ पचतीति विग्रहे 'तद्धितार्थे'ति द्विगु-

समासे ठनि 'अध्यर्ध' इति ठनो लुकि 'अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धित-लुकि' इत्यस्य 'द्विगोः' इति ङीषि प्रतिषिद्धे अदन्तत्वात् टापि विभक्त्यादिकार्ये 'द्विबिस्ता' इति ।

कुण्डोध्नी (ई० ४७, ५६, ५७)—कुण्डमिव ऊधो यस्याः इति विग्रहे समासे सुब्लुकि गुणे 'ऊधसोऽनङ्' इत्यनङि 'बहुव्रीहेरूधसो—' इति ङीषि 'अल्लोपोनः' इत्यल्लोपे विभक्तिकार्ये 'कुण्डोध्नी' इति ।

मनायी (ई० ४७, ५२, ५५)—मनोः स्त्री = मनावी, मनायी, मनुः । 'मनो रौ वा' इति सूत्रेण ङीप्सन्नियोगशिष्टेन औकारान्तादेशे आवि विभक्तिकार्ये 'मनावी' इति । ङीप्सन्नियोगशिष्टेनैकारादेशे आयादेशे विभक्तिकार्ये 'मनायी' इति । पक्षे तु 'मनुः' इति भवति ।

मातुली (ई० ३६)—मातुलस्य स्त्रीति विग्रहे 'मातुलोपाध्याययोरानुग्वा' इति वार्तिकेन विकल्पेन आनुकि ङीषि च कृते 'मातुलानी' इति सिद्ध्यति । अत्र आनुगभावपक्षेऽपि ङीष् भवत्येवेति । तेन 'मातुली' इति च सिद्ध्यति ।

कबरपुच्छी (ई० ३४)—कबर इव पुच्छं यस्याः सा 'कबरपुच्छी' । 'कबर-मणिविषशरेभ्यो नित्यम्' इति वार्तिकेन नित्यं ङीष् ।

शूर्पणखा (ई० ५१)—शूर्पाणीव नखाः यस्या इति अस्वपदविग्रहः । संज्ञा-त्वेन नित्यसमासत्वात् 'नखमुखात् संज्ञायाम्' इति ङीष्निषेधे 'पूर्वपदात् संज्ञाया-मगः' इति णत्वे स्वाद्युत्पत्तिः । यदा तु शूर्पन्नखानि यस्या इति योगमात्रं विवक्ष्यते न तु संज्ञा, तदा असंज्ञात्वात् न ङीन्निषेधो न वा णत्वं भवति ।

श्वश्रूः (ई० ४५, ४६)—श्वशुरस्य स्त्रीति विग्रहे पुंयोगलक्षणे ङीषि तं प्रबाध्य 'श्वशुरस्योकाराकारयोर्लोपश्च' इति वार्तिकेन ऊङि तत्सन्नियोगेन रेफाद-कारस्य शकारादुकारस्य च लोपे विभक्तिकार्ये 'श्वश्रूः' इति सिद्धम् ।

शार्ङ्गरवी (ई० ४०)—शृङ्गरुशब्दादपत्येऽणि आदिवृद्धौ 'ओर्गुणः' इति गुणेवादेशे 'शार्ङ्गरव' इत्यस्मात् जातित्वान्ङीषि प्राप्ते तम्प्रबाध्य 'शार्ङ्गरवाद्यञो ङीन्' इति ङीन् भत्वादलोपे विभक्तिकार्ये तत्सिद्धिः ।

नारी (ई० ४०, ५८)—नृशब्दात् 'ऋन्नेभ्यो ङीप्' इति ङीपि प्राप्ते तं प्रबाध्य 'नृनरयोर्वृद्धिश्च' इति ङीनि वृद्धौ कृते च रपरत्वे विभक्तिकार्ये 'नारी'

इति । नरशब्दादपि जातिलक्षणे ङीषि प्राप्ते तम्बाधित्वाऽनेन ङीनि भत्वादलोपे विभक्तिकार्ये 'नारी' इति भवति ।

तद्धिताः । ननु तद्धिताधिकारः स्त्रियामित्यनन्तरमेवास्तु तथा सति 'प्राचां ष्फ तद्धितः' इति सूत्रे तद्धितग्रहणं, यस्येति चेति सूत्रे इति ग्रहणं, औङः श्याम् इति वार्तिकं नस्तद्धिते इत्येव टिलोपसिद्धौ डापि डित्करणञ्च मास्तु इति महल्लाघवम् । न चैवं ङीब्ङीषोर्ङस्येत्वानापत्तिरिति वाच्यम्, चुटुङः इति न्यासेनैव ङस्येत्वसिद्धेः । नचेदानीं तद्धितान्तत्वेन प्रातिपदिकत्वात् फिट्स्वरापत्तिरिति वाच्यम् । पकारषकाराद्यनेकानुबन्धकरणेन स्त्रीप्रत्यये तदप्राप्तिकल्पनेनादोषात् । अन्यथा लिङ्गविशिष्टपरिभाषया फिट्स्वरो दुर्वारः स्यात् ईति ।

पट्वी इत्यत्र 'ओर्गुणः' इति गुणापत्तेः, कुरूः इत्यत्र ओर्गुणापत्तेः, शुनी इत्यत्र अतद्धित इति निषेधेन सम्प्रसारणानापत्तिः, दण्डिनी इत्यत्र 'नस्तद्धिते' इति टिलोपापत्तिश्चेति यथास्थानं तद्धिताधिकारः आवश्यक इति दिक् ।

युवतिः (ई० ४५, ४९, ५१)—युवन्शब्दात् स्त्रीत्वविवक्षायां 'यूनस्तिः' इति तिप्रत्यये 'स्वादिष्वि'ति पदत्वान्नलोपे विभक्तिकार्ये 'युवतिः' इति । दीर्घेकरान्तोऽपि स्त्रियां वर्तते । तत्तु युधातोर्लटः शतरि शपो लुकि उवङि उगित्त्वात् ङीपि 'युवती' इति । (यौति = पत्या सह आत्मानं मिश्रीकरोतीत्यर्थः) ।

इति स्त्रीप्रत्ययप्रकरणम् ।

परिशिष्टम्

प्रश्नपत्राणि

स्त्रीप्रत्ययान्तभागे प्रश्नाः

१९४६

१ सुप्तिङन्तं पदम्, स्वादिष्वसर्वनामस्थाने—इत्यनयोः कोऽर्थः, उदाहरणानि च कानि ? इको गुणवृद्धी, यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः—अनयोः किं प्रयोजनम् ? आन्तर्यभेदाः के, तेषां कानि चोदाहरणानि ? १०

२ इन्द्रः, प्रोढवान् । सोमो गौरी अधिश्रितः । चतुर्मुखः । प्राङ्ख्षष्ठः । सञ्च्छम्भुः । शिवोऽर्च्यः । देवाः सन्ति । एष्वष्टसु पञ्चैव समाधेयाः । १०

३ रामाः । निर्जरसा । उडुलोमान् । बहुश्रेयसि । कीः । शुद्धधियो । मर्त्ये । नसा । प्रियक्रोष्टुने । एषु नवसु पञ्चैव समाधेयाः । १०

४ प्रियचतुराम् । मत् । प्रियाष्टनः । अत्यावया । तक् । अस्यै । दीर्घाहो निदाघः । पिपठिषि । एष्वष्टसु केचन पञ्चैव समाधेयाः । १०

५ पचन्ती । बहुधीवा । आर्यका । अद्वके । वृषलपत्नी । सुस्तना । तुङ्गनासिका । सुजघना । श्वश्रूः । एषु नवसु पञ्चैव समाधेयाः ।

१९४७

१ घिटिवृद्धिसम्बुद्धिभापृक्तोपधाविभक्तिसर्वनामस्थानप्रगृह्यसंज्ञासु का का संज्ञा प्रकृतिभागस्य, का का च प्रत्ययमात्रस्य, का चोभयोः का चान्यस्येति संज्ञासूत्रलेखनमन्तरेण सम्यग्विलिख्यताम् । ८

२ लण्सूत्रेऽकारश्च । टोः किं सर्पिष्टमम् । विधिरिति किं स्त्री इयती । प्रथमहल् किं राजेति । चतुर्षु मध्ये एकस्यैव सम्यगाशयमुपवर्ण्य, नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन, वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेनेति द्वयोर्मध्य एकस्यैव वार्तिकस्यार्थं विलिख्योदाहरणानि लेख्यानि । १०

३ सुध्युपास्यः । मा भवान् प्रेदिधत् । उपाच्छंति । अमुकेऽत्र । किमु उक्तम् । संस्कर्ता । कौतस्कुतः । मातुः कृपा । परमसर्पिःकुण्डिका । एषु नवसु चत्वारः समाधेयाः । ८

४ रामाणाम् । वर्णाश्रमेतराणाम् । दतः । यूषभ्यः । सखीः । प्रियतिसा । हे कतरत् ! प्ररीणाम् एष्वष्टसु चत्वारः समाधेयाः ! ८

५ गर्धप् । मघवान् । अतित्वाभिः । उदीचः । अमू । बेभिदि—कुलानि । स्वाम्पि । तत्र शालायाम् । एष्वष्टसु चत्वारः समाधेयाः । ८

६ द्विके । वक्ष्यमाणा । गार्ग्यायणी । कुण्डोघ्नी । मनायी । रात्री । कठी । नारी । एष्वष्टसु चत्वारः समाधेयाः । ८

१९४८

१ एदैतोरोदौतोश्च मिथः सावर्ण्याभावे नाज्झलावित्यत्र दीर्घाकारप्रश्लेषे च प्रमाणं फलञ्च विशदं विवेचयत । १०

२ माहात्म्यम् । प्रोढवान् । उपेडकीयति । पार्श्वम् । चतुर्मुखः । पुंस्पुत्रः । सर्पिष्काम्यति । भो अच्युत । धूर्पतिः । एषु नवसु पञ्च साधनीयाः । १०

३ सम्बुद्धयाक्षिप्तस्यैङ्ह्रस्वाभ्यां विशेषणान्नेह हे कतरत्कुलेति । पूर्वस्य किम् परस्य माभूत् कटुका । द्वयोः फक्किकयोरेकस्या एव सम्यगाशय-मुपवर्ण्य यूष्णः । अतिसखिः । निजग्म्याम् । अजरसम् । विश्वौहः । अनड्-वान् । अतित्वाकम्-एषु चत्वारः प्रयोगाः सूत्रनिर्देशपुरःसरं साध्यन्ताम् । १०

४ अमुमुईयः । तक् । अच्युच्चैसौ । बहुधीवरी । चौरी । आसुरायणी । सूरी । वृषली । अलाब्वा । कारीषगन्ध्या—एषु दशसु पञ्चानां साधुत्वं कुरु । १०

१९४९

१ 'लण्' सूत्रेऽकारस्येत्संज्ञकत्वे, हकारादिष्वकारस्योच्चारणार्थत्वे, प्रत्याहा-रेष्वितामग्रहणे च फलं प्रदर्श्य सुद्ध्युपास्यः । अवेहि । वाप्यश्वः । उत्था-नम् । संस्कर्ता । पुंस्यानम् । चतुष्कपालः । मनोरथः । अजर्घाः । एषु नवसु पञ्चार्थनिर्देशपुरःसरं साधनीयाः । १०

२ उभये । निर्जरसे । कुमार्यौ । मत्याम् । श्रीणाम् । ज्ञानानि । अतिदध्ना ।

नारीणाम् । एषु चतुरः प्रयोगान् संसाध्य अप्तृन्तृजिति सूत्रे तृन्तृचोर्भेदेन उपादाने, नप्त्रादिग्रहणस्य नियमार्थत्वे च फलप्रमाणे विवेचयत । १०

३ अदसोऽसेर्दादुदो मः, नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन, वृद्धयौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन—एषु द्वयोरेव पदच्छेदार्थनिर्देशपुरःसरमुदाहरणानि लिखित्वा गर्धप्-चतुर्णाम् । वृत्रघ्नः । अतिवयम् । दृक् । बेभिदि । स्वाम्पि । विमलदिवी एषु चत्वारः साध्यन्ताम् । १०

४ बहुराज्ञी । वक्ष्यमाणा । रोहिणी । दृढपत्नी । सुज्ञाना । शफोरूः । बहुयुवा । युवतिः—एषु चतुरः प्रयोगान् संसाध्य लोहितादिगणं निर्दिशत । १०

१९५०

१ देव्युवाचेत्यत्रेकोऽसवर्णे शाकल्यस्येति ह्रस्वो भवेन्नवेति निरूप्य गव्यूतिः, प्राच्छर्ति, स्थूलोतुः, तच्छिवः, वासः क्षौमम्, रामस्थाता, मातुःकृपा, शिवोऽर्च्यः, स उ एकाग्निः, एषु चत्वारोऽर्थनिर्देशपुरःसरं लिख्यन्ताम् । १०

२ "अर्थग्रहणं किम्' वृत्तावर्थान्तरोपसंक्रान्ते माभूत् अथवा मपर्यन्तस्य किम् साकच्कस्य माभूदिति द्वयोरेकस्याशयः सम्यग्रूपेण वर्णनीयः । ६

३ विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये, अत्वसन्तस्य चाधातोरिति अनयोः पदच्छेदार्थोदाहरणनिर्देशपुरःसरं चकारोपादानफलं प्रदर्श्य दतः, निच्छु, वारिणे, तुराषाट्, प्रतिदीव्नः, गोरक्, दीर्घाहो निदाघः, चेच्छिदि, अत्युच्चैसौ एषु नवसु चतुरः साधयत। अथवा स्त्रियमतिक्रान्तेति विग्रहे रूपाणि लिखित्वा मघवन्, अदस्—युष्मद्, एषां शब्दानां रूपाणि संसाध्य दादेर्धातोर्घ इतिसूत्रे उपदेश इत्यर्थलाभप्रकारं तत्फलञ्च स्फुटमुपपादयत । १०

४ निर्भस्त्रिका, त्रिलोकी, मनायी, वस्त्रक्रीती, अतिकेशी, अलाब्वा, कठीएषु चतुरः संसाध्य वाक्येषु प्रयुज्यन्ताम् । ८

१९५१

१ 'लण्सूत्रेऽकारश्च' 'एदैतोरोदौतोश्च न मिथः सावर्ण्यम्' अनयोर्वाक्ययोरेकतरस्याशयं फलप्रमाणप्रदर्शनपूर्वकं विलिख्य 'स्वं रूपं शब्दस्याशब्दसंज्ञा'

'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' 'अकृतव्यूहाः पाणिनीयाः' एषु कयोश्चिद् द्वयोः प्रयोजनं लिखत । ८

२ 'हरी एतौ' इत्यत्र ह्रस्वसमुच्चितप्रकृतिभावाभावे, 'सोऽहमाजन्मशुद्धानाम्' इत्यत्र सुलोपाभावे वा कारणं प्रदर्श्य गव्यूतिः, उपेडकीयति, पटत्पटेति, पुंख्यानम्, चेच्छिद्यते, चतुष्कपालः, अहोरात्रः—एषु केचन चत्वारोऽर्थनिर्देशपुरःसरं साधनीयाः । १०

३ 'यस्मात्प्रत्ययविधिः' इति सूत्रे तदादिग्रहणस्य फलमभिधाय, वर्णाश्रमेतरकाः, यूष्णः, सुसखिना, प्ररीणाम्, युक्, अतित्वाकम्—एषु चतुरः साधयत । अथवा—प्रियास्त्रयस्त्रीणि वा यस्या इति विग्रहे तिस्रादेशो भवति न वेति सकारणं विविच्य, दुर्धियः, सखीयतीति सखा, अतिस्त्रये, अमुमुईचः, तक्, असुकः एषु कांश्चिच्चतुरः साधयत । १२

४ असृक्, स्वाम्पि, विसृपः, अतिधीवरी, अखटविका, अन्तर्वत्नी, जानपदी, युवती एषु चतुरः संसाध्य 'स्वाङ्गाच्चे'ति सूत्रस्थं स्वाङ्गलक्षणं लिखत। १०

१९५२

१ अ-इ-उ एषां वर्णानां प्रत्येकमष्टादशभेदान् सयुक्तिकमुपपाद्य, विश्वपाभिरित्यत्र दत्वं कथन्नेति शंका समाधेया । ७

२ गव्यूतिः, तवल्कारः, प्रोढवान्, प्रार्च्छति, उपेडकीयति, शिवेहि, सुश्लोकेति, चतुर्मुखः, वाग्घरिः, सञ्छम्भुः, संस्कर्ता, शिवच्छाया, हरिस्फुरति, शिवोऽर्च्यः, अहर्पतिः एषु यथेच्छं दश प्रयोगान् विशेषसूत्रनिर्देशपुरस्सरं संसाध्य, ईदूतौ च सप्तम्यर्थे इति सूत्रे अर्थग्रहणस्य प्रयोजनं स्फुटीकुरुत। १५

३ रमाः, सर्वे, दत्तः, यूष्णः, व्यह्नि, सुसखिना, उड्डुलोमाः, क्रोष्टुः, निट्त्सु, एषु सप्त संसाध्य, प्रियास्तिस्रो यस्य इति विग्रहे कीदृशं रूपम् । १०

४ अजरासि, प्ररीणाम्, अनड्वान्, प्रियाष्ट्नः, अदमुयङ्, अतिवयम् । तक्, सेदुषः अमुष्याः, विमलदिवी, बेभिदि—एषु अष्ट साधनीयाः । अथवा—श्रीपाय, प्रराभ्याम्, आभ्याम्, वृत्रघ्नः, मघवान्, युष्माकम्, गोमान्, षण्णाम्, तट्, अनया, स्वाम्पि, पिपठिषि, एषु अष्ट साधनीयाः । ८

५ पञ्चाजी, पञ्च, मनायी, सुकेशी, अलट्विका, पद्धतिः, कार्यविशेषम्प्रदर्श्य

वोतो गुणवचनादितिसूत्रे उतः किम्, शुचिरिति फक्किका व्याख्यायताम्। १०

१९५३

१ अ अ इति सूत्रप्रयोजनं प्रदर्श्य, स्वं रूपं शब्दस्याशब्दसंज्ञा, विरामोऽवसानम्, अचश्च, स्थानेऽन्तरतमः, स्वरितेनाधिकारः, अदर्शनं लोपः, एषु केषाञ्चिच्चतुर्णां सप्रयोजननिर्देशमर्था लेख्याः। १०

२ लाकृतिः, प्रष्ठौहः, दशार्णः, हरी एतौ, तच्छिवः, आच्छादयति, एषु चतुरः संसाध्य चतुष्कपालः, इत्यत्र षत्वविकल्पः संभाव्यते न वेति। १०

३ ङ्याप्प्रातिपदिकात्, इति सूत्रे ङ्याब्ग्रहणफलमभिधाय निर्जरसौ, यूष्णि, ग्रामणीः, सुसखा, उडुलोमान्—एषु चत्वारः साधु साधनीयाः। १०

४ गमुल्, अतिस्त्रेः, अजरांसि, सानूनि, तुराषाट्, अर्वतः, अतित्वम्, चिकीर्षुः, उष्णिक्षु, अमुष्यै—एषु यथेच्छं पञ्च साधनीयाः। १०

५ असानि, गवाक्षु, सुपुंसी, पिबघ्यै, अतिसुत्वरी, अधित्यका, पूतक्रतायी, केषाञ्चिच्चतुर्णां सार्थनिर्देशं सिद्धि प्रदर्श्य स्वाङ्गत्वं निरूप्यताम्। १०

१९५४

१ नाज्झलौ—इति सूत्रप्रयोजनमभिधाय तपरस्तत्कालस्य, येन विधिस्तदन्तस्य, तस्मादित्युत्तरस्य, सर्वत्र शाकल्यस्य, अन्तादिवच्च, एषु केषाञ्चिच्चतुर्णामर्थाः सफलनिर्देशं व्याख्येयाः। १०

२ पुत्रजग्धी, गुरावुत्कः, स्थूलौतुः, सुश्लोकेति, कुण्ठितः, पुंख्यानम्, एषु यथेच्छञ्चतुरः संसाध्य मातुः कृपेत्यत्र षत्वं कुतो नेति विचार्यताम्। १०

३ अहर्गणः, हरी रम्यः, अतितत्, माभिः, सुसखौ, वातप्रमी, स्वभुवौ, ससूत्रनिर्देशं पञ्च प्रयोगान् संसाध्य नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थमित्यस्य वैशद्येनार्थः प्रकाश्यताम्। १०

४ प्रियतिसा, अजराणि, प्रराभ्यां, कमल्पु, यज्वनः, अतियुष्मदोः, अमुमुयञ्चः, पिपठीः, आशीर्भिः, बेभिदी, यथारुचि पञ्च साधनीयाः। १०

५ उदेतोः, उष्णिहा, शर्वरी, दाक्षिणात्यिका, शुभंयिका, कात्यायनी, द्विबिस्ता—केषाञ्चिच्चतुर्णामर्थनिर्देशं सिद्धिं च विलिख्य जातेः स्वरूपं सोदाहरणं स्फुटीक्रियताम्। १०

१९५५

१ 'लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा' इत्युक्तिः समर्थनीया। ५

२ अवश्यलाव्यम्, गुरा उत्कः, प्रार्षभीयति, मनीषा, पटत्पटेति, गवाक्षः, सुश्लोकेति, सर्पिष्टमम्, उत्थानम्, पुंस्कोकिलः, वासः क्षौमम्, मातुः कृपा, गीः काम्यति, शम्भू राजते । एषु केऽपि दश प्रयोगाः साधनीयाः । १५

३ रामस्य, वर्णाश्रमेतराणाम्, माम्याम्, द्वयहनि, सुसखिना, उड्डुलोमान्, सर्वासाम्, लिट्त्सु, अतिस्त्रियै, एषु पञ्च प्रयोगान् संसाध्य कथं तर्हि हा पितः क्वासि हे सुभ्रु ? इति ग्रन्थः सप्रपञ्चं समर्थनीयः । १०

४ अजरसम्, श्रीपाय, चतुर्ण्णाम्, राज्ञः पन्थाः, तक्, अमुष्यै, विमलदिवी, एषु केवलं पञ्च प्रयोगान् संसाध्य, युष्मानस्मान् वातिक्रान्त इति विग्रहे रूपाणि लिखत ।

५ पञ्चाजी, बहुधीवा, अखट्विका, गार्गी, पञ्चाश्वा, मनावी, द्विपुरुषी, अतिकेशी, औपगवी, गोपालिका, एषु अष्टौ प्रयोगाः साधनीयाः । ८

१९५६

१ शकारयकारयोराभ्यन्तरप्रयत्नमुल्लिख्य ह्रस्वाकारस्य प्रक्रियादशायां विवृतत्वे प्रमाणञ्चाभिधाय 'अचश्च' इति परिभाषायाः सोदाहरणमर्थं लिख । १०

२ विष्णवे, तवल्कारः, प्राच्छंति, हरी एतौ, सुश्लोकेति, मामकी तनू इति, सञ्छम्भुः, कौतस्कुतः, धनुष्कपालम्, स उ एकाग्निः; गीःपतिः, सेमामविड्ढि प्रभृतिं य ईशिषे—एतेषु षण्णां साधुत्वमभिधाय 'ल्यापादेशे न' इत्युक्तिः समर्थनीया । १०

३ रामाणाम्; निर्जरसे; पदः; सख्यौ; उड्डुलोमाः; नियाम्; क्रोष्टूनाम्; मत्याम्; उद्ना, अत्र पञ्चानां साधुत्वमभिधाय—अतिस्त्रिशब्दस्य पुंसि समस्वपि विभक्तिषु रूपाणि प्रदर्शय ।

४ आभ्याम्; राज्ञ; मघवान्; प्रियाष्टनः; युष्माकम्, अमुना; अहोभ्याम्; बहूर्जि; अत्र षण्णां साधुत्वं सम्यगभिधाय 'उगिदचां सर्वनामस्थानेऽधातो' रिति सूत्रस्याधातुग्रहणस्य फलं विवेचय । १०

५ भवती, कारिका, इत्वरी, कुमारी, कुण्डोघ्नी, गोणी, उपाध्याया, इन्द्राणी,

सुजघना, औपगवी, एतेषु पञ्चानां साधुत्वं विशेषसूत्रनिर्देशपुरस्सरमभिधाय पञ्चाजीत्यत्र टापः प्राप्ति समुद्भाव्य निराकुरु । १०

१९५७

१ 'तुल्यास्यप्रयत्नं सवर्णम्' 'अचः परस्मिन् पूर्वविधौ' 'ईदूतौ च सप्तम्यर्थे' 'यरोऽनुनासिकेऽनुनासिको वा' 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' एतेषु यदृच्छया त्रयाणां सोदाहरणमर्थमुपवर्ण्य विश्वपाभिरित्यत्र ढत्वाशङ्का निरसनीया । १०

२ लव्यम्; तवल्कारः;. प्रार्षभीयति; किम्वुक्तम्; एतन्मुरारिः, वाग्घरिः, सञ्छम्भुः, संस्कर्ता, हरिस्फुरति; नमस्करोति, भो अच्युत; मनोरथः; अत्र पञ्चानां साधुत्वं विधेयम् ।

अथवा उपैति, अमी ईशाः, उ इति, सन्त्सः, द्विष्करोति, सैष दाशरथी रामः, एतेषु त्रयाणामेव साधुत्वमभिधाय चतुर्मुख इत्यत्रानुनासिकः कथन्नेति समाधेहि ? १०

३ रामाय, वर्णाश्रमेतराणाम्; मासा; हरौ, जरसाम्; स्त्रीम्; दध्ना एषु त्रयाणां साधुत्वमभिधाय क्रोष्टुशब्दस्य रूपाणि लिख । १०

४ सर्वेषाम्, आभ्याम्, अष्टौ; अस्माकम्, रमायाम्, गवाक्षि,—एतेषु त्रयाणां साधुत्वं सम्यगभिधाय त्वामतिक्रान्त इति विग्रहे सप्तस्वपि विभक्तिष्वतियुष्मच्छब्दस्य रूपाणि लिख । १०

५ सर्विका, इत्वरी, कुण्डोध्नी, पत्नी, भाजी, अतिकेशी—एतेषु त्रयाणां स्त्रीप्रत्ययकार्यं प्रदर्श्य वक्ष्यमाणेत्यत्र ङीपः प्राप्ति समुद्भाव्य समाधेहि । १०

१९५८

१ हलन्त्यमितिसूत्रावृत्तिहेतुस्पष्टीकरणपुरस्सरं त, च, ड, ब, यवर्णेषु कयोरपि द्वयोराभ्यन्तरप्रयत्नोल्लेखपूर्वकमलोऽन्त्यस्येति सूत्रार्थं सोदाहरणं लिखत । १०

२ कृष्णर्द्धिः, प्रैषः, गवाग्रम्, एतन्मुरारिः, उत्थानम्, शार्ङ्गिञ्जय, निष्प्रत्यूहम्, पुना रमते—एतेषु केषाञ्चित् पञ्चानां साधुत्वं प्रदर्शयत ।

अथवा—जय्यम्, प्रार्च्छति, पटत्पटेति, तच्छिवः, पुंस्कोकिलः, धनुष्कपालम्, देवा नम्याः, एष विष्णुः—एतेषु पञ्चानां साधुत्वं साधयत । १०

३ रामान्, पूर्वे, दद्भ्याम्, सख्युः, क्रोष्टुः, निट्त्सु, प्रद्युना—एतेषु चतुर्णां

साधुत्वं वक्तव्यम् । १०

४ विश्वौहः, राज्ञः, यूयम्, भवान्, अद्‌भ्यः, स्वाम्पि, नर्तकी, स्थली, यवनानी, नारी—एतेषु चतुर्णां साधुत्वं प्रदर्शयत । १०

५ अधस्तनीषु फक्किकासु कयोरपि द्वयोराशयं स्वसंस्कृतेन विशदं वर्णयत—

(१) अचि किम् ? कुमारी शेते, (२) टोः किम् ? सर्पिष्टमम्, (३) विधिः किम् ? स्त्री इयती, (४) पूर्वस्य किम् ? परस्य माभूत्, कटुका, (५) उपसर्जनात् किम् ? शिखा । १०

१९६०

१ सवर्ण पंहिता-पद-संज्ञाविधायकनि सूत्राणि सोदाहरणानि लिखित्वा अष्टाम्य औश् इत्यादावादेः परस्येत्येतदपि" इति पङ्क्तेराशयं स्पष्टं प्रतिपादयत । १०

२ तवल्कारः, प्रार्षभीयति, शिवेहि, रामकृष्णावमू आसाते, सत्र्छम्भुः, कांस्कान्, मातुः कृपा, भो देवाः, एषु केचन पञ्चैव प्रयोगाः साधु साध्याः । १०

३ रामाणाम्, जरसौ, सखा, लून्युः, श्रीणाम्, हे वर्षाभु, ज्ञानानि, दध्ना, एषां केषाञ्चित् पञ्चानां सिद्धिः कार्या ।

अथवा

सम्बुद्ध्याक्षिप्तस्याङ्गस्यैङ्ह्रस्वाभ्यां विशेषणान्नेहेति पङ्क्तेराशयं प्रतिपाद्य पितरावित्यत्र दीर्घाभावे कारणं लिखित । १०

४ अनड्वान्, यूनः, राज्ञः, अग्ने तेजस्विन्, तादृक्, विदुषः, अमूः, चेच्छिदि, विसृपः, एषु केचन पञ्च प्रयोगाः साधनीयाः ।

अथवा

समस्यमाने द्वयेकत्ववाचिनो युष्मदस्मदीत्यादि कारिकार्थः सोदाहरणं स्फोरणीयः । १०

५ निर्भस्त्रिका, अतिधीवरी, गार्गी, कन्या, सपत्नी, ब्रह्माणी, तटी, नारी एतेषां पञ्चानामेव सिद्धिः साधु कार्या । १०

१९६३

१ वृद्धिगुणसंज्ञयोर्विषयव्यवस्थार्थमावश्यकत्वे कथम् ऐऔज् इति सूत्रारम्भस्य

सावर्ण्याभावज्ञापकत्वमिति समाधाय म, थ, ट, प, वर्णेषु कयोरपि द्वयोरपि बाह्यप्रयत्नाः लेख्याः ।

अथवा

नाज्झलावित्यत्राकारस्य प्रश्लेषफलं मानञ्च प्रदर्श्य ईको गुणवृद्धी इति सूत्रं सोदाहरणं व्याख्येयम् । १०

दध्यत्र, अवश्यलाव्यम्, सुश्लोकेति, मामकी तनू इति, वाग्घरिः; सन्त्सः, सञ्च्छम्भुः एतेषु त्रयाणामेव साधुत्वं विधाय कथन्तर्हि मदोदग्राः ककुद्मन्तः इत्याद्युक्तेराशयं विशदीकुरुत ।

अथवा

कृष्णर्द्धिः, उपार्च्छति; होतृकारः, उत्थानम्, संस्कर्ता; चक्रिंस्त्रायस्व, आविष्कृतम्, शिवोर्च्यः, स उ एकाग्निः, धूर्पतिः, एतेषु पञ्चैव साधनीयाः। १०

रामाय, हरौ, सख्युः, माभ्याम्, द्वयह्नि, माम्, एतेषु त्रयाणां साधुत्वं विधाय क्रोष्टुशब्दस्य सर्वविभक्तिषु रूपाणि लिखत । १०

जरसौ ईत्यत्र शीभावमाशंक्य परमतप्रदर्शनपूर्वकं दीक्षितोक्तदिशा समाधाय, आस्ना, प्रीणाम्, ध्रुक्षु, राज्ञः, पियपञ्चाम्, अस्माकम्, अमुमुईचा, षण्णाम्, एतेषु त्रयाणामेव साधुत्वं विधेयम् । १०

स्वाम्पि, बहुराज्ञी, अजिका, चिरण्टी, इन्द्राणी, ब्रह्माणी एतेषु त्रयाणामेव साधुत्वं विधाय स्वाङ्गलक्षणं ग्रन्थकारोक्तं सोदाहरणं वक्तव्यम् । १०

१९६६

तुल्यास्यप्रयत्नं सवर्णम् । अणुदित् सवर्णस्य चाप्रत्ययः । अनयोः कार्यवैलक्षण्यं सोदाहरणं प्रदर्श्य अष्टाभ्य औश् इत्यादावादेः परस्येत्येतदपि परत्वादनेन वाध्यते अस्याशयः प्रदर्शनीयः । १०

एङि पररूपम् इत्यत्र वासुपीत्यनुवर्त्य वाक्यभेदेन व्याख्यानं प्रदर्श्य प्रार्च्छति, लव्यम्, पटत्पटेति, अहो ईशाः, त्वङ् करोषि, पुंस्कोकिलः, निष्प्रत्यूहम्, शिवो वन्द्यः, मनोरथः, एष विष्णुः, एषु चत्वारः साध्याः । १०

सर्वेषाम्, यूष्णि, नियाम्, क्रोष्ट्री, श्रीपाय, एषु चतुर्णां सिद्धिं विधाय नेयङुवङ्स्थानावस्त्री, इति सूत्रं व्याख्येयम् । १०

४ अनड्वान्, पथः, प्राचा, अद्‌भिः, धनूंषि, अमूनि, एषु चतुर्णां सिद्धिं विधाय कृन्मेजन्तः, इति सूत्रं व्याख्यायताम् । १०

५ एन्द्री, गार्गी, द्वयघ्नी, एनी, कठी, बैदी, सविग्रहं चतुरः संसाध्य बहुव्रीहिः भाषितपुंस्कत्वात् ततो विहितस्य नित्यम् शैषिके कपि तु विकल्प एवेति भेदे युक्तिं प्रदर्शयत । १०

१९६७

१ अ, इ, उ, ऋवर्णानां प्रत्येकमष्टादशभेदान् सयुक्तिकं प्रदर्श्य विश्वपाभिरित्यत्र होढ इति ढत्वं न भवतीति ग्रन्थः विवेचनीयः । १०

२ गव्यूतिः, तवल्कारः, अवेहि, वाप्यश्वः, अमुकेऽत्र, चतुर्मुखः, तच्छिवः, सञ्छंभुः, शिवच्छाया, मातुःकृपा, देवाः सन्ति, सैष दाशरथी रामः, एषु षट् साध्याः । १०

३ रामः, सर्वे, त्वत्कपितृकः, पूष्णः, सुसखिना, क्रोष्टुः, गमुल्, निजम्याम्, श्रियाम्, अजरसम्, प्ररीणाम्, एषु पंच साध्याः ।

४ विश्वौहः, आम्याम्, राज्ञः, वृत्रघ्नः, प्रियाष्टाम्याम्, अतिवयम्, प्रतीचः, धीमान्, तक्, अमूषाम्, विमलदिवी, बेभिदि, एषु पञ्च संसाध्य—

अदसोद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत् ।
केचिदन्त्यसदेशस्य नेत्येकेऽसेहि दृश्यते ।।

इयं कारिका व्याख्यया ।

अथवा

सुद्यौः, अनेन, प्रतिदीव्ना, मघवान्, अष्टौ, युष्माकम्, विविट्, अमुना, दृक्, असृक्, स्वाम्पि, पंच संसाध्य

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपं चैव हलन्तानां यथा वाचा निशा दिशा ।।

इयं कारिका व्याख्येया । १०

५ पंचाजी, निर्भस्त्रका, वक्ष्यमाणा, मनावी, दंष्ट्रा, उपाध्याया, सुस्वेदा, युवतिः, एषु चतरः संसाध्य

आकृतिग्रहणा जातिः लिङ्गानाञ्च न सर्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ।।

इयं कारिका व्याख्येया । १०

१९६८

१ वाह्यप्रयत्नाः के, तेषां प्रयोजनं च किमिति सयुक्तिकं विवेचय । १०

२ हर्य्यनुभवः, श्रिया उद्यतः, कृष्णर्द्धिः, प्रोढवान्, प्राच्छंति पटत्पदिति, विष्णविति, उत्थानम्, प्राङ्क्षष्ठः, संस्कर्ता, पुंख्यानम्, रामस्थाता, शिवोर्च्यः, मनोरथः, एषु सप्त साध्याः । १०

३ रामाय, वर्णाश्रमेतराणम्, दतः, सखा, कति, बहुश्रेयसीनाम्, पितरौ, मत्याम्, प्रियतिसा, सानूनि एषु पंच साध्याः । १०

४ अनड्वान्, चतुर्णाम्, मघोनः, पन्थाः, प्रियाष्ट्नः, षण्णाम्, सेदुषः, अमुया, स्वाम्पि, एषु पंच संसाध्य त्वां मां वा अतिक्रान्त इति विग्रहे सुजसङेङस्सु परतः रूपाणि लिखत ।

अथवा

अयम्, पूषणि, यूनः, अस्मभ्यम्, उदीचः, अमीभिः, अहोभिः, पिपठिषि, एषु पंच संसाध्य गवाक्शब्दस्य प्रथमाविभक्तिषु रूपाणि लिखत । १०

५ अतिसुत्वरी, अखट्विका, पञ्चाश्वा, अन्तर्वत्नी, मातुलानी, नारी, श्वश्रूः, एषु चतुरः संसाध्य—

अद्रवं मूर्तिमत्, स्वाङ्गं प्राणिस्थमविकारजम् ।
अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथा युतम् ।।

इयं कारिका व्याख्येया । १०

परिशिष्टम्

देव्यवाच (ई० ५०) ननु देवी उवाच इत्यवस्थायां 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इत्यनेन ह्रस्वसमुच्चितः प्रकृतिभावः कुतो नेति चेत् शृणु ह्रस्वसमुच्चितप्रकृतिभावस्य विकल्पत्वेन पक्षे देवि उवाच इत्यपि सिद्धयति इति दिक् ।

अ अ इति (ई० ५३) ननु अ अ अस्य सूत्रस्य किं प्रयोजनं इति चेत् शृणु साध्वनुशासनेऽत्र शास्त्रे संवृताकारस्यापि साधयितुमुचितत्वात् अ अ इति सूत्रेण विवृताकारस्य संवृतविधानावश्यकत्वात् । अत्र एकोऽकारः विवृतः, अपरः संवृतः, तेन न सवर्णदीर्घः ।

न च विवृताकारेण दीर्घादीनामपि ग्रहणात् संवृतादीनामपि दीर्घानां ग्रहणप्रसङ्ग इति वाच्यम्, व्याख्यानात् अत्र विवृताकारेण केवलस्य ह्रस्वस्यैव ग्रहणेन ह्रस्वस्यैव अवर्णस्य संवृतत्वबोधनात् ।

दध्यत्र (ई० ५९) दधि अत्र इत्यवस्थायां 'इको यणचि' इत्यनेन यणि दध्यत्र इति सिद्धम् ।

रामकृष्णावमू आसाते (ई० ६०) अमू आसाते इत्यत्र 'अदसो मात्' इत्यनेन प्रगृह्यसंज्ञायाम् प्लुतप्रगृह्या अचि नित्यमित्यनेन प्रकृतिभावे अमू आसाते इति सिद्धम्।

ननु **क्लीबे** अदस् शब्दादौङि त्यदाद्यत्वे, पररूपत्वे, नपुंसकाच्चेति शीभावे आद्गुणे, अदे इति स्थिते उत्वे, मत्वे च अमू इति सिद्धयति । स्त्रीलिङ्गे अदश्शब्दादौङि त्यदाद्यत्वे, पररूपत्वे, टापि, औङ आपः इति शीभावे आद्गुणे अदे इति स्थिते उत्वे, मत्वे च कृते अमू इति सिद्धयति । उभयत्र प्रगृह्यसंज्ञां प्रति उत्वमत्वयोरसिद्धत्वेन एकारान्तत्वात् 'ईदूदेद्द्विवचनं प्रगृह्यम्' इत्यनेनैव प्रगृह्यत्वे सिद्धे उकारांशे किमनेन सूत्रेण प्रयोजनम् इति चेन्न, पुंलिङ्गे अदश्शब्दादौङि त्यदाद्यत्वे, पररूपत्वे वृद्धिरेचीति वृद्धौ अदौ इत्यवस्थायाम् उत्वे मत्वे च कृते अमू इत्यस्य आसाते इत्यनेन योगे प्रगृह्यार्थम् उकारांशेऽपि सूत्रस्य प्रयोजकत्वात् । एतदेव द्योतयितुं मूले रामकृष्णौ इति विशेषणमुपात्तमिति दिक् ।

हमारे महत्त्वपूर्ण छात्रोपयोगी प्रकाशन

जिनमें मूलपाठ के साथ संस्कृत-हिन्दी टीका, भूमिका, नोट्स एवं अन्य छात्रोपयोगी सामग्री है

अभिज्ञानशाकुन्तल	सुबोधचन्द्र पन्त	१२.००
उत्तररामचरित	आनन्द स्वरूप	१५.००
कादम्बरी (पूर्वार्द्ध)	मोहनदेव पन्त	२०.००
कादम्बरी (उत्तरार्द्ध)	मोहनदेव पन्त	१५.००
किरातार्जुनीय	जनार्दन शास्त्री (१-६) सर्ग	८.५०
कुमारसंभव	जगदीशलाल शास्त्री (१-५ सर्ग)	७.००
चन्द्रालोक	सुबोधचन्द्र पन्त	६.००
जातकमाला (संपूर्ण)	सूर्यनारायण चौधरी	१२.५०
जातक पारिजात	गोपेशकुमार ओझा	४५.००
दशकुमारचरित	सुबोधचन्द्र पन्त	१०.००
दशकुमारचरित (अष्टम उच्छ्वास)	मोहनदेव पन्त	४.००
दशरूपक	डा. बैजनाथ पाण्डेय	१८.००
दूतघटोत्कच	रमाशंकर त्रिपाठी	२.००
दूतवाक्य	रमाशंकर त्रिपाठी	२.५०
ध्वन्यालोक (दो भागों में)	रामसागर त्रिपाठी	२८.००
नागानन्द	संसारचन्द्र	५.००
नैषधीय-चरित (६-६ सर्ग)	मोहनदेव पन्त	१८.००
पंचतंत्र	श्यामाचरण पाण्डेय	१५.००
प्रतिमा	श्री धरानन्द शास्त्री	५.००
प्रसन्नराघव	रमाशंकर त्रिपाठी	८.००
भट्टिकाव्य (दो भागों में)	रामगोविन्द शुक्ल (१-८ सर्ग)	१५.००
मालविकाग्निमित्र	संसारचन्द्र	७.५०
मेघदूत	संसारचन्द्र	१०.००
मृच्छकटिक	रमाशंकर त्रिपाठी	१८.००
रघुवंश	धारादत्त शास्त्री (१-१६ सर्ग)	३०.००
वेदान्तसार	आचार्य बदरीनाथ शुक्लः	२५.००
वेणीसंहार	रमाशंकर त्रिपाठी	८.००
शिशुपालवध	जनार्दनशास्त्री पांडेय (१-४सर्ग)	११.००
साहित्यदर्पण	शालिग्राम शास्त्री	[redacted]
सौन्दरनन्द	सूर्यनारायण चौधरी	[redacted]
मू स्वप्नवासवदत्त	जयपाल विद्यालंकार	[redacted]
चरित (प्रथम)	रतिनाथ झा	[redacted]

मोतीलाल बनारसीदास

दिल्ली :: वाराणसी :: पटना